Barcode : 99999990024192
Title - Vyakaran Sidhant Parmal Lagu Chumba
Author - Pandit Vashidar
Language - Sanskrit
Pages - 325
Publication Year - 1920
Barcode EAN.UCC-13



श्रीहरि

पदवाक्यप्रमाणतत्त्वज्ञ-श्रीनागेशभट्टकृता

लघुशब्देन्दुशेखरः

सेयम्

श्रीगुरुवरचरणशरणीकरण-लब्धसर्वतन्त्र-स्वातन्त्र्येण सत्सुवर्णपदक-व्याकरणा
धनेकविषयाचार्येण प्रणयनकाले गयास्थब्रजभूषणसंस्कृतमहाविद्यालयीय
व्याकरणप्रधानाध्यापकेन प्रकाशनकाले भागलपुरस्थ-राजकीय
संस्कृत-महाविद्यालयीय-व्याकरण-प्राध्यापकेन
गयामण्डलस्थ-चन्दौतग्रामवासिना
श्रीयशोधरशर्ममिश्रेण कृतया
'वंशी'-व्याख्यया
समुल्लसिता

श्री जैन श्वेताम्बर स्थानकवासी संघ
गंगाशहर, बीकानेर

प्रकाशक
प० वंशीधरमिश्र.
ग्राम चन्दौत, पो० अम्बा, जि० गया।

प्रथम संस्करण] सं० २०१४

प्रकाशक
प० वशीधर मिश्र
ग्राम चन्दौत, पो० अम्बा,
जिला गया (बिहार)

सर्वाधिकार सुरक्षित

मुद्रक
सूरज प्रसाद गुप्त
ज्वाला प्रिंटिंग वर्क्स
त्रिलोचनघाट, गयाजी।

भूमिका

'प्रमेयसिद्धि प्रमाणात्' इति नियममनुसृत्य भगवता गौतमेन 'प्रत्यक्षानुमानोपमानशब्दा प्रमाणानि' इति सूत्रितम्, तत्र प्रमाकरणरूप एव प्रमाण शब्दार्थं, प्रमा च न पदार्थमात्रविषयिणी 'घट' इत्यनेन जायमानस्य घटत्वप्रकारकघटविशेष्यकज्ञानस्य प्रमात्वसम्भवेऽपि तज्ज्ञानस्य प्रवृत्तिनिवृत्त्यप्रयोजकतया शब्दे तादृशप्रमाकरणत्वस्य निष्फलत्वापत्ते। किन्तु प्रवृत्तिनिवृत्त्यन्यतरोपयोगिविशिष्ट ज्ञानसम्पत्तिर्विचिकित्सानिवृत्तिश्च शब्दप्रयोगफलम्, तच्च वाक्यार्थज्ञानेनैव सम्भवति, वाक्यञ्च 'एकतिङ्वाक्यम्' इति, 'सुप्तिङन्तचयो वाक्यम्' इति, 'क्रिया वा कारकान्विता' इति वास्तु। एवञ्च तादृशवाक्यघटकानि यानि शक्तानि प्रकृति प्रत्ययात्मकपदानि तदुपस्थापितानामर्थानां परस्परं क सम्बन्ध? 'विभक्त्यन्तं पदम्' इति लक्षितपदार्थानाञ्च क सम्बन्ध? कुत्र च तत्पदाना शक्ति? कुत्र द्वितसमासैकशेषसनाद्यन्तधातुरूपकृत्तीनां शवतपदानाञ्च क शक्तिः? वाक्यार्थे कस्य मुख्यविशेष्यतया भान कस्य विशेषणतयेत्यादीनां सूक्ष्मेक्षिकया पर्यालोचनम् मीमांसकनैयायिकाद्यभिमतसिद्धान्तविवेचनपुरःसर वैयाकरणाभिमतसिद्धान्तस्वरूप प्रदर्शनपूर्वकञ्च व्याख्यान भूषणमञ्जूषयोरेवोपलभ्यते नान्यत्र।

एतत्सर्वं प्रक्रियामात्रविदुषामति युत्पन्नानामपि केवलवैयाकरणानामगम्यमे वेति पर्यालोच्य तर्कमीमासावेदान्तादिशास्त्रस्थविषयैर्मञ्जूषायाः परिपूर्णतया तद्वि वेचनस्याद्यापि प्रकाशकव्याख्याया अभावात् तादृशीमुपूर्तिं दूरीकर्तुं सारल्येनान्ते वासिनां ज्ञानाय प्रगाढविदुषां मानसोल्लासाय च संस्कृतभाषया हिन्दीभाषया च व्याख्यानेन स्वीयन्यायवेदान्तमीमांसादिवैपश्चित्यम् अतिरोधता मञ्जूषागतरहस्यरत्न माननीयविद्वत्कदम्बायोपहरता अन्तेवासिहृदये च निदधता गयानगरस्थ ब्रजभूषण संस्कृतमहाविद्यालये व्याकरण प्रधानपदमधिरूढवता भागलपुरीयराजकीयसंस्कृतमहा विद्यालये व्याकरण प्रधानपदमधितिष्ठता व्याकरणाद्यनेकविषयाचार्यत्वमाप्तवता

ऊहापोहे विशिष्टप्रतिभामादधता मदन्तेवासिना श्रीधरशीधरमिश्रेणैतद्व्याख्यान कौस्तुभेन विद्वद्धृदयम् अलङ्कुर्वता व्याकरणस्य दर्शनत्व व्यवस्थापितमिति—असकृ दनुमोदयन् प्रमाणयति—

सभापतिशर्म्मोपाध्यायः एम. एल. सी.

लालघाट प्रिंसिपल

२४-५-५७ विरला संस्कृत कालेज

घाराखड़ी

विशिष्टविदुषां सम्मतयः

श्रीप०वशीधरमिश्रप्रणीत'वशी'नामव्याख्याया आद्या कतिपयेऽशा वक्षो-
किता । लेखकोऽय कृतश्रम शब्दखण्डे प्रतिभावांश्च प्रतिभाति—प्रसन्नः
स्फुटार्थश्चास्य ग्रन्थपरामर्शकार, सुविशदो वृत्तिविवेचनविधि, भावग्राही शाब्द
बोधीयकार्यकारणभावपरिष्कार ।

एतदभ्यासेन सुकुमारमतीनामपि जिज्ञासुजनानां मनासि नूनमधिष्ठातुमर्हन्ति श्रीनागोजिभट्टप्रतिपादिता विषया इति—

हिन्दू विश्वविद्यालय काशी,
मि० मार्गशीर्ष ८
स० २००४

अनुभवति
कालीप्रसादमिश्र

श्री

श्रीमान् प०वशीधरार्यो विपश्चित्—श्रीनागेशप्रणीतमञ्जूषां सस्कृत हिन्दी भाषोमयवाग्भिर्व्यासेनाटीकिष्ट श्रमेण । साधारणासाधारणसंस्कारवदन्तेवासिजनो पचिकार्षया संस्कृतासंस्कृतोभयशरीरेय व्याख्या सर्वेषां विदारसिकानामीप्सितम् अर्थमनायासेन स्फारयन्ती कथं न समादरविषयतामश्नुवीत । यद्यपि समय संकोचात् स्तोकमेवैनां व्यञ्जोकिषि अतोदसीयगुणानां विशिष्य प्रदिदर्शयिषया न प्रायतिषि । सञ्चिक्षिप्सयैव पत्रमलिखम् । एतस्मिन् सस्कृतगिरामपचयकाले एतदपि दुर्दशमिति सविदानो नितरां सप्रसीदामि आशासे भगवतः परमेशिवृ रीदृश प्रयास शुभयु स्यात् इति ।

महामहोपाध्याय
प० श्रीहरिहरकृपालु द्वि०

गयापुरीविराजमानव्रजभूषणमहाविद्यालयाध्यापको ध्वनिना स्फोटस्फोट्न पटु प० वशीधरमिश्रो महावैयाकरण [भट्टश्रीनागेशकर्तृकतया प्रथितामप्य शातनाम्ना केनापि पण्डितेनोपस्थापितां] परमलघुमञ्जूषां स्वनिर्मितयाऽभिनव टीकया समयोजयत् । साचेय विद्वन्मण्डल्याऽस्माभिर्निमान्त्रिता । वशीरूपापीय कुञ्जिकाकार्यं करोतीत्यपि वैचित्र्यमस्या । मञ्जूपाद्घाटनपटीयसी यद्गुरिय काचित्कहिन्दीभाषामयस्वीयवेषविन्यासभावप्रदर्शनकौशलेश्छात्राणां विदुषा च मनोविनोदयन्ती स्वस्यामपि तद्दृष्टिमाकर्षन्तित्याशास्महे ।

धननखमाने वत्सरे कृष्णमासे
तद्वितरपक्षे नक्षमाने तिथौ ।

महामहोपाध्याय नारायणशास्त्री खिस्ते
प्रधानाध्यापक
गवर्नमेन्ट सस्कृत कालेज धनारस ।
रामाज्ञापाण्डेयः

अधिगय प्रथितसंस्कृतमहाविद्यालयेऽधिगतप्रधानाध्यापकपदेन व्याकरणाचार्यादिविरुदालङ्कृतेन पण्डितप्रवरवशीधरशर्मभारद्वाजेन विन्यस्ता व्याकरणनिष्णातरत्नस्य परमलघुमञ्जूषाभिधस्य टीकान्तरनाघ्रातचरस्य वशीधरस्य भगवतो यशोमिव वंशीकामनितरसाधारणपदार्थोपपादनप्रकारमरमासुरं सकृदालोच्य कस्य वा व्याकरणसिद्धान्त संजिघृक्षोर्न पुनरेतद्दिदृक्षाकुल मानसं स्यात् ? यतो विवेचनीयप्रस्तरदार्थानुगतलक्षणतत्समवयादिसरत्नसरणिरन्यत्राद्दष्टचरी । अध्ययनाध्यापनादिकार्यक्षेत्रे षड्गुणायस्यास्य प्रत्यभिज्ञयष्टीकाविरुद्व्याधि सोऽनया चिकित्सित इति परमं प्रमोदस्थानम् वशीविभूषितोऽचिरं प्रकाश्यमानोऽनयस्त विपश्चितामन्तेवासिनां च मनस्तोषमादधद् निरुक्तकार्यक्षेत्रेऽप्यमत्यूहमयतरन् अन्यमतिलङ्घ्य जङ्घालो भवेत् येन टीकाकर्तु वैदुष्यपूर्णं प्रयास फलेग्रहिवामरनु धीतेतिशम् कामयते—

काशी
११-१२-४७

कमलाकान्तमिश्र
काशीस्थ गोयङ्का महाविद्यालयाध्यक्ष ।

वक्तव्यम्

अथेदानीं सच्चिदानन्दशिवस्वरूपस्य लीलावलिप्रललितशब्दार्थप्रपञ्चस्य श्रीकृष्णस्य सुप्युपास्य चरणारविन्दद्वय साऽनुराग प्रणम्य सहृदयसुधापु सादरमिद निवेदयते—इय हि शब्दविद्या सकलपुरुषार्थसाधनविधौ ससारे सर्वोपरि विराजते। सर्वाशमपि विद्यानां सस्कृत शब्दात्मकतया, सस्कृतशब्दानां व्याकरणेनैव सुशासनतया च सम्यक्ससारे महती खल्वावश्यकता व्याकरणस्य। सस्कृतशब्दाश्च स्वनिष्ठवृत्ति निरूपक भूतानामेवाऽर्थाना बोधाय कल्पन्ते। तस्मात् सिद्धान्तभूताना पदपदार्थवाक्यार्थानां परमेण लघुनोपायेन निरूपणाय पदवाक्यप्रमाणतत्त्वज्ञः श्रीनागेशभट्ट परमां लघु वैयाकरणसिद्धान्तमञ्जूषामिमा विरचितवान्। किन्तु अद्यत्वे सन्तत विविध प्रपञ्च चञ्चलतरीकृतचेतस्तया अस्य ग्रन्थस्य आवश्यकमहाभाष्यदर्शनादिदुरूहविषये परिपूर्णतया च सुमेधसामपि ग्रन्थोऽय दुर्बोध इव समभूत्। इति कृत्वा केनाऽपि देवेन प्रेरित इवाऽह गूढ मञ्जूषापिधानोद्भेद मन्त्रवतीमिमां स्वरचितां 'शर्मी' समवादयम्। अनया च सिद्धान्तरत्न-ग्राहकाणा यावान् उपकारो भवितुमर्हति तत्र विदुषामनुभव एव प्रमाणमस्तु।

सेय 'शर्मी' सम्प्रति विद्वत्कुलमौलिमाला-लालितचरण कमलस्य सन्तत सूरि समाज सामापत्याद्वर्धनामधेयस्य काशिकाऽलङ्काररूपस्य गुरुवरस्य (श्रीमत् सभापतिशर्मोपाध्याय महोदयस्य) मूर्त्तिमत्येव मय्यनुकम्पया मुद्रितावस्थया प्रकाशमासादयति सुधी-समाजे। अपि च अस्या मुद्रणविधौ, काश्यां ब्रह्मघट्टे निवसता अलमोद्दामपाण्डित्याभिजनेन सतीर्ष्यतया मम सुहृदा सहृदयेन विद्वद्वरेण आचार्य श्रीजनार्दनशास्त्रिपाण्डेयेन एकेनैव सकलोऽपि प्रयासोऽनुष्ठित। अन्यथा काश्या मस्या मुद्रण सुदूरे वसता मया कथङ्कार कारितं स्यात्! केवल धन्यवाददान विदुषाऽनेन निष्कारणमित्रेण कृतानामुपकृतीना तुलां नारोहति।

विद्वत्कुलकमलदिवाकरोऽय श्रीनागेश —"पातञ्जले महाभाष्ये कृतभूरिपरिश्रम शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः।' 'शृङ्गवेरपुराधीशाद्रामतो लब्धजीविक' सर्वतन्त्रार्थतत्त्वज्ञ सर्वत्र च निबन्धकृत् वैयाकरणनागेशः।'

गयापुरीविराजमानव्रजभूषणमहाविद्यालयाध्यापको ध्वनिना स्फोरस्फोरन पटु प० वशीधरमिश्रो महावैयाकरण [भट्टश्रीनागशकर्तृकनया प्रथितामप्य शातनाम्नो केनापि पण्डितेनोत्स्थापितां] परमलघुमञ्जूषा स्वनिर्मितयाऽभिनव टीकया समयोजयत् । साचेय विद्वन्मण्डल्याऽस्माभिर्निभालिता । वशीरूपापीय कुञ्जिकाकार्यं करोतीत्यपि वैचित्र्यमस्या । मञ्जूषाद्घाटनपटीयसी मञ्जुरियं क्वाचित्कहिन्दीभाषामयस्वीयवेषविन्यासभावप्रदर्शनकौशलेश्छात्राणां चित्तं च मनोविनोदयन्ती स्वस्यामपि तद्दृष्टिमाकर्षतीत्याशास्महे ।

धननवमाने वत्सरे कृष्णमासे
तदितरपक्षे नवमाने तिथौ ।

महामहोपाध्याय नारायणशास्त्री खिस्ते
प्रधानाध्यापक
गवर्नमेन्ट सस्कृत कालेज बनारस ।
रामाज्ञापाण्डेय

अधिगय प्रथितसस्कृतमहाविद्यालयेऽधिगतप्रधानाध्यापकपदेन व्याकरणा चार्यादिविरुदालङ्कृतेन पण्डितप्रवरवशीधरशर्ममारद्वाजेन विन्यस्तां व्याकरण-निचयरत्नस्य परमलघुमञ्जूषाभिधस्य टीकान्तरनाग्रातचरस्य वशीधरस्य भगवतो वशामिव वशीकामनिवरसाधारणपदार्थोपपादनप्रकारभरभासुरां सकृदालोच्य कस्य वा व्याकरणसिद्धान्त सजिघृक्षोर्न पुनरेतद्विद्वाकुल मानस स्यात् ? यतो विवेचनीयम् यस्यपदार्थानुगतलक्षणतत्तसमन्वयान्सिरलसरणिरन्यत्राऽदृष्टचरी । अध्ययनाध्यापनादिकार्यक्षेत्रे षड्गुणापरनाम्नः ग्रन्थरत्नस्यैतटीकानिरूढायामि सोऽनपा चिकित्सित इति परम प्रमोदस्थानम् वशाविभूषितोऽचिरं प्रकाश्यमानोऽनवरत विपश्चितामन्तेवासिनां च मनस्तोषमादधद् निरुक्तकार्यक्षेत्रेऽप्यग्रत्यूहमवतरन् अन्यमतिलङ्घ्य जनालो भवेत् येन टीकाकर्तुं यद्दुष्यपूर्णं प्रयास फलेग्रहितामरतु वीतेतिराम् कामयते—

काशी
११-१२-४७

कमलाकान्तमिश्रः
कार्यालय गोयनका-महाविद्यालयाध्यक्ष ।

वक्तव्यम्

अथेदानीं सच्चिदानन्दशिवस्वरूपस्य लीलावलिकलितशब्दार्थप्रपञ्चस्य श्रीकृष्णस्य सुपासुपास्य चरणारविन्दद्वय साऽनुराग प्रणम्य सहृदयसुधीषु सादरमिद निवेदयते—इय हि शब्दविद्या सकलपुरुषार्थसाधनविधौ ससारे सर्वोपरि विराजते। सर्वासामपि विद्यानां सस्कृत शब्दात्मकतया, संस्कृतशब्दानां व्याकरणेनैव सुशासनतया च सम्यक्ससारे महती खल्वावश्यकता व्याकरणस्य। सस्कृतशब्दाश्च स्वनिष्ठवृत्ति निरूपक भूतानामेवार्थानां बोधाय कल्पन्ते। तस्मात् सिद्धान्तभूतानां पदपदार्थवाक्यार्थानां परमेण लघुनोपायेन निरूपणाय पदवाक्यप्रमाणतत्त्वञ्च श्रीनागेशभट्ट परमां लघुं वैयाकरणसिद्धान्तमञ्जूषामिमा विरचितवान्। किन्तु अद्यत्वे सन्तत विविध प्रपञ्च चञ्चलतरीकृतचेतसया अस्य ग्रन्थस्य आवश्यकमहाभाष्यदर्शनादिदुरूहविषये परिपूर्णतया च सुमेधसामपि ग्रन्थोऽय दुर्बोध इव समभूत्। इति कृत्वा केनाऽपि देवेन प्रेरित इवाऽह गूढ मञ्जूषापिधानोद्भेद मन्त्रवतीमिमा स्वरचितां 'वर्शी' समवादयम्। अनया च सिद्धान्तरत्न-माहकाणां यावान् उपकारो भवितुमर्हति तत्र विदुषामनुभव एव प्रमाणमस्तु।

सेय 'वर्शी' सम्प्रति विद्वत्कुलमौलिमाला-लालितचरण कमलस्य सन्तत-सूरि समाज सामापत्यादन्वर्थनामधेयस्य काशिकाऽलङ्काररूपस्य गुरुवरस्य (श्रीमत् समापतिशर्मोपाध्याय महोदयस्य) मूर्त्तिमत्येव मध्यनुकम्पया मुद्रितानतया प्रकाश मासादयति सुधी-समाजे। अपि च अस्या मुद्रणविधौ, कार्यां ब्रह्मवर्ते निवसता अलमोढ़ामण्डलाभिजनेन सतीर्थ्यतया मम सुहृदा सहृदयेन विद्वरेण आचार्य श्रीजनार्दनशास्त्रिपाण्डेयेन एकेनैव सकलोऽपि प्रयासोऽनुष्ठित। अन्यथा कार्या मस्या मुद्रण सुदूरे वसता मया कथङ्कार कारित स्यात्? केवल धन्यवाददान विदुषाऽनेन निष्कारणमित्रेण कृतानामुपकृतीनां तुलां नारोहति।

विद्वत्कुलकमलदिवाकरोऽय श्रीनागेश —"पातञ्जले महाभाष्ये कृतभूरिपरिश्रम शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भज।' 'शृङ्गवेरपुराधीशाद्रामतो लब्धजीविक' सर्वन्तार्यतत्त्वज्ञ सवत्र च निबन्धकृत् वैयाकरणनागेश'।'

विषय	पृष्ठे
तादात्म्यस्य शक्तिद्योतकत्वम्	११
सामर्थ्यविशेषरूपशक्तेः सम्बन्धरूपशक्तित्वनिरास	११
वाक्यस्फोटे न्यायभाष्यकारसम्मति	१४
सङ्केतस्येतरेतराध्यासत्वे मञ्जूषाविरोध	१५
सङ्केतस्य शक्तिग्राहकत्वम्	१५
सङ्केतस्य शक्ति पार्थक्यम्	१६
शक्य शक्त निरूपणम्	,,
शब्दार्थयोस्तादात्म्यस्वीकारे बीजम्	,,
तादात्म्यपदार्थनिरूपणम्	१७
शब्दार्थयोस्तादात्म्यस्वीकारे आपत्तिवारणम्	१७
बौद्धपदार्थस्य शक्यत्वम्	,,
विकल्पात्मकज्ञाननिरूपणम्	,,
अपोहोऽपि शक्तिस्वीकार	,,
वृद्धव्यवहारस्य शक्तिग्राहकत्वम्	१८
साधुत्वपदार्थ	,,
शक्तेर्द्वैविध्यम्	१९
योगरूढैर्द्वैविध्यम्	,,
शक्तितात्पर्यनिर्णायकनिरूपणम्	,,
लक्षणालक्षणम्	२०
लक्षणभेद	२१
सङ्गतिपदार्थपरिष्कार	,,
लक्षणानिमित्तनिरूपणम्	२२
लक्षणालक्षणे मञ्जूषाकर्तृमतम्	२३
लक्षणाखण्डनम्	२४
व्यञ्जनालक्षणम	२५
तात्पर्याभ्यनिरूपणम्	२७

विषय	पृष्ठे
अधिकरणलक्षणम्	१५७
अधिकरणस्य शाब्दबोध	१५७
अधिकरण त्रिधा	१५८
सप्तिसप्तम्या अर्थ	१६०
शेषषष्ठ्यर्थपरिष्कार	१६१
संयोगस्य सम्बन्धत्वखण्डनम्	१६३
सम्बन्धस्य द्विष्ठत्वम्	,,
'यस्य पुरुष' इत्यत्र पुरुषपदात् षष्ठी न	१६४
सयोग इव अभेदोऽपि सम्बन्धोनास्येव	१६४
नामार्थनिरूपणम्	१६५
मीमासकमते शब्दानां जातौ शक्तिरित्यस्य खण्डनम्	१६६
शक्तिग्रहेतिकारिकाव्याख्यानम्	१६८
वस्तुवस्तु विशिष्टमेव वाच्यम्	१७०
लिङ्गमपि नामार्थः	१७१
शाब्दीयलिङ्गपरिष्कार	१७१
पञ्चक प्रातिपदिकार्थ	१७३
शब्दोऽपि विशेषणतया शाब्दबोधे भासते	१७३
अनुकार्यानुकरणयोर्भेदाऽभेदपक्षौ	१७४
समासादिवृत्त्यर्थनिरूपणम्	१७५
जहत्स्वार्थाऽदिभेद	१७६
समासादिषु विशिष्टे एव शक्ति	१७७
एकार्थीभावलक्षणापरिष्कार	,,
व्यपेक्षावादिमतनिरूपणम्	१७८
व्यपेक्षावादिमतखण्डनम्	१८१
वृत्तिसमानार्थकवाक्यस्यैव विग्रहत्वम्	१८४
वाक्यात् तदिसमृतोरितिकारिकाव्याख्यानम्	१८६

विषय	पृष्ठे
व्यपेक्षापदे दूषण दूषणान्तरञ्च	१६०
समर्थं पदविधिरिति सूत्रे पदविधित्वञ्च	१६२
'वशी' टीकाकार परिचय सहितं मङ्गलम्	१६३–६४
हिन्दी-अनुवाद	१६५–२८६
पाठभेदपत्रम्	२६०
शुद्धिपत्रम्	२६२

॥ श्रीगणेशाय नमः ॥

परमलघुमञ्जूषा

शिवं नत्वा हि नागेशेनाविद्या परमा लघु ।
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥ १ ॥

श्री ।

शिवौ नत्वा मुनीशास्ता हरी वैयटदीक्षितौ ।
श्रीनागेशान् गुरूंश्च श्रीदामोदरसभापतीन् ॥ १ ॥
नागेशगुटमञ्जूषा पिधानोद्भेदमिच्छताम् ।
वंशीधरोऽधुना वंशीं वादयत्येष पण्डिता ! ॥ २ ॥

"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते" इति महाभाष्यस्मृति शिष्टाचारानुमितश्रुतिसिद्धाऽऽचरणक ग्रन्थसमाप्तितत्प्रचारादिप्रतिबन्धकदुरितप्रशमाय समाचरित वक्ष्यमाणलक्षण मङ्गल शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुसङ्गतो मङ्गलाय च ग्रन्थवटकीकुर्वन्नाचार्यो नागेशनामा प्रेक्षावतां प्रवृत्तये प्रवृत्तिप्रयोजकज्ञानजनकज्ञानविषयरूपमनुबन्धचतुष्टय निरूपयति—शिव नत्वेति । शिवमिति—ईशमहेश्वरादिपदवाच्य ब्रह्मेत्यर्थ । पाणिनीय व्याकरणस्य शिवसूत्रमूलकतया पाणिनीयैर्विशेषेण शिव उपास्य इति ध्वनि । नत्वेति—आशीर्वदनानुकूलव्यापारप्रयोज्यफलाऽऽश्रयत्वेनोद्देश्य कृत्वेत्यर्थ । नम्-धात्वर्थश्चप्रकृते—आशीर्वदनानुकूलो व्यापार (करशिर सयोग विशेषादि रूप) अतएव अभिवादनेनास्य पर्यायत्व प्रत्यभिनादनेनचाशीर्वादस्येति । केचित्तु स्वाऽनधिकोत्कर्षविशिष्टज्ञानाऽनुकूलो व्यापारो नम् धात्वर्थ । वैशिष्ट्यञ्च—

स्वप्रकारकज्ञानविशेष्यसमवेतत्व-स्वप्रकारकत्वैतदुभयसम्बन्धेन । उदासीनस्य कर्मनिवारणाय वैशिष्ट्यनियामकप्रथमसम्बन्धोपादानमिति वदन्ति । अपरे तु स्वाऽपकर्षं विशिष्टज्ञानानुकूलव्यापारो नम् धात्वर्थ । वैशिष्ट्यञ्च—स्वनिरूपकसमवेतत्व स्व प्रकारकत्वैतदुभयसम्बन्धेनेति तर्कयन्ति । अन्ये तु स्वाऽपकर्षप्रकारकज्ञानाऽऽश्र यत्वप्रकारकत्वविशेष्यकस्वापकर्षनिरूपकसमवेतज्ञानानुकूलव्यापारो नम्-धात्वर्थ नमस्कार । स्व नमनकर्ता, तदपकर्षप्रकारकज्ञानाश्रयत्वप्रकारकं तदपकर्षनिरूपक- समवेतं तद्विशेष्यकम्—'नमनकर्ता स्वापकर्षप्रकारकज्ञानाश्रय' इति ज्ञानम् नमन कर्मनिष्ठम्, तदनुकूलो नमनकर्तृनिष्ठो हस्तसंचलनादिरूपो व्यापारो धात्वर्थ इति समन्वय इति परिष्कुर्वन्ति । शिव नत्वेत्यनेन मङ्गलमाचरितम् ।

मङ्गलत्वञ्च विघ्नभिन्नत्वे सति विघ्नध्वंसप्रतिबन्धकाऽभावभिन्नत्वे च सति प्रारिप्सितविघ्नध्वंसाऽसाधारणकारणत्वम् । विघ्नेऽतिव्याप्तिनिवारणाय प्रथमसत्य न्तम्, विघ्नस्याऽपि स्वध्वंसाऽसाधारणकारणत्वात् । प्रतिबन्धकाऽभावेऽतिव्याप्ति निरासाय द्वितीयसत्यन्तम्, तस्य साधारणकारणत्वमते तु नेदं विशेष्यम् । कार्यो यागेऽतिव्याप्तिनिस्तारायं प्रारिप्सितेति, तस्याऽपि विघ्नभिन्नत्वाद्विघ्नध्वंसप्रति बन्धकाऽभावभिन्नत्वात्, वृष्टिप्रतिबन्धकानां विघ्नानां यो ध्वंसस्तस्याऽसाधारण कारणत्वाच्च । ईश्वरादिसाधारणकारणे वारणनिवारणाय असाधारणेति । कार्यमात्र प्रति साधारणकारणानि—ईश्वर, तज्ज्ञानेच्छाकृतय, दिक्कालौ, अदृष्टं, प्राग भावश्चेत्यष्टौ । प्रागभावस्थाने प्रतिबन्धकाऽभाव निवेश्य आकाशमधिकं दत्वा नवेति वदन्तीत्यन्यत्र विस्तर ।

ननु मङ्गलं न विघ्नध्वंसस्य कारणम्, सत्यपि मङ्गले कादम्बर्यादौ विघ्नध्वं साऽदर्शनात्, असत्यपि तस्मिन् नास्तिकानां मन्ये विघ्नध्वंसदर्शनाच्च कारणत्वे नाऽभिमतस्य मङ्गलस्य कार्यत्वेनाऽभिमतेन विघ्नध्वंसेन सहाऽन्वयव्यतिरेक्व्यभि चारेण तस्य कार्यव्यापकत्वरूपकारणत्वाऽनापत्तेरितिचेत्—न, 'मङ्गलं सफलम् अविगीतशिष्टाऽऽचारविषयत्वात्' 'मङ्गलं विघ्नध्वंसफलकं विघ्नध्वंसाऽव्यापकसत्वे सति सत्फलत्वात्' इत्यनुमानाभ्यां मङ्गलस्य विघ्नध्वंसं प्रति कारणत्वस्य साधनात् । सत्यपि मङ्गले यत्र विघ्नध्वंसो न दृश्यते तत्र बलवत्तरविघ्नसत्वाऽनुमानेन बल वत्तरविघ्नध्वंसप्रयोजकमङ्गलस्याऽभावेनाऽन्वयव्यभिचाराऽभावात्, यत्र

वत्तरविघ्नध्वंसं प्रति बलवत्तरस्यैव मङ्गलस्य कारणत्वात्। विनाऽपि मङ्गलं यत्र विघ्नध्वंसो दृश्यते तत्राऽपि जन्मान्तरीयस्य तस्य सत्वानुमानेन व्यतिरेकव्यभिचाराऽभावाच्चेत्यन्यत्र विस्तरः।

नागेशेनेति—'आत्मनामे'तिनिषेधस्तु 'रामो द्विर्नाऽभिभाषते' 'तदुपर्यपि बादरायण-सम्मवात्' इत्यादि शिष्टप्रयोगदर्शनात् प्रतिशाकालिकाऽतिरिक्तनामोच्चारणविषयक, 'मो शब्द कीर्त्तयेदन्ते स्वस्यनाम्नोऽभिवादने' इति स्मृतेरभिवादनाऽतिरिक्तविषयकश्चेति प्रकृते न तन्निषेधोल्लङ्घनप्रयुक्त स्वल्पोऽपि प्रत्यवाय इति बोध्यम्।

परमा लघुरिति—तत्वञ्च शब्दाऽल्पत्वेन। अनुबन्धमाह—वैयाकरणेति—[अनुबन्धत्वञ्च—प्रवृत्तिप्रयोजकज्ञानविषयत्वम्]।

अनुबन्धत्वञ्च—प्रवृत्तिप्रयोजकज्ञानजनकज्ञानविषयत्वम्, अथवा अध्ययनजनकप्रवृत्तिजनकचिकीर्षाजनकज्ञानजनकज्ञानविषयत्वम्। "क्रियाऽपि कृत्रिमं कम, क्रियाऽपि क्रिययेप्सिततमा भवति। कया क्रियया? सन्दशनक्रियया वा, प्रार्थयतिक्रियया वा, अन्यवसतिक्रियया वा। इह य एष मनुष्य प्रेक्षापूर्वकारी भवति, स बुद्धया तावत्कञ्चिदर्थं सम्पश्यति, सदृष्टे प्रार्थना, प्रार्थनायामध्यवसाय, अध्यवसाय आरम्भ, आरम्भे निर्वृत्ति, निर्वृत्तौ फलाऽवाप्ति, एव क्रियाऽपि कृत्रिम कर्म" इति "कर्मणोयम्" इति सूत्रस्थभाष्यात् "सर्व इमे स्वभूत्यर्थं यतन्ते" इति हेतुमति चेति सूत्रस्थभाष्याच्च—क्रिया प्रति प्रवृत्ते, प्रवृत्ति प्रति चिकीर्षाया, चिकीर्षा प्रति च इष्टसाधनताज्ञानस्य कारणत्वमिति प्रक्रिया हि लभ्यतेऽनुभवाच्च। तथा च—अध्ययनजनकप्रवृत्तिजनकचिकीर्षाजनक ज्ञानम्—'अध्ययन मदिष्ट साधनम् मत्कृति साध्यञ्च' इति, तज्जनक विषयप्रयोजनसम्बन्धाधिकारिचतुष्टयज्ञानम्, तद्विषयत्वञ्च तच्चतुष्टयस्य इति तेषामनुबन्धत्वमिति लक्षण-समन्वय। 'अध्ययन मदिष्टसाधनम् मत्कृतिसाध्यञ्च' इति ज्ञानस्य जनकत्वन्तु अनुबन्धज्ञानेऽनया रीत्या बोध्यम्—तथाहि, अध्ययनकर्मीभूतग्रन्थप्रतिपाद्याऽर्थस्य विषयत्वात्, प्रवृत्युद्देश्यस्य प्रयोजनत्वात्, अध्ययनकर्मीभूतग्रन्थार्थधारणसमर्थस्याऽधिकारित्वात्, अध्ययनप्रयोजनयोर्योजनाहेतोश्च सम्बन्धत्वात्,—मञ्जूषाऽध्ययनस्य वैयाकरणसिद्धान्ता विषया, तज्ज्ञानं तच्छब्दज्ञानजन्यवेदत्वादि भाष्योक्त प्रयो

तत्र पदवाक्यभेदेन स्फोटस्त्रिधा । तत्रापि जातिव्यक्तिभेदेन पुन

जनम्, अधीतकौमुदीमनोरमादि प्रतिभाशाल्यधिकारी, साध्य-साधनभावश्च सम्बन्ध इत्यनुबन्धचतुष्टयज्ञानम् । अत्र विषयप्रयोजनसम्बन्धानां ज्ञानात् अध्ययन विशेष्येऽनिष्टसाधनत्वप्रकारकज्ञान जायते, अधिकारिज्ञानात् अध्ययन विशेष्यक-कृति-साध्यत्वप्रकारकज्ञान जायते, उक्तज्ञानयोर्मध्यलाभश्च । एतच्चतुष्टयज्ञानात्-'अध्ययनं मदिष्टसाधनम् मत्कृतिसाध्यञ्च' इति हि ज्ञान, सम्यग्जायते । अत्र मूले विषय-मात्रप्रदर्शनेऽपीतरेषामाक्षेप । सलवदनिष्टाऽननुबन्धित्वज्ञान (कृतिसाध्यत्वज्ञानञ्च) न चिकीर्षाजनकमिति विपर्ययवादे निरूपयिष्यते ।

यत्तु ग्रन्थविषययो प्रतिपाद्यप्रतिपादकभाव, अधिकारिग्रन्थयोश्च साध्यसाधन-भाव, विषयाधिकारिणोश्च ज्ञातृज्ञातव्यभाव इत्यनुबन्ध इति, तन्न, एषां ज्ञानस्य प्रवृत्तिप्रयोजकज्ञानजनकत्वाऽभावात्, अन्येषां सम्बन्धज्ञानऽन्यत्र प्रवृत्तेरयोगात् । तस्मादध्ययनप्रयोजनयोर्यं सम्बन्ध साध्यसाधनभावस्त्व एवाऽनुबन्ध ।

यद्यपि अनुबन्धत्व प्रवृत्तिप्रयोजकज्ञानविषयत्वमिति तदपि न, ग्रन्थिताऽऽक्षेपेणामनुबन्धज्ञानानां प्रवृत्तिप्रयोजकज्ञानजन्यत्वाऽभावात्, परम्परया प्रवृत्ति-प्रयोजकत्वाऽऽक्षेपे तु कथञ्चिदुपपद्यतेऽपि ।

यद्यपि प्रवृत्तिप्रयोजकज्ञानम्—'इद मदिष्टसाधनम्' इति, तद्विषयता इद-न्त्वाऽवच्छिन्ना विषयनिष्ठा, इत्यादिप्राचोक्तं लक्षण व्याप्यातन्तदपि न, अध्यय-नस्यैवेदपदार्थत्वेन तस्यैवाऽनुबन्धत्वाऽऽपत्ते, अध्ययनकर्मीभूतग्रन्थप्रतिपाद्यार्थस्य विषयत्वेन शिष्टेष्यद्दत्तस्य तत्त्वाऽनापत्ते । एवञ्चाऽग्रिमग्रन्थोक्तलक्षणे विषयत्व-मनुबन्धस्याऽलक्ष्यत्वान्नातिव्याप्तिरिति दिक् ।

"अथ शब्दानुशासनमि"त्यिमाप्यग व्याकरणस्य शब्दानुशासनात्मकस्य घटेन स्फोटात्मकशब्दस्यैव वृत्त्याऽऽश्रयत्वप्रयोजने वक्तव्यापेक्षिप्यमाणत्वेन सा। तिकशब्दा नामेवेदमनुशासनमिति सिद्धान्तं मूर्धाऽभिषिक्तस्येव मुखोपयिकुर्वाणो ग्रन्थप्रतिपादन मेवारभते—तत्रवर्णपदवाक्यभेदेनेति । तत्रेति निधारणे सप्तमी, सप्तमिन्ता न्तानां मध्य इत्यर्थः । स्फोट इति—स्फुटति प्रकाशतेऽर्थोऽस्मादिति व्युत्पत्त्या दपादानपक्षा युत्पत्ते स्फोटत्वम्—अर्थप्रकाशकशब्दत्वम्, अर्थे स्फोटशब्दस्य

पोढा। अखण्डपदस्फोटोऽखण्डवाक्यस्फोटश्चेति सकलनयाष्टौ स्फोटा। तत्र वाक्यस्फोटो मुख्य तस्यैव लोके ऽर्थबोधकत्वात्तेनैवाथसमाप्तेश्चेति। तदाह न्यायभाष्यकार। पदसमूहो वाक्यमर्थसमाप्तावि ति। अस्य समर्थ मिति शेष। तत्र प्रतिवाक्य सकेतग्रहासभवात् वाक्यान्वाख्यानस्य लघूपायेनाशक्यत्वाच। कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्यय भागान्प्रविभज्य कल्पिताऽन्यामन्वयव्यतिरेकाभ्या तत्तदर्थविभाग शास्त्र-
मात्रविषय परिकल्पयन्तिस्माचार्या। तत्र शास्त्रप्रक्रियानिर्वाहको वर्ण-
स्फोट। प्रकृतिप्रत्ययास्तत्तदर्थवाचका एवेति तदर्थ। उपसर्गनिपात धात्वादिविभागापि काल्पनिक स्थानिनो लादय आदेशास्तिबादय कल्पिता एव। तत्र ऋषिभि स्थानिना कल्पिता अथो कठरवेणैवोक्ता। आदेशाना च स्थान्यर्थाभिधानसमर्थस्यैवादेशतेतिन्यायात्तदर्थाः। एव च स्थानिना वाचकत्वमादेशाना वेति विचारो निष्फल एव। कल्पि-
तवाचकत्वस्योभयत्र सत्त्वात् मुख्य वाचकत्व तु कल्पनया बाधितसमुदाय

यागरादिरिति बोध्यम्। अष्टौ स्फोटा इति—वर्ण, सकलखण्डपद, सकलखण्डवाक्यम्, अखण्डपदम्, अखण्डवाक्यञ्चेति पञ्च व्यक्तय स्फोटा। वर्णत्व, सकलखण्डपदत्व, सकलखण्डवाक्यत्वञ्चेति तिस्रो जातय स्फोटा, इतिसङ्कलनयाऽष्टौ स्फोटयस्मन्ति। अखण्डपदवाक्ययोस्तु न जाति, तयोरेकत्वात्, जातेश्चानेकसमवेतत्वात्, इति न जातिस्फोटस्याऽपि पञ्चत्वम्। वर्णस्तु अखण्ड एव सर्वदा, इति न व्यक्तिस्फोटस्य षड्विधत्वम्, न वाऽखण्डेति विशेषणमपि तत्राऽऽवश्यक, व्यभिचाराऽभावादिति सारम्। तस्यैव लोक इति—अनेन वाक्यस्फोटे लोकव्यवहारस्य प्रामाण्यमिति दर्शितं भवति, वृद्धव्यवहारेण वाक्य एव प्रथमं शक्तिग्रहादिति भाव। वर्णपद-
स्फोटयोरपि स्वीकारे प्रमाणमाह--तत्र प्रतिवाक्यमिति—वर्णपदयो स्फोटत्वे व्याकरणशास्त्रमेव प्रमाणमिति सारम्। व्याकरणेन प्रकृतिप्रत्ययभागव्युत्पादनेन वर्णस्य स्फोटत्वसिद्धि, प्रकृतिप्रत्ययौ तत्तदर्थवाचकाविति 'वर्णस्फोट' इत्यस्य हि तात्पर्यम्, वर्णशब्दस्य पदाऽवयवप्रकृतिप्रत्ययभागपरत्वात्। प्रकृतिप्रत्ययभाग व्युत्पादनद्वारा पदव्युत्पादनमिति पदस्फोटस्याऽपि सिद्धिरिति भाव।

रूपे पदे वाक्ये वा लोकानां तत एवार्थबोधात् उपेयप्रतिपत्त्यथा उपाया अव्यवस्थिता इति न्यायेन व्याकरणभेदेन स्थानिभेदेऽपि न क्षतिः। देश भेदेन लिपिभेदवदितिदिक्। तत्र प्रत्यक्षानुमानोपमानशब्दा प्रमाणा नीति गौतमसूत्रे शब्दश्चाप्तोपदेशरूप प्रमाणम्। आप्तो नामानुभवेन वस्तुतत्त्वस्य कात्स्न्येन निश्चयवान् रागादिवशादपि नान्यथावादी य स घटीशानार्थं स्थूलवर्त्मे अगारमार्थिकारु घटीत्यबोधनमुपायस्तथैव वास्तविक्षः रणवाक्यस्फोटव्युत्पादनार्थम्। एषा प्रकृतिप्रत्ययादिकल्पना समाश्रिता, यत उपयस्य बोद्धव्यस्य प्रतिपत्त्यर्था ज्ञानार्था उपाया साधनानि—अव्यवस्थिता अनन्ता भवन्तीति।

तत्र कीदृश स्फोट प्रमाजनक इति जिज्ञासायां प्रसङ्गात् सर्वोऽपि प्रमा-जनकानि सङ्गत्य आप्तोपदेशरूपस्य स्फोटस्य प्रमाजनकत्व निरूपयति—तत्र प्रत्य क्षेत्यादि। तत्र लोके वेदे च यथासङ्गतमित्यर्थः। प्रत्यक्षं चक्षुरादीन्द्रियम्, अनुमानं व्याप्तिज्ञानम्, उपमानं सादृश्यज्ञानम्, शब्द प्रतीतपदार्थको ध्वनि, स्मारकसङ्केतेति द्वयम्। प्रमीयते प्रमिणोतेऽनेनेति प्रमाणम्, करणे ल्युट्। यद्वति तत्प्रकारक ज्ञानं प्रमा तत्करणानीत्यर्थः। अत्रेदं बोध्यम्—एक प्रत्यक्षमेव प्रमाणमिति चार्वाकाः, प्रत्यक्षमनुमानञ्चेति वैशेषिकाः, प्रत्यक्षमनुमानमागम इति साङ्ख्याः, प्रत्यक्षानुमानोपमानशब्दा इति नैयायिकाः, अर्थापत्त्यनुपलब्धिभ्यां सह षडिति भाट्टवेदान्तिनौ, सम्भवैतिह्याभ्यां सहाष्टाविति पौराणिकाः, चेष्टया सह नवेति आलङ्कारिका आहुः। तत्र नैयायिकमत एव प्रामाण्यं निर्दोषादर ...वि। विस्तरस्त्वन्यत्र द्रष्टव्यः। आप्तोपदेशेति—आप्तस्योपदेशः, आप्तस्य वा

इति चरके पतञ्जलि ॥ तद्धर्मावच्छिन्नविषयकशाब्दधुद्धित्वावच्छिन्न प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञान हेतु । अत एव नागृहीतवृत्तिकस्य शाब्दबोध । अत एव च नहि गुड इत्युक्ते मधुरत्व प्रकारतया गम्यत इति समर्थसूत्रभाष्य सगच्छते । गुडादिशब्देन गुडत्वजात्यवच्छिन्नो गुडपदवाच्य इत्येव बोधो जातिप्रकारक । मधुरत्व तु गुडो मधुर ऐक्षवत्वादित्यनुमानरूपमानान्तरगम्यम् । विशेष्यविशेषणभावव्यत्यासेन गृहीतशक्तिकस्य पुसो घटपदात् घटत्वविशिष्टघटबोधवारणाय साधुपदेश इति तत्रैव समासद्वय द्रष्टव्यम्, तेन वेदानामपौरुषेयत्वेऽपि न क्षति । आप्तोपदेशस्यैव शब्दस्य प्रामाण्यमित्यत्र "यस्त्वप्रमत्तगीतस्तत्प्रमाणम्" इति पस्पशाभाष्यमेव प्रमाणमिति बोध्यम् ।

ननु शब्दस्य प्रामाण्ये स्थिते घटशब्दात् पटविषयिणी प्रमा कस्मान्न जायते ? कस्माद्वा घटत्वप्रकारकघटविशेष्यकज्ञान नोत्पद्यते ? कस्माद्वा वृत्तिज्ञानशून्यस्य, विस्मृतवृत्तिकस्य वा तच्छब्दज्ञानरहितस्य वा चैत्रादेर्ज्ञानं नाविर्भवति ? कस्माच्च घटपदाश्रयत्वेनोपस्थितस्याकाशस्य जनकतयोपस्थितस्य चैत्रादेवा शब्दजन्यज्ञाने विषयतया भान न भवति ? कस्माद्वाऽगृहीतवृत्तेरपि पदान्न ज्ञानम् ? इत्याद्याशङ्का परिजिहीर्षन् शिष्यानुभवसिद्ध कार्यकारणभावमेव प्रदर्शयति—तद्धर्मेत्यादि । अत्राऽय परिष्कार —वृत्तिज्ञानशून्यस्य शाब्दबोधवारणाय शाब्दबुद्धि प्रति वृत्तिज्ञान हेतुरित्युक्ते यत्किञ्चिच्छाब्दबोधव्यक्तेर्वारणेऽपि तदितरशब्दबोधव्यक्त्यापत्तिदुर्वार । तद्वारणाय शाब्दबुद्धित्वाऽवच्छिन्न प्रति वृत्तिज्ञान हेतुरिति कथने सकलशाब्दबोधव्यक्तीनां समहेण सकलशाब्दबोधव्यक्तीः प्रति वृत्तिज्ञानस्य हेतुत्वकथनेन वृत्तिज्ञान-शून्यस्य हेत्वभावे कार्याऽभावेन पूर्वोक्त दोषनिरासेऽपि न निस्तार, घटविषयकशाब्दबुद्धित्वाऽवच्छिन्न प्रति पटनिरूपित वृत्तिज्ञानस्यापि हेतुत्वापत्ते । तद्वारणाय 'तद्विषयकशाब्दबुद्धित्वाऽवच्छिन्न प्रति तन्निरूपितवृत्तिज्ञान हेतु'रिति वाच्यम् । एवञ्च घटविषयकशाब्दबुद्धित्वाऽवच्छिन्नं प्रति पटनिरूपितवृत्तिज्ञानस्य हेतुत्वापत्तिर्न । अपि च घटपदात् समवायेनोपस्थिताकाशस्य जनकतयोपस्थितचैत्रादेश्च शाब्दबोधापत्तिर्न । किन्तु एव सत्यपि घटप्रकारकघटत्वविशेष्यकवृत्तिज्ञानादपि घटत्वप्रकारकघटविशेष्यकशाब्द-

तद्धर्मावच्छिन्नेति । ज्ञाने वृत्तिविशिष्टस्य च स्वविषयकाद्बुद्धसंस्कारसामानाधिकरण्यस्याश्रयपदविषयकत्वोभयसंबन्धेन बोध्यम् । अतो नागृहीतवृत्तिकस्य नापि विस्मृतवृत्तिकस्य नापि तत्पदमजानतो नापि घटपदाश्रयत्वेनोपस्थितसाकाङ्क्षस्य नापि जनकतयोपस्थितचैत्राद्येश्च बोधः । संस्कारकल्पिका च वृत्तिः स्मृतिरेव शाब्दबुद्धिरेव चेत्यन्यदेतत् । सा च वृत्तिर्बोधापत्तिः, एवं घटत्वप्रकारकघटविशेष्यकशाब्दबुद्धित्वाऽवच्छिन्नं प्रति घ'प्रकारकघ'त्वविशेष्यकवृत्तिज्ञानस्याऽपि हेतुत्वापत्तिः । तद्वारणाय 'तद्धर्माऽवच्छिन्नविषयकशाब्दबुद्धित्वाऽवच्छिन्नं प्रति तद्धर्माऽवच्छिन्ननिरूपितवृत्तिज्ञानस्य हेतुत्वमित्युक्ते' प्रकारीभूतधर्मस्याऽवच्छेदकत्वेन घटत्वप्रकारकघटविशेष्यकशाब्दबुद्धित्वाऽवच्छिन्नस्य घटत्वाऽवच्छिन्नविषयक शाब्दबुद्धित्वाऽवच्छिन्नतया घटत्वाऽवच्छिन्नविषयक शाब्दबुद्धित्वाऽवच्छिन्नं प्रति 'घ'त्वाऽवच्छिन्नघटो घटपदवाच्य' इत्याकारकस्य घटत्वाऽवच्छिन्ननिरूपितवृत्तिज्ञानस्यैव हेतुत्वेन 'घटाऽवच्छिन्नघ'त्वं घ'पदवाच्यम' इत्याकारकस्य घटाऽवच्छिन्नघ'त्वनिरूपितवृत्तिज्ञानस्य हेत्वाऽभावात् उक्तदोषद्वयवारणेऽपि न क्षतिः, अनुभवात्मके तादृशवृत्तिज्ञाने सत्यपि उपेक्षया वृत्तिविस्मृतघटो वृत्याश्रयीभूतपदीयज्ञानहीनस्य वा जनस्य शाब्दबोधाऽदर्शनेन हेतौ सत्यपि कार्याऽभावे हेतौ कार्येणान्वयसहचाराऽभावप्रसङ्गात् । तद्वारणाय तादृशवृत्तिविशिष्टज्ञानस्यैव हेतुत्वं वाच्यम् । यै०—स्वविषयकबुद्धसंस्कारसामानाधिकरण्यस्याश्रयपदविषयकत्वोभयसम्बन्धेनेति । तथा च मूलोक्त कार्यकारणभावो युक्त एव । अत्र शिष्टानुभव, 'नहि गुड इत्युक्ते मधुरत्व प्रकारतया गम्यते' इति समर्थयुक्तस्य भाष्यस्य प्रमाणमितिदिक् ।

ननु संस्कारस्यातीन्द्रियत्वेनाऽप्रत्यक्षत्वेन तत्कल्पे किं मानम् ? अत आह—संस्कारकल्पिकेति—कल्पिका अनुमापिकेत्यर्थः वृत्तिस्मृतिरूपयोर्येण संस्कारेणकारणस्यानुमानमित्यर्थः । ननु वृत्तिस्मृतावेव किं मानम् ? अत आह—शाब्दबुद्धिरेव चेति । शाब्दबोधेन वृत्तिस्मरणानुमानं, वृत्तिस्मरणेन संस्कारस्यानुमानमितिभावः । अन्यदेतत् इति—नात्र कश्चित्, विषमादर इति भावः । वृत्तिरिति—तत्रत्र यत्किञ्चित्पाठ्यशुद्धान्यत्रमलम् इति ।

विधा । शक्तिर्लक्षणा व्यञ्जना च । तत्र शक्ति क पदार्थ इति चेत् ? अत्र तार्किका । अस्माच्छब्दादयमर्थोबोद्धव्य इत्याकारा इद पदमिममर्थं बोधयतित्याकारा वेश्वरेच्छा शक्ति लाघवात् । सैव सकेत सबध । शक्तेर्यद्यपि विषयत्वलक्षण सबध पदेऽर्थे बोधे च तथापि बोधनिष्ठजन्य तानिरूपितजनकतावत्त्वेनशक्तिविषयो वाचक शक्तिजन्यबोधविषयत्वेन

अस्मादिति—इदतु सग्रहग्रन्थगम्, 'दण्डात् घटो बोद्धव्य' दण्डपदा त्तटो बोद्धव्य' इत्यादिविशेषाकारैवेच्छा विनिगता, अन्यथाऽतिप्रसङ्गात् । इद शब्दार्थस्याऽभेदेन शब्दपदार्थेऽन्वय, शब्दपदोत्तरपञ्चम्या जन्यत्वमर्थ, तत्र प्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनाऽन्वय, जन्यत्वस्य च बुधधातुर्थबोधे स्वरूपसम्बन्धेनाऽन्वय, बोधस्य च निरूपितत्वसम्बन्धेन तव्यप्रत्ययार्थ-विषयतायामन्वय, विषयतायाश्च स्वरूपसम्बन्धेन अर्थपदार्थेऽन्वयः । तथा च—इदमर्थाऽभिन्नशब्दनिरूपितजन्यतावद्बोधनिरूपितविषयतावानय इत्यर्थविशेष्यिकेच्छा । विनिगमनाविरहादाह—इद पदमिति—इदपदार्थस्य अर्थपदार्थऽभेदेनाऽन्वय, अर्थपदार्थस्य विषयतारूपाऽमर्थे निष्ठत्वसम्बन्धेनान्वय, विषयतत्वस्य च निरूपकत्वसम्बन्धेन 'बुध' धात्वर्थबोधेऽन्वय, बोधस्य च निरूपितत्वसम्बन्धेन जनकत्वरूपेप्यर्थेऽन्वय, तस्य च निरूपितत्वसम्बन्धेन आख्यातार्थे आश्रयत्वेऽन्वय, तस्य च स्वरूपेण प्रथमान्तपदपदार्थेऽन्वय, । तथा च—इदमर्थनिष्ठविषयतानिरूपकबोधनिरूपित जनकतानिरूपिताश्रयतावदिद पदमिति पदविशेष्यिका ईश्वरेच्छा । लाघवादिति शक्ति-सङ्केतयोरैक्ये हि लाघवम्, ईश्वरेच्छारूपसङ्केतात्, अन्यादृशशक्तिस्वीकारे तु पदार्थद्वयकल्पनाप्रयुक्तगौरवमिति भाव । सैव सङ्केत सम्बन्ध इति—ईश्वरेच्छैव सकेतपदवाच्य, पदपदार्थयो सम्बन्धश्चेत्यर्थ । 'यद्यपि' घटित वाक्येन शङ्कते—शक्तेर्यद्यपीति—ननूक्तेच्छाया घटकीभूता पद, जन्यजनकभाव, अर्थ, बोध, (तव्यप्रत्ययार्थ) विषयता, यथायथ सम्बन्धाश्चेतामे सर्वेऽपि पदार्था इच्छाया विषयीभूता सन्ति तथा चेच्छा विषयत्व वाच्यत्वम्, इच्छाविषयत्व वाचकत्वमिति वाच्यवाचकलक्षणेऽतिप्रसङ्ग इति शङ्कामन्याशय । मूले त्रयाणामेव पदतदर्थबोधानामिच्छाविषयत्वकथनन्तु प्राधान्याऽभिप्रायेणेतिज्ञेयम् । समाधत्ते—तथापीति । ननु वृद्धव्यवहारदर्शनेन वाक्य एव शक्तिग्रहो न तु पदे

शक्तिविषयो वाच्य इति नातिप्रसङ्ग । यद्यपि प्रथम शक्तिमहो वाक्य एव तथाप्यावापोद्वापाभ्या शास्त्रकृत्कल्पिताभ्या तत्तत्पदशक्तिमह इत्याहु ।

इति तत्र शक्तिर्नस्यादित्यत आह--यद्यपीत्यादि । आवापः = निक्षेप , उद्वाप = नि सारणम् । यथा—घटमानयेत्यत्र घटपदस्यावाप , पटमानयेत्यत्र घटपदस्योद्वाप पटपदस्यावाप इति । ननु नैयायिकानां मतेऽपि वाक्येनैवार्थसमार्तेर्वाक्यस्यैव वास्तवबोधकत्वेन यदीयशक्तिग्रहार्थमेवापोद्वापयोः कथ सत्यत्वमितिचेदाह— शास्त्रकृत्कल्पिताभ्यामिति । इत्याहुरिति—ननु ईश्वरेच्छाया 'घटशब्दा घटो बोद्धव्य ,' 'पटशब्दात्पटो बोद्धव्य' इत्यादि समूहालम्बनाऽऽकारत्वेनैवात् 'घटशब्दात्, घटो बोद्धव्य' इतीच्छीयविषयता पटेऽप्यापततीति पटोऽपि घटपदवाच्य स्यात् ! यदि आश्रयत्वसम्बन्धाऽवच्छिन्नघटपदजन्यबोधविषयत्व निष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन येश्वरेच्छा सैव शक्तिरिति नातिप्रसङ्ग, तादृशसम्बन्धेनेश्वरेच्छाया घट एव सत्त्वेन पटेऽमायादिस्युच्यते, तथापि गङ्गा पदाच्चीरबोधस्यापि जायमानत्वेन तादृशसम्बन्धनिरूपेश्वरेच्छायास्तीरेऽपि सत्त्वेन शक्त्यैव निर्वाहे लक्षणोच्छेदापत्तिरितिचेत्—न, आश्रयत्वसम्बन्धाऽवच्छिन्नगङ्गापदजन्यबोधविषयतात्वाऽनवच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपकेश्वरेच्छाया एव शक्तित्वाङ्गीकारात् गङ्गा तरतीत्यादौ तीरबोधस्याऽभावेन गङ्गायां घोष इत्यादौ तीरनिष्ठविशेष्यतायाश्च आश्रयत्वसम्बन्धाऽवच्छिन्नगङ्गापदजन्यबोधविषयतात्वाऽनवच्छिन्नप्रकारतानिरूपितत्वविरहात् इतिदिक् ।

तन्न, इच्छाया इत्यादि—सम्बन्धिनोरिति सप्तम्यन्तम्, सम्बन्धित्वेनाभिमतयोरित्यर्थ । आश्रयतानियामकत्वाऽभावेनेति—आश्रयतानियामक—(आधाराधेयभावनियामकतृत्तिनियामक-) सम्बन्धाऽभावेनेत्यर्थ । अस्य तादृशसम्बन्धेन स्थितशाऽभावेनेतिशेष , इदमेवोत्तान्वयि । तथा च आधाराधेयभावनियामकसम्बन्धावच्छिन्नाऽभावेनेच्छाया सम्बन्धित्वेनाभिमतत्वाद्योग्यो तादृशसम्बन्धेन स्थितत्वाऽभावेन सम्बन्धत्वाऽसंभवात् इति योगना पङ्क्ति । यद्यप्युद्योगनाया तु आधाराधेयभावनियामकतृत्तेर्यत्र सम्बन्धस्वीकारे 'गङ्गाः पुरुष' इत्यादौ स्वस्वामिभावादेरपि सम्बन्धाऽवच्छेदकत्वा महद्गौरव स्यात् । एवमग्रेऽपि सम्बन्धत्वरूपे आश्रयतयति

सबधो हि सबधिद्वयभिन्नत्वे सति द्विष्टत्वे च सति आश्रयतया विशिष्ट बुद्धिनियामक इत्यभियुक्तव्यवहारात्। यथा घटवद्भूतलमित्यादौ सयोग रूप सबध सम्बन्धिभ्या भिन्नो द्विष्टो घटनिरूपितसयोगाश्रयो भूतल मिति विशिष्टबुद्धिनियामकश्च नात्र तथा घटशब्द इच्छावान् तदर्थो वा इच्छावानिति व्यवहार। तस्मात्पदपदार्थयो सम्बन्धान्तरमेव शक्ति

पूर्वान्वयि, आश्रयतया आश्रयतानियामकसम्बन्धेन (आधाराधेयभावनियामक सम्बन्धेन) द्विष्टत्वे च सतीति योजना द्रष्टव्या। आधाराधेयभावनियामकेतर-सम्बन्धेन द्विष्टत्वेऽपि सम्बन्धत्व नास्तीतितात्पर्यम्। विषयतासम्बन्धेन उक्तेश्वरेच्छाया पदपदार्थयोरुभयो स्थितत्वेऽपि 'पदमिच्छावत्', 'अर्थो वा इच्छावान्' इति व्यवहारामावेन विषयताया आधाराधेयभावनियामकत्वाऽभावेन तेन सम्बन्धेन द्विष्टत्वेऽपि इच्छाया सम्बन्धत्व नेष्टमेवेति भाव। सम्बन्धलक्षणमाह—सम्बन्धो हीत्यादि—अभेदस्य तत्त्ववारणाय प्रथमसत्यन्तविशेषणम्, केवलजनकत्वादेस्त त्त्ववारणाय द्वितीयसत्यन्तविशेषणम्, तेनैव वृत्त्यनियामकसम्बन्धेन द्विष्टत्ववारणाय आश्रयतानियामकसम्बन्धेनेति। इदञ्चोपलक्षणमिति नात्माश्रय। घटपटयोर्द्वन्द्व त्वादेस्तत्त्ववारणाय विशिष्टबुद्धिनियामक इति। विशेष्यविशेषणतसम्बन्धेतिनि तयावगाहिनी बुद्धिर्निशिष्टबुद्धि। सम्बन्धपदार्थस्येदृग्लक्षणसत्वे किं मानमित्यत आह—अभियुक्तव्यवहारादिति—इत्यादिव्यवहार प्रमाणमिति भाव। सयोगरूप सम्बन्ध इति—इद परमतवासनयोक्तम्, वस्तुतस्तु सयोगस्य सम्ब न्धत्व नास्तीति सुबर्थवादे निरूपयिष्यते। इच्छाया द्विष्टत्वाऽभावमेवोपपादयति—नात्र तयेति। तस्मात्—इच्छाया सम्बन्धत्वाऽसभवात्, पदपदार्थयो सम्ब-न्धान्तरमेव शक्ति—इच्छातिरिक्तसम्बन्धविशेष एव शक्तिपदव्यवहार्य। वाच्यवाचकभाव इत्यपर पर्याया यस्या इत्यर्थ। तत्र वाच्यत्वे वाचकत्वे च न बोधविषयत्वबोधजनकत्वरूपे आत्माश्रयापत्ते, किन्त्वखण्डोपाधिरूपपदार्थान्तरे इति।

ननूक्तेश्वरेच्छाया सम्बन्धत्व मास्तु तथापि तस्या शक्तित्व कस्मात्? सम्ब न्धस्यैव शक्तित्वाङ्गीकार कस्मात्? इति चेदत्रोच्यते—

वाच्यवाचकभावापरपर्याया । तद्ग्राहकञ्चेतरेतराध्यासमूलक शाब्द

प्रयोज्यप्रयोजकवृद्धव्यवहारेण वाक्यस्यार्थबोधकत्व निश्चीयते । यथा उद्ध वृद्धेन मध्यमवृद्धमुद्दिश्य 'घटमानये'त्युक्ते घटमानयन्त मध्यमवृद्ध पश्यता बालेन 'अस्य मध्यमवृद्धस्य चेष्टा घटानयनविषयकप्रवृत्तिजन्या चेष्टात्वात् मदीयचेष्टाव इति चेष्टाकारणीभूता तदीयप्रवृत्तिरनुमीयते । तत —"अस्य मध्यमवृद्धस्य प्रवृ 'घटानयन मत्कार्यमि'तिज्ञानजन्या मदीयमन्नन्यपानादिविषयकप्रवृत्तिवत्" इत्य मानेन बालस्तदीय प्रवृत्तिकारणीभूत कार्यताज्ञानमनुमिनोति । तत —"अस्य मध्यमवृद्धस्य घटानयनकार्यताज्ञान 'घटमानये'ति' प्रयोजकवृद्धप्रयुक्तवाक्यज्ञ त्तज्ज्ञानव्यतिरेकसहचारित्वात्, यो यज्ज्ञानव्यतिरेकसहचारी स तज्जन्यो यथा दण्डा ज्ञानव्यतिरेकसहचारी घटो दण्डजन्य" इति वाक्यमेव तत्कारणत्वेन निश्चिनोति । तत आवापोद्वापाभ्यामन्वयव्यतिरेकाभ्यां पदादिष्वप्यर्थबोधकत्व निश्चीयते । तथ पदे वाक्ये वा ज्ञानजनकत्व ज्ञानकारणीभूतपदवाक्ययोर्ज्ञानविषयीभूतार्थेन सह सम्बन्ध विना नोपपद्यते, प्रमेयेन धर्मिणा सह सम्बन्धेनैव प्रमाणानां चक्षु रादीनां ज्ञानजनकत्वदर्शनात् तथा च—प्रमाणभूत शब्द प्रमेयेनार्थेन सह सम्ब धान् प्रमाणत्वात् चक्षुरादिवत्" इत्यनुमानेन कल्प्यमानो ज्ञानजनकताऽवच्छे कीभूत पदत्वाद्यया सम्बन्ध एव शक्तिरिति भवितु युक्तस्तथैवबोधजनकता ऽवच्छेदकीभूतत्वात्, बोधजनकताऽनवच्छेदकत्वेनैव शक्ते कल्पनाऽऽवश्यकत्वात् । दारेरप्याह—

इन्द्रियाणां स्वविषयग्रहणादियोग्यता यथा ।
शब्दानामर्थबोधे योग्यता तथा ॥

अस्यार्थ —यथा चक्षुरादीनां रूपादिविषयकज्ञानजनने अनादिः पुरुषप्रयत्ना-
दापन्ना योग्यता ज्ञानजनकताऽवच्छेदकरूपेण तथा शब्दानामर्थैरनादि सम्ब ध एव याग्यता ज्ञानजनकताऽवच्छेदको धर्मः शक्तिरूप इति यावत् । एतेन योग्यत पस्यैव शक्तिरित्यपि परास्तमिति द्रष्टव्यम् ।

तद्ग्राहकञ्च—शक्तिग्राहकञ्च । इतरेतराध्यासमूलकम्—इतरेतराध्या सो मूलं कारणं यस्य तत् । अध्यासो नाम अत्यन्तिन् अन्यधर्मावभास, तद्यथा धर्मि तत्सदृशक ज्ञानमिति भावः—यथा शुक्तौ 'रजतम्' इतिज्ञानम् । अध्यास

तदेव सम्बन्ध । उभयनिरूपित तादात्म्यमनुभय इत्यर्थपदयोर्व्यवहा रात् शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियामकत्वात् दीपादिगतप्रका

मूलक यथा—इदपदार्थ-(शुक्ति) रजतपदार्थयोस्तादात्म्यम्—इद रजतमिति ज्ञाने वर्तते, तथैव पदपदार्थयोरपि तादात्म्यम् अय (घटोऽर्थ) घट (घटशब्दाऽभिन) इत्यध्यासमूलकमेव नतु वास्तविकम् 'क शब्द ?' 'कोऽर्थ ?' इति प्रश्ने 'घट इत्यय शब्द' 'घट इत्ययमर्थ' इत्येकाकारोत्तरदर्शनात् शब्दार्थयोरध्याससिद्धि घट इत्याकारक ज्ञानमितिव्यवहाराच्छब्दज्ञानयोरपि स 'इति'शब्दस्य शब्दस्वरूपपरतातात्पर्यग्राहकत्वात् । अतएव 'ओमित्येकाक्षर ब्रह्म' (ब्रह्म विद्याप० २) 'बुद्धिरादैच' इति श्रुतिस्मृत्यो सामानाधिकरण्येन प्रयोग । अध्यासात्मकज्ञानविषयीभाव एवाध्यासमूलकता तादात्म्यस्य । 'सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूप' इत्यादिना पातञ्जलभाष्ये स्पष्टमिदम् । अध्यासपदार्थोऽपि ब्रह्मसूत्रशाङ्करभाष्ये स्पष्ट —'स्मृतिरूप परत्रपूर्वदृष्टावभास' इत्यादिना 'सर्वथाऽपि तु अन्यस्यान्यधर्माऽधभासता न ुयमिचरती'त्यनेन ग्रन्थेन ।

तदेव सम्बन्ध इति—तादात्म्यमेव वाच्यवाचकभावात्मकसम्बन्धद्योतकमित्यर्थ, अत्र सम्बन्ध इत्यस्य सम्बन्धद्योतकमित्यर्थात् । अत्र मञ्जूषायामय पाठ —तद्ग्राहकञ्चेतरेतराध्यासमूल तादात्म्यम् । तच्च सङ्केत । तस्यापि पदनिष्ठशक्त्युपकारकत्वाच्छक्तिरिति व्यवहारः, तस्य सम्बन्धत्वाऽभावात् । भेदाऽभेदरूपस्य तस्य तत्त्वाऽसम्भवात् । तद्घटकस्यभेदस्याऽभेदस्य वा तत्त्वाऽदर्शनात् । अभेदस्यापि तत्त्व खण्डयिष्यते ।" इति तस्मादत्रापि सम्बन्ध इत्यस्य स्थाने 'सङ्केत' इत्येव पाठ्यम्, लेखकादिप्रमादात्तयाऽपपाठो भवेत् । अथवा मदुक्तार्थ एव कार्य मञ्जूषाया सुबर्थवादेऽपि तादात्म्यस्य सम्बन्धत्वखण्डनात् । अथवा परमतयासनयेदमुक्त स्यात्, तदुक्त मञ्जूषायामेव सुबर्थवादे—'यच्चितादात्म्यस्य सम्बन्धत्व परमतवासनयोक्तम् ।' सम्बन्धत्वाऽभावेऽपि तादात्म्यस्य सम्बन्धग्राहकत्व नाऽनुपपन्न बुद्ध्यवहारादिवदितिदिक् ।

शक्तेरपीति—अस्मात्पूर्व "यत्तु पदपदार्थयोर्बोध्यबोधकभावनियामिका शक्तिरेव सम्बन्ध इति, तन्न" इति पाठस्त्रुटितो भाति मञ्जूषायां तथापाठात् । अस्यार्थ,—बोध्यबोधकभावनियामिका = बोधजनकताऽवच्छेदिका, दीपादिगत

शक्त्यशक्तावपि आलोक विषयसम्बन्धे सत्येव वस्तुप्रकाशकत्व नान्यथेति दृष्टत्वात्। तदुक्त हरिणा—

उपकार स यत्रास्ति धर्मस्तत्रानुगम्यते।
शक्तीनामप्यसौ शक्तिगुणानामप्यसौ गुण ॥ इति

उपकार इति-उपकार्योपकारकयोर्बोधशक्त्योरुपकारकभाव सम्बन्धो यत्रास्ति तत्र धर्म शक्तिरूप कार्य दृष्ट्वाऽनुमीयते। असौ सम्बन्धः शक्तीनामपि कार्यजनने उपकारक गुणानामपि द्रव्याभित्वनियामक इति हेलाराजः। स सम्बन्ध पदे वाक्ये च। तदाह यागभाष्यकार "समयज्ञानार्थं चेद् पदलक्षणाया वाचो ऽन्याख्यान व्याकरण वाक्यलक्षणाया वाचो ऽर्थलक्षणमिति"। अनेन पदेऽपि यागवे

प्रकाशकताऽवच्छेदकसामर्थ्यविशेषरूपशक्तिरिव पदगता सामर्थ्यविशेषरूपा शक्तिरेव सम्बन्धः सम्बन्धत्वेनाभिमता शक्तिरिति यत्केषाञ्चिन्मतम् तन्न युक्तम् इति। शक्तेरपि = सामर्थ्यविशेषस्यापि, कार्यजनकत्वे = प्रकाशज्ञानादिकार्यकारित्वे सम्बन्धस्यैव = सामर्थ्यातिरिक्तस्य संयोगवाच्यवाचकभावादिसम्बन्धस्यैव, नियामकत्वात् उपकारकस्यादित्यर्थः। दीपादिगतेति—दीपादिगतप्रकाशकत्वाऽवच्छेदकसामर्थ्यस्यापि घटालोकवस्तुनो संयोगादिसम्बन्धस्य सत्व एव दृष्टत्वात् प्रकृतेऽपि पदगतबोधकताऽवच्छेदकसामर्थ्यविशेषस्य नियामकं सम्बन्धान्तरमेव शक्ति वाच्य वाचकभावाख्यमिति स्वीकार्यमिति भावः। तदुक्त हरिणेति—उपकार = उपकार्योपकारकयोर्बोधसामर्थ्ययोरुपकारस्वभावो नियामक सहायको वा, वाच्यवाचकभावालोकविषययोर्यसंयोगसमवायादिः सम्बन्धो यत्र पदे दीपादौ गुणिनि चाऽस्ति, तत्र धर्मः = बोधजनकताऽवच्छेदकसामर्थ्यविशेषरूप कार्य = बोधः (शाब्दं प्रत्यक्षादि च) दृष्ट्वा, अनुमीयते कल्प्यते। अतो वाच्यवाचकभावसंयोगसमवायादि सम्बन्धः, शब्दगत-सामर्थ्यविशेषाणामपि कार्यजनने = शाब्दप्रत्यक्षादिज्ञानजनने शक्ति सहायक, गुणानां रूपादीनामपि घटादिद्रव्याभित्वनियामक इति हेलाराजोक्तो भावार्थः।

स सम्बन्ध इति—स वाच्यवाचकभावाख्य इत्यर्थः। समयज्ञानार्थम् समयः = सङ्केतः (वाच्यवाचकभावबोधकरणादन्यत्वम्पः ईश्वरेच्छारूपम्) तद्ज्ञानार्थम् पदलक्षणाया = पदरूपाया, व्याख्यानं = स्पष्टं (प्रतिपदम्

ष्वपीश्वरसमय इति स्पष्टमेवोक्तम् ॥ तस्मादितरेतराध्यास॰ सङ्केतस्तन्मू-
लक तादात्म्य च सम्बन्ध इति सङ्गतार्थ । तदुक्त पातञ्जलभाष्ये,
सङ्केतस्तु पदार्थयोरितरेतराध्यासरूप स्मृत्यात्मको योऽयशब्द सोऽर्थोयो

व्युत्पादनद्वारेणेति शेप) । इदमुपलक्षणम्—एव पदान्तादतीत्यादिना वाक्यस्यापि व्याकरणेनाऽन्वाख्यानात् । अर्थलक्षणम् = अर्थप्रतिपादकशास्त्र तर्कमीमासादि । स्पष्टमेवोक्तम् इति—एतेन वाक्यस्फोटो नैयायिकाऽसम्मत इति परास्तम् ।

तस्मादितरेतराध्यास इति तस्मात् = इच्छाया सम्बन्धत्वनिराकरणात्, इच्छात्मकसंकेतस्य सम्बन्धतो भेदप्रतिपादनाद्वेत्यर्थ । सङ्गतार्थ = प्रकरणार्थ । अत्र मञ्जूषातो विरोध तत्र सकेतस्येतरेतराध्यासमूलकत्वमुक्तम्, अत्र तूभयोरभेद इति । किञ्च 'संकेतस्तु पदपदार्थयोरितरेतराध्यासरूप' इति वक्ष्यमाणपातञ्जल-भाष्यादपि विरोधोऽत्र । तत्र रूप्यतेऽनेनेतिकरणघञन्तरूपशब्देन इतरेतराध्यासो रूप साधको यस्येति बहुव्रीहिणा, इतरेतराध्यासेन रूप्यते साध्यत इतिकर्मघञन्तरूप शब्देन तत्पुरुषसमासेन वा संकेतस्याध्यासमूलकत्वमुक्तं भवतीति मञ्जूषाया मुक्तम् । परेतु "इतरेतराध्यासः = लक्षणया इतरेतराध्यासविषय सङ्केत, तन्मूलकम् इतरेतराध्यासमूलक (सङ्केताऽभिन्न) तादात्म्यञ्च सम्बन्धः सम्बन्धग्राहकमित्यर्थ । सङ्केतस्तु द्विविध, ईश्वरेच्छारूप, तादात्म्यरूपश्च । आद्यो न्यायशास्त्रप्रसिद्धः, अन्त्य पातञ्जलभाष्यप्रसिद्ध —"सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूप स्मृत्यात्मको योऽर्थं शब्द सोऽर्थो योऽर्थं स शब्द" इति । अत्र 'योऽर्थं शब्द' इत्यादिना तादात्म्यमेव प्रदर्शितम् । द्विविधोऽप्यय शक्तिग्राहक । तदुक्त पात ञ्जलभाष्ये 'तस्य वाचक प्रणव' इति सूत्रे—"स्थितोऽस्य वाच्यस्य वाचकेन सम्बन्ध, सङ्केतस्तु ईश्वरस्य स्थितमेवार्थमभिनयति, यथाऽवस्थित पितापुत्रयो सम्बन्ध सङ्केतेनाऽवद्योत्यते 'अयमस्य पिता' 'अयमस्य पुत्र', इति । व्याख्याय मञ्जूषाया विरोध परिहरन्ति । केचितु—अत्र क्लिष्टकल्पनया । अध्यासाऽभिन्नत्व मेव सङ्केतस्य । पातञ्जलेऽपि इतरेतराध्यासरूप इत्यस्य इतरेतराध्यासो रूप स्वरूपम् आत्मा यस्येति प्रसिद्ध एवाऽर्थ । सङ्केतमूलकत्वमेव तादात्म्यस्य, नतु सङ्केतरूपत्वम् । मञ्जूषाविरोधोऽप्यकिंचित्कर इत्याहु । अत्र पण्डिता एव प्रमा णम् । स्मृत्यात्मक इति—स्मृतौ आत्मा स्वरूप यस्य स, स्मृतिविषय इत्यर्थ ।

व्यवहारस्य तुल्यत्वाद्व्यवहारदर्शनेन च पूर्वंजन्मानुभूतशक्तिस्मरणम्। अत एव बालाना तिरश्चा चाविवयबोध । न हि तेषा तदैव तत्सम्भव । यदु ताकिका —असाधुशब्देन साधुस्मरणद्वारार्थबोध इत्याहुस्तन्न । साधुस्मरण विनापि बोधानुभवात् तद्वाचकसाधुशब्दमजानता बोधानापत्तेश्च । न च शक्तिभ्रमाद्बोधोऽसाधुशब्देभ्यिति वाच्यम् । निस्सन्देहप्रत्ययस्य बाधकं विना भ्रमत्वायोगात्। अत एव स्त्रीशूद्रबालादीनामुच्चरिते साधार्थे सशये तदपभ्रशेनार्थनिर्णय । अत एव समानायामर्थावगतौ शब्देभ्य शब्देभ्यश्च शास्त्रेण धर्मनियम इति भाष्यम्,"वाचकत्वाविशेषेऽपि नियम पुण्य पापयो ' इति हरिकारिका च सङ्गच्छते । अत एवार्यम्लेच्छाधिकरण सङ्ग च्छते । तत्र हि यद्यपि आर्या यवशब्द दीर्घशूके प्रयुञ्जते म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते तमेव च बुध्यन्ते तथाप्यायप्रसिद्धेर्बलवत्त्वात् वेदे दीर्घशूकपरत्वे वेति सिद्धान्तितम । एव तु म्लेच्छबोधस्य शक्तिभ्रममूलकत्वेन भ्रान्ति विषयकरजतज्ञानस्येव म्लेच्छप्रसिद्धेर्बलसाधकतयार्यम्लेच्छप्रसिद्ध्यो करया बलवत्त्वमिति विचारासगति स्पष्टैव। साधुत्व च व्याकरणान्वाख्ये यत्व पुण्यजनकतावच्छेदक धर्मवत्त्व वा । तद्भिन्नत्वमसाधुत्वम् । सा च

कालिकत्वेनान्तरङ्गत्वमूलकम् । प्रयोज्यप्रयोजकवृद्धव्यवहारस्य यथा शक्तिग्रहकत्वं तथा प्राक् प्रदर्शितम् । अयं व्यवहार पूर्वानुभूतशक्तिस्मारक एव, शक्तेरनुमाप कस्तु अस्माच्छब्दादित्याकारकस्मार्चेच्छैवरूपोपदेश एव । एवञ्च आप्तबोधकाले बालाना सादृश्यसङ्केतोपदेशप्रदर्शनाऽभावाच्छक्तेरनुमेयता नास्ति, किन्तु पूर्व जन्मावधनुभूतशक्तिस्मरणमेव व्यवहारदर्शनरूपोद्बोधकयत्नादिति केचिन्मतम्। तन्मतेनैव ग्रन्थमवतारयति—व्यवहारदर्शनेनेत्यादि । तदैव = आप्तबोधकाले एव । तत्सम्भव = शक्त्यनुभवसम्भव ।

अत्र वार्षिका व्युत्पन्नानामपभ्रंशेन साधुशब्दस्मरणादव्युत्पन्नाना तदैव शक्ति भ्रमाद्बोधो भवति, अनभ्रंशेषु शक्तिर्नास्तीति यदन्ति तदेतन्मतो निराकरोति— यस्त्वित्यादिना । पुण्यजनकताऽवच्छेदकेति—साधुशब्दानो पुण्यजनकत्वन्न "समानायामर्थावगतौ शब्देभ्यश्चैव शास्त्रेण धर्मनियम" इत्यादिना पतञ्जलिप्रदर्शिते महाभाष्ये स्पष्टम्। अतएव भाष्यात् अनभ्रंशे शक्तेः स्वीकारमपि ।

शक्तिस्त्रिधा। रूढियोगो योगरूढिश्च। शास्त्रकल्पितावयवार्थभानाभावे समुदायार्थनिरूपितशक्ती रूढि ,यथा मणिनूपुरादौ। शास्त्रकल्पितावयवार्थनिरूपिता शक्तियोग ,यथा पाचकादौ। शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपिता शक्तियोगरूढि , यथा पङ्कजपदे पङ्कजनिष्कर्तृपद्ममिति बोध । पङ्केऽनुपपत्तिप्रतिसन्धान सम्बन्धप्रतिसन्धान च विना न लक्षणावसर । क्वचित् तात्पर्य्यग्राहकवशात्केवलरूढ्यर्थस्य केवलयोगार्थस्य बोध। भूमौ पङ्कजमुत्पन्न कलारकैरवमुत्पेष्यपि पङ्कजेऽस्त्यादौ, स्पष्टं चेदमार्हादितिसूत्रे भाष्ये। अश्वगन्धादिपदमोषधिविशेषे रूढम्। अश्वस्येवगन्धवत्तया वाजिशालाबोधे यौगिकम्। इद यौगिकरूढमित्युच्यते। एव मण्डपपद प्रहविशेषे रूढ मण्डपानकर्त्तरि यौगिकम्। सैषा शक्ति सयोगादिभिर्नानार्थेषु नियम्यते। तदुक्त हरिणा—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरण लिङ्ग शब्दस्यान्यस्य सन्निधि॥
सामर्थ्यमौचिती देश कालो व्यक्ति स्वरादय ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव ॥ इति।

ननु पङ्कजपदे लक्षणया पद्मबोधोऽस्तु कृत योगरूढिकल्पनयेत्यत आह—पङ्केऽनुपपत्तीत्यादि । योगरूढिर्द्विधा-अशतो योगार्थबोधकत्वे सति अशतो रूढ्यर्थबोधिका प्रथमा, यथा 'पङ्कज' पदे। केवलयोगार्थबोधिनी केवलरूढ्यर्थबोधिनी वा द्वितीया, यथा तत्रैव पदे। तदाह—क्वचिदित्यादि । नचात्र केवलपद्मबोधकाले रूढिरेव केवलपङ्कोत्पन्नबोधकाले योग एवेतिवाच्यम् नानार्थतापत्ते, मम तु तात्पर्यग्राहकवशादेका योगरूढिरेव तादृग्बोध निर्वाहयतीति क्षतिनास्ति। आर्हादितिसूत्रे भाष्ये—तत्र हि सर्वतो मानार्थकस्य 'परिमाण' शब्दस्य प्रत्यादौ योगरूढिरित्युक्त्वा 'तदस्य परिमाणम्' इत्यादौ विशेष्यविशेषणभावानुपपत्तिमाशङ्क्य 'वचनादीयती विवक्षा भविष्यती'त्युक्तम्। रूढिपरित्यागेन परिच्छेदकत्व मात्रमाश्रयिष्यत इति तद्भाव ।

शक्तिभेदानिरूप्य तत्तात्पर्यनिर्णायकानाह—सयोगेति । अत्र सामर्थ्यमेवैव मुख्य निर्णायक सयोगादयस्तद्व्यञ्जकमयञ्च ते सामर्थ्यस्यैवाऽभिव्यक्तेरिति परे।

व्यवहारस्य तुल्यत्वाद्व्यवहारदर्शनेन च पूर्वजन्मानुभूतशक्तिस्मरणम्। अत एव बालाना तिरश्चा चाप्ययबोध । न हि तेषा तदैव तत्सम्भव'। यत्तु तार्किका —असाधुशब्देन साधुस्मरणद्वारार्थबोध इत्याहुस्तन्न। साधुस्मरण विनापि बोधानुभवात्। तद्वाचकसाधुशब्दमजानता बोधानापत्तेश्च। न च शक्तिभ्रमाद्बोधोऽसाधुशब्देऽपीति वाच्यम् । निस्सन्देहप्रत्ययस्य बाधकं विना भ्रमत्वायोगात्। अत एव स्त्रीशूद्रबालादीनामुच्चरिते साधावर्थ सशये तदपभ्रशेनार्थनिर्णय । अत एव समानायामर्थावगतौ शब्दैश्चाप शब्दैश्च शास्त्रेण धर्मनियम इति भाष्यम्,"वाचकत्वाविशेषेऽपि नियम पुण्य पापयो ' इति हरिकारिका च सङ्गच्छते । अत एवार्यम्लेच्छाधिकरण सङ्ग च्छते । तत्र हि यद्यपि आर्या यवशब्द दीर्घशूके प्रयुञ्जते म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते तमेव च बुध्यन्ते तथाप्यार्यप्रसिद्धेर्बलवत्त्वात् वेदे दीर्घशूकपरत्वे वेति सिद्धान्तितम् । तव तु म्लेच्छबोधस्य शक्तिभ्रममूलकत्वेन भ्रान्ति विषयकरजतज्ञानस्येव म्लेच्छप्रसिद्धेर्बाधकत्वेनार्यम्लेच्छप्रसिद्ध्यो कस्या बलवत्त्वमिति विचारासगति स्पष्टैव। साधुत्व च व्याकरणवाक्ये यत्व पुण्यजनकताऽवच्छेदकधर्मवत्त्व वा । तद्भिन्नत्वमसाधुत्वम्। सा च

कालिकत्वेनान्तरङ्गत्वमूलकम् । प्रयोज्यप्रयोजकवृद्धव्यवहारस्य यथा शक्तिग्राहकत्व तथा प्राक् प्रदर्शितम्। अयं व्यवहार पूर्वानुभूतशक्तिस्मारक एव, शक्तेरनुभाव कस्तु अस्माच्छब्दादित्याद्याकारकस्मार्तसङ्केतरूपोपदेश एव। एवञ्च आद्यबोधकाले बालानां तादृशसङ्केतोपदेशग्रहणाऽभावाच्छक्तेरनुभवो नास्ति, किन्तु पूर्व जन्मान्तरानुभूतशक्तिस्मरणमेव व्यवहारदर्शनरूपोद्बोधकवशादिति केषाञ्चिन्मतम्। तन्मतेनैव ग्रन्थकृन्निरूपयति—व्यवहारदर्शनेनेत्यादि । तदैव = आद्यबोधकाल एव। तत्सम्भव = शक्त्यनुभवसभव ।

अत्र तार्किका व्युत्पन्नानामपभ्रशेन साधुशब्दस्मरणाद व्युत्पन्नानां तत्रैव शक्ति भ्रमाद्बोधो भवति, अपभ्रशेषु शक्तिर्नास्तीति वदन्ति तदेतत्क्रमशो निराकरोति—यत्त्वित्यादिना । पुण्यजनकताऽवच्छेदकेति—साधुशब्दानां पुण्यजनकत्वन्तु "समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियम" इत्यादिना पस्पशाह्निके महाभाष्ये स्पष्टम्। अतएव भाष्यात् अपभ्रशे शक्ते स्वीकारोऽपि।

शक्तिस्त्रिधा। रूढियोगो योगरूढिश्च। शास्त्रकल्पितावयवार्थभानाभावे समुदायार्थनिरूपितशक्ती रूढि ,यथा मणिनूपुरादौ। शास्त्रकल्पितावयवार्थनिरूपिता शक्तियोग ,यथा पाचकादौ। शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपिता शक्तियोगरूढि , यथा पङ्कजपदे पङ्कजनिकर्तृपद्ममिति बोध। पद्मेऽनुपपत्तिप्रतिसन्धान सम्बन्धप्रतिसन्धान च विना न लक्षणावसर। क्वचित् तात्पर्यग्राहकवशात्केवलरूढ्यर्थस्य केवलयोगार्थस्य बोध। भूमौ पङ्कजमुत्पन्न कलारकैरवमुखेष्वपि पङ्कजेष्वित्यादौ, स्पष्टं चेदमार्हादितिसूत्रे भाष्ये। अश्वगन्धादिपदमोषधिविशेषे रूढम्। अश्वसम्बन्धिगन्धवत्तया वाजिशालाबोधे यौगिकम्। इद यौगिकरूढमित्युच्यते। एव मण्डपपद ग्रहविशेषे रूढ मण्डपानकर्त्तरि यौगिकम्। सैषा शक्ति सयोगादिभिर्नानार्थेषु नियम्यते। तदुक्त हरिणा—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थ प्रकरण लिङ्ग शब्दस्यान्यस्य सन्निधि॥
सामर्थ्यमौचिती देश कालो व्यक्ति स्वरादय।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव ॥ इति।

ननु पङ्कजपदे लक्षणया पद्मबोधोऽस्तु कृत योगरूढिकल्पनयेत्यत आह—पद्मेऽनुपपत्तीत्यादि। योगरूढिद्विधा-अशतो योगार्थबोधकत्वे सति अशतो रूढ्यर्थबोधिका प्रथमा, यथा 'पङ्कज' पदे। केवलयोगार्थबोधिनी केवलरूढ्यर्थबोधिनी वा द्वितीया, यथा तत्रैव पदे। तदाह—क्वचिदित्यादि। नचात्र केवलपद्मबोधकाले रूढिरेव केवलपङ्कोत्पन्नबोधकाले योग एवेतिवाच्यम् नानार्थतापत्ते, मम तु तात्पर्यग्राहकवशादेका योगरूढिरेव तादृग्बोध निर्वाहयतीति क्षतिनास्ति। आर्हादितिसूत्रे भाष्ये—तत्र हि सर्वतो मानार्थकस्य 'परिमाण' शब्दस्य प्रस्थादौ योगरूढिरित्युक्त्वा 'तदस्य परिमाणम्' इत्यादौ विशेष्यविशेषणभावानुपपत्तिमाशङ्क्य 'वचनादीयती विवक्षा भविष्यती'त्युक्तम्। रूढिपरित्यागेन परिच्छेदकत्व मानमाश्रयिष्यत इति तद्भाव।

शक्तिभेदानिरूप्य तत्तात्पर्यनिर्णायकानाह—सयोगेति। अत्र सामर्थ्यमेवैक मुख्य निर्णायक सयोगादयस्तद्व्यञ्जकमपञ्च तै सामर्थ्यस्यैवाऽभिव्यक्तेरिति परे।

एते सयोगादयो नानार्थेषु शब्देषु शब्दार्थस्यानवच्छेदे सन्देहे तदपाकरणद्वारा विशेषार्थनिर्णायका इति तदर्थं । सयोगविप्रयोग योरुदाहरणे सवत्सा धेनुरवत्सा धेनुरिति । साहचर्यस्य रामलक्ष्मणा विति,साहचर्यं सादृश्य सदृशयोरेव सम्प्रयोगनियमात् । रामार्जुनगतिस्त योरित्यत्रविरोधेन तत् । अञ्जलिना जुहोति,अञ्जलिना सूर्यमुपतिष्ठत इत्यत्र जुहोतीत्यादिपदार्थवशादञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वम् । सैन्धव मानयेत्यादौ प्रकरणेन तत् । अक्ता शर्करा उपदधातीत्यादौ तेजो वै घृत स्तुतिरूपाभिज्ञादक्ता इत्यस्य घृतसाधनाञ्जनपरत्वम् । रामो जामदग्न्य इति जामदग्न्यपदसन्निधानाद्रामः परशुरामः । अभिरूपाय कन्या देया इत्यादौ अभिरूपतरायेति सामर्थ्यात् प्रतीयते ।

यश्च निघ्न परशुना यश्चैन मधुसर्पिषा ।
यश्चैन गन्धमाल्याद्यै सर्वस्य कदुरेव स ॥

इत्यत्रौचित्यात् परशुनेत्यस्य छेदनार्थत्वम्, मधुसर्पिषा इत्यस्य सेच नार्थत्वम्, गन्धमाल्याद्यैरित्यस्य पूजनार्थत्वम् । मात्यत्र परमेश्वर इत्यत्र राजधानीरूपदेशात्परमेश्वरपदं राजबोधकम् । चित्रमानुर्भातीत्यादौ रात्रावग्नौ दिवा सूर्ये । व्यक्तिलिङ्गम् । मित्रो भाति मित्र मातीत्यादायादौ सूर्योऽन्त्ये सुहृत् । स्थूलपृषतीमित्यादौ स्वरात्तत्पुरुषग्रहणीहार्थनिर्णय । इति शक्तिनिरूपणम् ॥

ननु लक्षणा क पदार्थ इति चेत् ? अत्र तार्किका:, स्वशक्यसम्बन्धो

रामलक्ष्मणावित्यादौ साहचर्येणान्ययोर्युगपदेव नियमनमिति नाऽन्योन्याश्रय । स्वरादय इत्यादिना पत्वसत्वणत्वनत्वादि । सुपिक्तमित्यत्रोपसर्गो निन्दार्थं, सुसिक्तमित्यत्र पूजार्थ । प्रणायक प्रणयनक्रियाकर्ता, प्रनायक प्रगतनायको देव इति पुञ्जराज । सदरत्नाकरन्यासग्रन्थे भाष्येऽपि स्फुटमेवत् । इति शक्तिवाद: ।

शक्तिनिरूपणानन्तर लक्षणानिरूपणे सङ्गतिं सूचयितु सङ्गतिपदार्थघटकीभूत जिज्ञासामादौ प्रदर्शयति-ननु लक्षणेति । इदमत्र बोध्यम्—अनर्थकत्वापलपित्वा दिदोषनिरासद्वारेण मेधाविजनवोधयत्वनत्वाय निरूपणीयताऽवच्छेदकाऽवच्छेदे

लक्षणा । सा च द्विधा । गौणी शुद्धा च । स्वनिरूपितसादृश्याधिकरणत्व-सम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी । तदतिरिक्तसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका शुद्धा । प्रकारान्तरेणापि सा द्विविधा । अजहत्स्वार्था जहत्स्वार्था च । स्वार्थसबलितस्वरार्थाभिधायिकाऽज

सङ्गतिमत्त्वस्याऽऽवश्यकतया यन्निरूपणानन्तर यन्निरूप्यते तस्मिन् तन्निरूपित सङ्गतिमत्त्वप्रदर्शनमावश्यकमेव भवति । सङ्गतिपदार्थश्च—अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वम् । अत्र जिज्ञासाजनकज्ञानविषयत्वञ्च—जिज्ञासा जनकीभूतेष्टसाधनत्वप्रकारकज्ञानीयज्ञाननिष्ठविशेष्यतानिरूपितविषयित्वसम्बन्धाऽव च्छिन्नाऽवच्छेदकतानिरूपिताऽवच्छेदकतारूप विवक्षितम् । जिज्ञासा च सगतित्वव्याप्य धर्मवत्प्रकारिका ग्राह्या, तत्तत्सगतिप्रकारिका 'उपेक्षानर्हज्ञान जायताम्' 'उपपादक-ज्ञानं जायताम्' इत्याद्याकारिकेति यावत् । तज्जनकज्ञानञ्च-'उपेक्षानर्हज्ञान मदिष्टसा धनम्' 'उपपादकज्ञान मदिष्टसाधनमि'त्याद्याकारकम् । तादृशज्ञानीयज्ञाननिष्ठविशेष्य-तानिरूपितविषयित्वसम्बन्धाऽवच्छिन्नाऽवच्छेदकता उपेक्षानर्हादिनिष्ठा, तन्निरूपिताऽ वच्छेदकतोपेक्षानर्हत्वादाविति लक्षण-समन्वय । सा च सङ्गति पोढा । तदुक्तम्—

सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा ।
निर्वाहैकैक्यकार्यैक्ये पोढा सङ्गतिरिष्यते ॥ इति ।

तत्र—स्मृतिकालाऽवच्छिन्नोपेक्षानर्हताऽवच्छेदकधर्मवत्त्व प्रसङ्ग, प्रकृतसिद्ध्य नुकूलचिन्ताकालाऽवच्छिन्नप्रकृताऽनुकूलत्वमुपोद्घात । उपजीव्योपजीवकभावो हेतुता, प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिकालाऽवच्छिन्नाऽवश्यवक्तव्यत्वमवसर, एकप्रयोजकप्रयोज्यत्व निर्वाहैक्यम्, एककार्यानुकूलत्व कार्यैक्यम्, इत्याद्यन्यत्र विस्तर । प्रकृते च शक्तिनिरूपणेन प्रतिबन्धकीभूतशिष्यजिज्ञासाया निवृत्तौ लक्षणाया पूर्वोद्देशवाक्यानुसारमवश्यवक्तव्यत्वारयाऽवसरसङ्गतिरेवेत्यलम् ।

स्वशक्येति—लाक्षणिकत्वेनाभिमत पद स्व, यथा 'गङ्गाया घोष' इत्यत्र गङ्गापदम्, तच्छक्यो प्रवाहातिरिक्तप्रवाहः तत्सम्बन्ध सामीप्यं तारे इति स एष सम्बन्धो लक्षणा । यद्यपि सामीप्यमाश्रयत्वसम्बन्धेन तीरेऽस्ति न गङ्गापदे तथापि स्वप्रतियोगिवाचकत्वसम्बन्धेन गङ्गापद एवेति द्रष्टव्यम् । स च लक्षणाभूतः सम्बन्धोऽनेकस्तथापि प्रसिद्धा पञ्च—तात्स्थ्यम्, तादर्म्यम्,

हत्वार्था तेन छत्रिणो यान्ति, कुन्ता प्रवेशय, यष्टी प्रवेशय,काकेभ्यो दधि रक्ष्यतामित्यादौ छत्रिसहितसेना कुन्तास्त्रसहितपुरुष-यष्टिसहितपुरुष काक सहितसर्वदध्युपघातकबोध स्वार्थपरित्यागेनेतराथाभिधायिकान्या । तत्परित्यागश्च शक्यार्थस्य लक्ष्यार्थान्वयिनाऽनन्वयित्वम् । तेन गां वाहीक पाठयेत्यादौ गोसदृशलक्षणायामपि न गोस्तदन्वयिपाठनक्रियान्वयित्वम् । सा च लक्षणा तात्स्थ्यादिनिमित्तिका । तदाह—

तात्स्थ्यात्तथैव ताद्धर्म्यात्तत्सामीप्यात्तथैव च ।
तत्साहचर्यात्ताद्रर्थ्याज् ज्ञेया धैं लक्षणा बुधै ॥ इति ।

तात्स्थ्यान्मञ्चा हसन्ति, ग्राम पलायित । ताद्धर्म्यात्सिंहो माणवक गौर्वाहीक । तत्सामीप्याद्गङ्गाया घोष । तत्साहचर्याद्यष्टी प्रवेशय । तादर्थ्यादिन्द्रार्था स्थूणा इन्द्र । अन्वयाद्यनुपपत्तिप्रतिसन्धानञ्च लक्षणाबीजम् । वस्तुतस्तु तात्पर्यानुपपत्तिप्रतिसन्धानमेव तद्बीजम् । अन्यथा गङ्गाया घोष इत्यादौ घोषादिपदे एव मकरादिलक्षणापत्तिस्तावताप्यन्वयानुपपत्तिपरिहारात् । गङ्गाया पापी गच्छतीत्यादौ गङ्गापदस्य नरके लक्षणापत्तेश्च । अस्माकं तु भूतपूर्वपापायच्छिन्नलक्षकत्वे तात्पर्यान्न दोष । नक्षत्रं दृष्ट्वा याच विसृजेदित्यत्रान्वयसम्भवेपि तात्पर्यानुपपत्त्यैव लक्षणा स्वीकारात् । एकानुगमकस्वीकारेण निर्वाहेऽनेकानुगमकस्वीकारे गौरवाच्च । विशिष्टार्थबोधकशब्दस्य पदार्थैकदेशे लक्षणाया जहदजहल्लक्षणेति व्यवहरन्ति वृद्धा । वाच्यार्थे किञ्चिदंशत्याग किञ्चिदंशपरिग्रहश्च । अत्र ग्रामैकदेशे पटैकदेशे च दग्धे ग्रामो दग्ध पटो दग्ध इति व्यवहार । तत्त्वमसीत्यत्र सर्वज्ञत्वाल्पज्ञत्वयोस्त्याग शुद्धचैतन्ययोरभेदान्वय ।

तत्सामीप्यम्, तत्साहचर्यम्, तादर्थ्यञ्चेति । तदाह—तात्स्थ्यात्तथैवेति । स्वस्मिन् स्वनिमित्तत्वमारोप्याऽत्र सर्वत्र पञ्चमी बोध्या । वस्तुतस्तु स्वार्थ एव पञ्चमीविधय माणव्याख्यानेन स्फुटीभविष्यति । अन्वयाद्येति—आदिना तात्पर्याऽनुपपत्तिग्रहः । वस्तुतस्तु तात्पर्यात् तात्पर्याऽनुपपत्तिप्रतिसन्धानमेव लक्षणाबीजम्, तदाह—वस्तुत इति । ग्रामैकदेशा इति—अथ व्यवहाराऽप्रयत्नसाध्यत्वात्तत्र दग्धादिशब्दानामर्थे आयत्तत्वेन 'दग्धग्रहमिश्रिता ग्राम' इति वाचे शब्देनोक्तम

स्वबोध्यसम्बन्धो लक्षणेति केचित्। गभीराया नद्या घोष इत्याद्यनुरोधात्। तथा हि न तावद्गभीरपद तीरलक्षक नद्यामित्यनन्वयापत्ते । न हि तीर नदी अत एव न नदीपदेऽपि गभीरपदार्थानन्वयात्। न हि तीर गभीरम्। न च प्रत्येक पदद्वये सा, विशिष्टनदीबोधानापत्ते । तस्मा त्समुदायबोध्य गभीरत्वविशिष्टनदीपदार्थ तत्सम्बन्धो लक्षणेति। द्विरेफपदस्य स्वलक्ष्यभ्रमरशब्दवाच्यार्थे लक्षणाया लक्षितलक्षणेति व्यवहार । स्वबोध्यपदवाच्यत्व सम्बन्ध । प्रकारान्तरेण पुनर्लक्षणा द्विधा। तथा हि प्रयोजनवती निरूढा लक्षणा द्विविधा मता इति। असति प्रयोजने शक्यसम्बन्धो निरूढलक्षणा। त्वचा ज्ञानमित्यादौ यथा त्वचस्त्वगिन्द्रिये। इय तु शक्त्यपरपर्यायैवेति बोध्यम्। गङ्गाया घोष इत्यत्र तीरे गगागतशैत्यपावनत्वादिप्रतीति प्रयोजनम्। गौर्वाहीक इत्यत्र सादृश्य लक्ष्यतावच्छेदक गवाभेदप्रत्यय प्रयोजनम्। कुन्ता प्रविशन्तीति भीति पलायमानवाक्ये कुन्तविशिष्टपुरुषे कुन्तगततैक्ष्ण्यप्रतीति प्रयोजनमित्याहु।

इति परे। स्वबोध्येति—एतन्मते वाक्यशक्त्यनभ्युपगमेन शक्यपदस्थाने बोध्य पदनिवेश आवश्यक । केचित्=मीमांसका इत्यर्थ । द्विरेफ इति—द्वौ रेफौ यस्मिन्निति बहुव्रीहौ तार्किकमते एकार्थीभावानभ्युपगमेन शक्त्या रेफद्वयमात्रस्यैव बोध, लक्षणया रेफद्वयघटितभ्रमरशब्दस्य बोध, इति स्वलक्ष्यो भ्रमरशब्दस्तस्य वाच्यार्थे या लक्षणा सा लक्षितलक्षणेति। य शक्यार्थस्य परम्परासम्बन्ध स्व घटितपदवाच्यत्वरूप सा लक्षितलक्षणेति तत्त्वम्। परे तु नाऽत्र लक्षणा, रूढि शक्त्यैव रथन्तरादिवत् बोधात्। अतएव कोशेऽपि भ्रमरशब्दपर्याये तत्पाठ, न हि लाक्षणिकानां तत्र पाठ इत्यामनन्ति। इत्याहुरिति—मञ्जूषाकर्तारस्तु स्व-शक्यताऽवच्छेदकारोप एव लक्षणेति व्यवहार । अत एव प्रयोगादाख्यातामितिसूत्रे भाष्ये—"चतुर्भि प्रकारैरतस्मिन् स इत्येतद्भवति तात्स्थ्यात्, तादर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात्। 'मञ्चा हसन्ति' 'सिंहो माणवक' 'गङ्गाया घोष,' 'यष्टी प्रवेशय' इत्युक्तम्। गौतमोऽप्याह—"सहचरण-स्थान-तादर्थ्य-वृत्त मान-धारण सामीप्य-योग-साधनाधिपत्येभ्यो ब्राह्मण बाल-कट राज-सक्तु-चन्दन-गङ्गा शकटान-पुरुषेष्वतद्भावेऽपि तदुपचार" इति। तदुपचार=तच्छब्दव्यवहार, स च तद्धर्मा

तन्न । सति तात्पर्ये 'सर्वैसर्वार्थवाचका'इति भाष्यालक्षणाया अभावात् ।

रोपे । आरोपनिमित्तानि च सहचरणादीनि । यष्टी प्रवेशय, मञ्चा क्रोशन्ति, वीरणेष्वास्ते, अयं राजा यम , अस्य सक्तु , चन्दन सुखा, गङ्गायां घोष , कृष्ण शकटः, अग्न प्राणा , अयं कुलस्य राजा, इत्युदाहरणानि । यष्टित्वारोपो ब्राह्मणे साहचर्यादित्यादानि तद्व्याख्यातानि । शक्यताऽवच्छेदकप्रकारक एव बोध । अतएव गङ्गायां मीनघोषौ इति द्वन्द्वस्य साधुत्वम् । परमते मीनस्य नीरत्वाऽवच्छिन्ने घोषस्य तीरत्वाऽवच्छिन्नेऽन्वयेन एकधर्माऽवच्छिन्नेऽन्वयरूपसाहित्यस्याभावेन द्वन्द्वोऽसाधुरेव स्यात् । मम तु गङ्गात्वेनैव तीरबोधादेकधर्माऽवच्छिन्नेऽन्वयसत्त्वेन न क्षति । अतएव च नीरे शैत्यपावनत्वादिप्रतीतिर्व्यञ्जनावृत्त्याऽलङ्कारिकाणाम् । अत्र सर्वत्र तद्धर्मविशिष्टे शक्यताऽवच्छेदकधर्मारोप । अतएव 'कच तत्रास्यति यदनमि'त्यादौ कचत्वादिना राहुत्वादिविशिष्टस्य बोधात् मासाद्यन्वयाऽनुपपत्तिरित्यामनन्ति । सोऽयमारोपो लक्षणाभूत स्वकर्माऽवच्छिन्नवाचकत्व सम्बन्धेन लाक्षणिकत्वेनाभिमतपदे तिष्ठतीति द्रष्टव्यमित्यलम् ।

सर्वैसर्वार्थवाचकेति—वाचका इत्यस्य शक्त्या बोधजनका इत्यर्थ, तेन लक्षणाया अभाव पर्यवसति । नन्वेवं व्यञ्जनाया अप्यभावः स्यात्, न चेष्टापत्तिरितिवाच्यम्, वैयाकरणानामप्येतत्स्वीकार आवश्यक इति यदयमाणग्रन्थेन विरोधादितिचेत्—न, उक्तभाष्ये सति तात्पर्य इति विशेषणात्, तात्पर्यग्रैश्वरं देवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादिभिर्लब्धमिति यदयमाणत्वाद्व्यङ्ग्यार्थे शक्तिग्राहकव्यवहाराऽभावेन ताद्दशपरम्परातोऽस्मदादिभिर्लब्धत्वाऽभावेन तदर्थे तात्पर्याऽभावानुमानात् । इति भाष्यादिति—अत्रत्यमिद भाष्यमित्यन्वेषणीयम् । योगाचस्पत्येत्त्वेव दृश्यते—"सर्वे च शब्दा सत्तायाऽभिधानसमर्था, इति सर्वैसर्वैषां शब्दानां सम्बन्ध, ईश्वरसङ्केतस्तु प्रकाशक, अतएव नित्य शब्दार्थसम्बन्ध इति वार्त्तिका" इति तन्नोक्तम् । तत्र वार्त्तिक इत्यस्य वैयाकरणा इत्यर्थ । वाक्यपदीयस्यैव कारिका, पूर्णा यथा—

"नित्या शब्दार्थसम्बन्धा समाम्नाता महर्षिभि ।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभि ॥" इति ।

वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवाऽजघन्यवृत्ति कल्पनाया अन्याय्यत्वाच्च। कथ तर्हि गङ्गादिपदात्तीरप्रत्यय ? भ्रान्तोसि ! सति तात्पर्ये सर्वे सर्वार्थवाचका इति भाष्यमेव गृहाण। तथाहि। शक्तिर्द्विविधा। प्रसिद्धाऽप्रसिद्धा च। आमन्दबुद्धिवेद्यात्व प्रसिद्धात्वम्। सहृदयमात्राऽवेद्यात्वम प्रसिद्धात्वम्। तत्र गङ्गादिपदाना प्रवाहादौ प्रसिद्धा शक्ति तीरादौचा प्रसिद्धेति किमनुपपन्नम्। ननु यदि सर्वे सर्वार्थवाचका इति चेद्मूपे तर्हि घटपदात्पटप्रत्यय किन्नस्यादितिचेन्न। सति तात्पर्ये इत्युक्तत्वात्तात्पर्याभावादिति गृहाण। तात्पर्यं चात्र ऐश्वर देवतामहर्षिलोकवृद्ध परम्परातोऽस्मदादिभिर्लभ्यमिति सर्वं सुरूढम्॥

ननु व्यञ्जना क पदार्थ। उच्यते। मुख्यार्थबाधनिरपेक्षबोधजनको

गौरवादिति—लक्षणास्वीकारे वृत्तिद्वयकल्पनम्, तदवच्छेदकद्वयकल्पनम्, शाब्दबोधं प्रति शक्तिज्ञानजन्योपस्थितेर्लक्षणाज्ञानजन्योपस्थितेश्च कारणत्वे कार्यकारणभावद्वयकल्पनम्, परस्परव्यभिचारवारणाय कार्यताऽवच्छेदककोट्योरव्यवहितोत्तरत्वनिवेशेऽव्यवहितोत्तरत्वस्य स्वध्वसाधिकरणक्षणानुत्पत्तिकत्वे सति स्वाधिकरणक्षणध्वसाधिकरणक्षणोत्पत्तिकत्वरूपतया (लक्षणाज्ञानजन्यपदार्थोपस्थितिप्राग्वर्तिशक्तिज्ञानजन्यपदार्थोपस्थितिजन्यशाब्दबोधे व्यभिचारवारणाय विशेष्यम्, शक्त्यशाब्दबोधाऽनन्तरभाविलक्षणाज्ञानजन्योपस्थितिजन्यशाब्दबोधे व्यभिचारवारणाय सत्यन्तम्) स्वत्वस्य तत्तद्व्यक्तिविभान्ततया तद्घटिताऽव्यवहितोत्तरत्वघटितत्वेऽनन्तकार्यकारणभावकल्पनम्, पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानस्य लक्षणाज्ञानस्य च कारणत्वे पुन कार्यकारणभावद्वयकल्पनम्, अत्रापि परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वनिवेशेऽनन्तकार्यकारणभावकल्पनम् इतीमानि गौरवाणि सन्ति। न च तव मतेऽपि प्रवाहतीरादिघटितमदेन कार्यकारणभावद्वयकल्पनम्, परस्परव्यभिचारवारणायाऽव्यवहितोत्तरत्वनिवेशे च तादृशमेवानन्यमिति वाच्यम्, शक्तिभ्रमाऽनुरोधेन लक्षणावादिमतेऽपि अस्य गौरवस्य सत्त्वात्। पूर्वोक्तगौरवस्य तु तन्मते आधिक्यमेवेति तत्त्वम्। इति लक्षणावाद।

मुख्यार्थबाधनिरपेक्षबोधजनक इति—नानार्थकशब्दस्य प्रकरणादिनैकार्थे नियमिते तात्पर्यवशाद्योऽन्यार्थबोध राजत्युमावल्लभ इत्यादौ तत्र शक्यार्थस्य

मुख्यार्थसम्बन्धासम्बन्धसाधारण प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवै शिष्ट्यज्ञानप्रतिभाद्युद्बुद्ध संस्कारविशेषो व्यञ्जना। अत एव निपातानां द्योतकत्व स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता। द्योतकत्व च स्वसम

बाधाभावेऽपि व्यञ्जनासत्त्वात्। लक्षणामूलव्यञ्जनास्थले गङ्गायां घोष इत्यादौ मुख्यार्थबाधस्य नान्तरीयकत्वेऽपि व्यञ्जनाया साक्षात्तस्यानपेक्षणमेव। मुख्यार्थ सम्बन्धेति—मुख्यार्थसम्बन्धो यथा—'भ्रम धार्मिक निरवस्त' इत्यादौ भ्रमणाऽ भावस्य व्यङ्ग्यत्वे शक्यार्थेन सह वैपरीत्यलक्षण सम्बन्ध। 'राजत्युभावलक्ष्मम' इत्यत्र सादृश्यं सम्बन्ध। असम्बन्धो यथा—गङ्गायां घोष इत्यत्र शीतत्वपावन त्वादेस्तटवृत्तिधर्मस्य व्यङ्ग्यस्य प्रवाहेन सह नास्ति सम्बन्ध। प्रसिद्धार्थविषय कत्व तत्रैव शक्तिमूलव्यञ्जनाया 'राजत्युभावलक्ष्मम' इत्यादौ। अप्रसिद्धार्थविषय कत्वन्तु लक्षणामूलव्यञ्जनास्थले गङ्गायां घोष इत्यादौ। आदिगतव्यञ्जनाया मुख्यार्थबाधमुख्यार्थसम्बन्धप्रसिद्धार्थविषयकत्वाऽभाव सुतरां द्रष्टव्य। वक्त्रादीति वक्त्रादिवैशिष्ट्यज्ञानञ्च प्रतिभादि च ताभ्यामुद्बुद्ध इत्यर्थ। अत्र वक्त्रादिपदेन—

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधे।
प्रस्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषाम्॥
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा॥

इति काव्यप्रकाशोक्ता गृह्यन्ते। प्रतिभादिपदेन च—शक्तिनिपुणताऽभ्यासानां काव्यप्रकाशोक्तानामेव सग्रह। अत्र लक्षणे प्रथमविशेषणद्वयेन लक्षणाता वैलक्षण्यं लक्ष्यते, तृतीयविशेषणेन च शक्ति पार्थक्यं प्रतिभाति लक्षणातश्च, एव चतुर्थेनापि। संस्कारविशेष इति—यद्यपि समवायेनाऽय सहृदये वर्तते वयापि परम्परया शब्दादावपि वर्तत एव। अत्र शक्तिलक्षणयोरिव साक्षात्सम्बन्धेन शब्दाश्रयनिष्ठत्व विहाय सहृदयनिष्ठधर्मविशेषरूपसंस्कारविशेषत्वस्य प्रतिपादनाद् व्यञ्जनायाः सहृदयसंवेद्यत्वनिवेदनद्वारेण तस्या किमपि चमत्कारचञ्चुचमा वेदितं भवति। यथोक्त ध्वनिकृता—

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥

मिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वमिति, वैयाकरणानामप्येतत्स्वीकार आवश्यक । एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र तथैवानुभवात् । यत्रत्रादिवैशिष्ट्यज्ञान च व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेत्यन्यत्र विस्तर । यत्तु तार्किकाः लक्षणयैव गतार्थो व्यञ्जनेति न सा स्वीकार्येत्याहु । तन्न । लक्षणाया मुख्यार्थबाधपूर्वक लक्ष्यार्थबोधकत्वात् । मुख्यार्थसम्बन्धार्थीयेन लक्षणया बोधकत्वात् । व्यञ्जनाया अतथात्वेन तदनन्तर्भावाच्चेति दिक् ॥

ननु कोय वृत्त्याश्रयश्शब्द । वर्ण प्रत्येकमितिचेत्, न । द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्ते । नापि वर्णसङ्घात । उच्चारितप्रध्वसित्वेन यौगपद्यासम्भवात् । अभिव्यक्तेरुत्पत्तेर्वा क्षणस्थायित्वात्क्षणात्मककालस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्याप्यप्रत्यक्षत्वात् । उच्चारणाधिकरण

वैयाकरणानामपीति—निपातानां द्योतकत्वस्य, स्फोटस्य व्यङ्ग्यतायाश्च सिद्धान्तभूतत्वेन तत्र तत्र विलक्षणायतीत्यन्यथाऽनुपपत्त्या च वैयाकरणा अपि एनामङ्गीकुर्वन्ति । अपिना—सान्द्रानन्दनिभररसास्वादरसिका कव्यस्तु ता धारयन्त्येव, किन्तु शुष्कपदपदार्थविवेचनरुच्चाकृतहृदया वैयाकरणा अपि एनामुररी कुर्वन्ति, इति गम्यते । एषा न केवल शब्द एव किन्तु तदर्थादिष्वपीत्याह—एषा च शब्देत्यादि । काव्यप्रकाशादावुदाहरणानि द्रष्टव्यानि । व्यङ्ग्यविशेषेति—अर्थागतव्यञ्जनाप्रतिपाद्यव्यङ्ग्यबोधे शब्दगतव्यञ्जनास्थलीयव्यङ्ग्यबोधे च क्वचित् इत्यर्थ । दिगिति—विस्तरस्तु साहित्यदर्पण काव्यप्रकाशध्वन्यालोकादितो द्रष्टव्य इतितात्पर्यम् । इति व्यञ्जनावाद ।

प्रसङ्गसङ्गतिं सूचयितुमाह—ननु कोऽयमिति । क्षणस्थायित्वादिति—एतदुत्तरमय पाठश्शुद्धितो भाति—"क्षण शब्देन तदाधार काल । मुख्यक्षणस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्याऽपि अप्रत्यक्षत्वापत्ते" इति, मञ्जूषायां तथा पाठात् । अस्याय भाव—वर्णाना क्षणस्थायित्वमित्यत्र क्षणो गौण एव, वर्णाधारभूत कालविशेषो विवक्षित, मुख्य क्षणपदवाच्यस्तु कल्पितखण्डसमूहरूप कालस्याऽवयवधारयाश्चरमाऽपकर्षावधि पृथिव्यादे परमाणुरिव कश्चिदति सूक्ष्मतर प्रत्यक्षाऽयोग्य कालखण्डविशेष । एकैकस्य वर्णस्य तु प्रत्यक्षमनुभूयते,

कालोत्तरकालवृत्तिध्वंसप्रतियोगित्वमुच्चरितप्रध्वंसित्वम्। इको यणचीत्यादौ तस्मिन्निति परिभाषोपस्कृतवाक्यार्थेऽय पूर्वोऽय पर इति नष्टस्य प्रत्यक्षनिर्देशेन पौर्वापर्यव्यवहारायोगाच्च। यत्तु वार्किका वर्णानामनित्यत्वेऽपि उत्तरोत्तरवर्ण पूर्वपूर्ववर्णवैशिष्ट्यमव्यवहितोत्तरत्वसम्बन्धेन संस्कारवशाद् गृह्यत इति पदप्रत्यक्षत्वाच्छब्दबोध। यद्वा पूर्वपूर्ववर्णजन्या शब्दा शब्दजशब्दन्यायेन चरमवर्णप्रत्यक्षपर्यन्त जायमाना एव सन्त इति न पदप्रत्यक्षानुपपत्ति। यद्वा पूर्वपूर्ववर्णानुभवजन्यसंस्कारसचिवीनचरमवर्णानुभवत शाब्दबोध इत्याहु। तन्न। आधेऽयपूर्वोऽय पर इत्यभिलापासभवेनाऽव्यवहितोत्तरत्वसबधायोगात्। नष्टविद्यमानयोरन्यव्यवहितोत्तरत्वसबन्धस्य वक्तुमशक्यत्वाच्च। द्वितीये शब्दजशा

तस्मात् वर्णाधारभूत क्षणपदवाच्य कश्चिद्गौण एवार्थो ग्राह्य। अन्यथा (मुख्य क्षणस्य तदाधारत्वे) आधारस्याऽप्रत्यक्षत्वे आधेयस्य सुतरामप्रत्यक्षत्वाऽऽपत्तिः साचानिष्टेति। एवञ्च अत्राऽपि परमलघुमञ्जूषाया क्षणस्थायित्वादित्यनन्तरं क्षणात्मकेत्यारभ्याऽप्रत्यक्षत्वादित्यन्तस्य स्थाने स एव पाठो युक्तः, उपलब्धे। लेखकादिप्रमादात्तु परिवर्तिता भवेत्।

उच्चरितप्रध्वंसित्वमिति—तत्त्वच्च वर्णाना 'परः सन्निकर्ष' इति सूत्रे भाष्य उक्तम्—"एकैकवर्णवर्तिनी वाग्, न द्वौ युगपदुच्चारयति। 'गौ' इति गकारे यावद् वाग्वर्तते नौकारे न विसर्जनीय, यावद्विसर्जनीये न गकारे नौकारे, उच्चरित प्रध्वंसित्वात्। उच्चरितप्रध्वंसिन खल्वपि वर्णा" इति। अत्र वाग्व्यापारः। द्रियम्। अत्र एकक्षणस्थायित्वमेव भ्रममाणवर्णानामित्युक्त भवति, तथा च 'योग्यविभुविशेषगुणानां द्वित्रक्षणस्थायित्वमित्येव तार्किकोक्तनियमो बाध्यते।

गृह्यत इति—स्मर्यत इत्यर्थ। शब्दजशब्देति—उच्चरितो वर्ण क्षणस्थाय्यपि क्षणाऽवस्थितिकाल एव स्वसमानाकारं वर्णान्तरमुत्पाद्य स्वयं नश्यति स चोत्पन्नस्तादृशेन स्वसमानाकारमुत्पाद्य नश्यतात्येव क्रमेण श्रोतु श्रोत्रदेशे चरमवर्णस्य श्रवण यावत् पूर्वपूर्ववर्णोत्पन्नो वर्णो जायमान एव तिष्ठतीति न्यायस्तार्किकाणां मत। दृश्यतेऽद्यत्वे लाक्षेऽपि यत् बहुदूरस्थजनाश्चरित शब्दः क्षतिरयवर्णात्तरमेव यत्नसंस्कारेण श्रोतृ श्रवणविषयो भवतीति। तच्च स्वसमानाकारवर्णोत्पादकत्वाऽ

ध्वन्यायेन पदप्रत्यक्षोपपादनेऽपि पदस्याविद्यमानत्वेन तत्र शक्त्याश्रयत्व स्य ग्रहानुपपत्ते । अविद्यमाने आश्रयत्वाङ्गीकारे नष्टो घटो जलधानित्या- द्यापत्तेश्च । तृतीये येन क्रमेणानु-भवतेनैव क्रमेण तत्संस्कारस्थितिरित्यत्र विनिगमकाभावात् सरो रसो नदी दीन इत्यादौ विपरीतसंस्कारोद्बोधेन प्रत्येकमन्यार्थप्रत्ययापत्ते । तत्पत्तिविनाशवद्वर्णसमुदायरूपपदस्य मनु प्यादिवद्भेदे एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत्सर्वयागेष्वङ्ग भव तीति भाष्यविरोधापत्तेश्च । प्रादुर्भूतोऽभिव्यक्त । ननु कथं हि वृत्या श्रयश्शब्द । स स्फोटात्मक इति गृह्यताम् ।

ननु कोऽयं स्फोट । उच्यते । चतुर्विधा हि वागस्ति । परा पश्यन्ती

भावे न सङ्गच्छते, वर्णानां द्वितीयक्षणे ध्वंसात् । तेनैव क्रमेण तत्संस्कारस्थिति रित्यत्रविनिगमकाऽभावादिति—चिन्त्यमिदम्—सिद्धान्तपक्षेऽपि स्फोटस्य व्यञ्जकरूपरूपितत्वाङ्गीकारेण वर्णीयसंस्काराणामेव स्थिरतरत्वेन स्फोटे प्रतिबिम्ब समर्पकत्वोपगमात् क्रमिकसंस्काराऽनभ्युपगमे सरो रस इत्यादौ तादृशापत्तेस्तुल्यत्वात् संस्काराणा प्रतिबिम्बाऽसमर्पकत्वे तु क्षणस्थायिना वर्णाना साहित्याऽभावेन तत्प्रतिबिम्बे स्फोटस्य पदवाक्यात्मकत्व भज्येत । अतएव मञ्जूषायां स्फोटनिरूपण- प्रस्तावे—"येन क्रमेण च चित्ते संस्कारस्तेनैव क्रमेण व्यञ्जकरूपरूपितता तस्येति स्वीकारान्न 'सरो रस' इत्यनयोरविशेष" इत्युक्तम् । क्रमिकाऽनुभवस्यैव संस्कार क्रमिकत्वे विनिगमकत्वाच्च । तस्मात्—तेनैव क्रमेण तत्संस्कारस्थितावपि तेनैव क्रमेण तद्बुद्बोधके इत्यत्र विनिगमकाऽभावादिति पाठ" स्तस्य स्थाने न्याय्योऽयमा तीति सुधीभिर्विभावनीयम् ।

मूलाधारस्थेति—मूलाधारो नाम—

गुदात्तु द्वयङ्गुलादूर्ध्वं मेढ्रात्तु द्वयङ्गुलादध ।
चतुरङ्गुलविस्तारमाधार वर्तते समम् ॥

इति शिवसंहितोक्ते गुदमेढ्रान्तराले गुदाद्द्वयङ्गुलादूर्ध्वं मेढ्रात् द्वयङ्गुला- दधश्चतुरङ्गुलपरिमाण पद्मचक्राऽपरपर्याय स्थानविशेष ।

इदमत्र तत्त्वम्—इडा, पिङ्गला, सुषुम्णेति तिस्रो नाड्य, पवनवाहिन्य ।

मध्यमा वैखरी च । तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दाशून्या बिन्दुरूपिणी परावागुच्यते । नाभिपर्यन्तमाच्छता तेन वायुनाऽभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते। एतद्द्वय वाग्ब्रह्म योगिना समाधौ निर्विकल्पकज्ञानविषय इत्युच्यत।

तत्र मूलाधारादारभ्य वामनासापुट गता इडा नाम । तत एव च दक्षिणनासापुट गता पिङ्गला नाम । तयोर्मध्ये विद्यमाना मूलाधारादेवोर्ध्वं गच्छन्ती इडापिङ्गले आश्लिष्य नासापुटद्वय गता सुषुम्णा नाम । चन्द्रसूर्याग्निनामभिश्च क्रमशस्ता व्यवह्रियन्ते । आद्ये द्वे क्रियाफलापप्रेरिके, अन्त्या केवल समाधिसाधिनी । अस्यां नाडीनां षट् स्थानविशेषाश्चक्रपद्माऽपरनामधेया सन्ति मूलाधार, स्वाधिष्ठानम्, मणिपूर, अनाहतम्, विशुद्ध, आज्ञा चेति । तत्र गुदमेढ्रान्तराले 'गुदात् द्वयङ्गुलादूर्ध्वं मेढ्रात्तु द्वयङ्गुलादध, चतुरङ्गुलविस्तारमाधार वर्तते समम्' इत्युक्त दिशा प्रथम । लिङ्गमूले व्यवस्थितो द्वितीय, नाभौ तृतीय, हृदये चतुर्थं, कण्ठे पञ्चम, भ्रुवोर्मध्ये षष्ठश्चेति योगशास्त्रे विस्तर ।

मूलाधारस्थपवनसंस्कारीभूता—शतमर्थं विवक्षो पुस इच्छया यावन प्रयत्नेन मूलाधारस्थपवनस्य योग एव तदीयसंस्कार, तदभिव्यक्तीभूतेत्यर्थं । शब्दब्रह्मरूपेति—ब्रह्मरूपत्व जगदुपादानत्वात् । तदुक्तं हरिणा—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत ॥ इति ।

स्पन्दशून्या = क्रियाशून्या । बिन्दुरूपिणी—त्रिगुणात्मिका प्रकृति 'बिन्दु' रिति, तद्रूपा । मनोगोचरीभूता=मानसप्रत्यक्षविषयीभूता । समाधाविति—हठयोगप्रदीपिकायां समाधिलक्षण यथा—

सलिले सैन्धवं यद्वत्साम्यं भजति योगत ।
तथात्ममनसोरैक्यं समाधिरभिधीयते ॥
यदा संक्षीयते प्राणो मानसञ्च प्रलीयते ।
तदा समरसत्वञ्च समाधिरभिधीयते ॥ इति ।

योगदर्शनेऽपि—"तदा द्रष्टु स्वरूपेऽवस्थानम् ।" "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि"रिति । निर्विकल्पकेति—निर्विकल्पकज्ञानत्वञ्च तस्य

ततो हृदयपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्ता वत्तदर्थवाचकशब्द स्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्माजपादौ बुद्धिनिर्ग्राह्या मध्यमावा गुच्यते । तत आस्यपर्यंतमागच्छता तेन वायुनोर्ध्वमाक्रमता च मूर्धानमाहत्य पराहृत्य च वत्तत्स्थानेष्वभिव्यक्तापरश्रोत्रेणापि ग्राह्या वैखरीवागुच्यते । तदाह—

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥
वैखर्या हि कृतो नाद परश्रवणगोचरः ।
मध्यमया कृतो नाद स्फोटव्यञ्जक उच्यते ॥ इति ।

युगपदेव मध्यमावैखरीभ्या नाद उत्पद्यते । तत्र मध्यमानादोऽर्थवा चक स्फोटात्मकशब्दव्यञ्जक । वैखरीनादो ध्वनिः सकलजनश्रोत्रमात्र-ग्राह्यो भेर्यादिनादवन्निरर्थक । मध्यमानादश्च सूक्ष्मतर । कर्णपिधाने च जपादौ च सूक्ष्मतरवायुव्यङ्ग्य शब्दब्रह्मरूप स्फोटव्यञ्जकश्च ।

त्रविषयकज्ञानत्वम् । चित्=ब्रह्म । इद वेदान्तप्रसिद्धम् । तार्किकप्रसिद्ध निर्विकल्प ज्ञानन्तु—यत् केवल धर्मं धर्मिण वा विषयीकरोति यथा—घटत्वमिति, 'घट' इति वा । सविकल्पकज्ञानन्तु—अचिद्विषयकम्, अचित्=अविद्या । वार्त्तिकाणा-मिदन्तु विशेष्यविशेषणभावाऽवगाहीतिकथ्यते । परा निर्विकल्पकज्ञानविषयीभूता, पश्यन्ती च सविकल्पकज्ञानविषयीभूतेति विशेष । वत्तदर्थवाचकस्फोटरूपेति-मध्यमावागेव स्फोटात्मा इति भाव । अथवा स्फोट रूपयति व्यञ्जयतीतिव्युत्पत्त्या स्फोटव्यञ्जिकेत्यर्थ । इदमत्रसारम्—मध्यमाया अशद्वयम् एक स्फोटात्मक अपरस्तद् व्यञ्जकध्वनिरूप इति । अत एव वक्ष्यमाणमन्थेनैकवाक्यतेति ।

परावाङ्मूलचक्रेति—उक्तस्वरूपो मूलाधार एव मूलाधारचक्रम् । नाभि-संस्थिता=नाभिदेशीय मणिपूरसञ्ज्ञकचक्रसंस्थितेत्यर्थ । हृदिस्था=हृदयदेशी याऽनाहतचक्रस्था । कण्ठदेशगा=कण्ठदेशस्थविशुद्धचक्रगेत्यथ । वैखर्येति—वागपि 'वैखरी' नाम, वागिन्द्रियमपि 'वैखरी' नाम । अत्र वैखर्या=वागिन्द्रि येणेत्यर्थ । नादः=ध्वनि कादिवर्णरूप । निरर्थक ह्यत—स्व प्रति निरर्थक इत्यर्थ, पर प्रति तु परकीयमध्यमानादस्य प्रेरकत्वेन सार्थक, तत्रापि स्वत स्फोट

तादृशमध्यमानादव्यङ्ग्य शब्द स्फोटात्मक ब्रह्मरूपो नित्यश्च। तदाह हरि—

अनादिनिधन ब्रह्म शब्दतत्त्व यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत॥ इति।

स च यद्यप्येकोऽखण्डश्च तथापि पद वाक्य जपाकुसुमादिलौहित्य पीतत्वादिव्यञ्जकोपराग्वशात् लोहित पीत स्फटिक इति भानवद् वर्णादिव्यङ्ग्य वर्णरूप पदरूपो वाक्यरूपश्च। यथा च मुखे मणिकुण्

व्यञ्जकत्वाऽभावात् साक्षान्निष्प्रयोजन एव। अथवा निरर्थक इत्यस्य वाच्यार्थशून्य इत्यर्थ। यद्यपि मध्यमानादोऽपि स्वय तच्छून्य एव तथापि स्फोटस्य व्यञ्जकत्वेन तद्व्यङ्ग्यस्फोटद्वारा वाच्यार्थबोधक इति भाव। तादृशमध्यमानादव्यङ्ग्य इति—वादिवर्णात्मकमध्यमानादेन व्यङ्ग्य तत्प्रतिबिम्बरूपित इत्यर्थ। अय भाव, स्फोट एक एवाऽखण्ड सकलार्थबोधनक्षमो मध्यमाया वादिवर्णरूपनादादाद्योऽशो ब्रह्मरूपश्चेतन। किन्तु मध्यमाया अपरांशस्य वादिवर्णरूपस्य तस्मिन् प्रतिबिम्बपातो भवति स्फटिकादौ जपाकुसुमादीनामिव। तादृग्वर्णपदवाक्यात्मकप्रतिबिम्बवशादेव एकोऽप्यखण्डोऽपि स्फोटो नानेव भाति घटाद्येकपात्रस्थ जलप्रतिबिम्बितसूर्यवत्। स्वप्रतिबिम्बसमर्पणमेव नादस्य स्फोटाभिव्यक्तिमिति गीयते। वैखरीनादस्तु परम्परया व्यञ्जको मध्यमानादस्योत्पादकत्वादिति सोऽपि व्यञ्जको भाष्ये इति घोष्यते। ध्वनेरपि भेददयम्-प्राकृतवैकृतात्मकमित्यग्रे वक्ष्यते। तत्र प्राकृत एव स्फोटाभिव्यञ्जक इत्यग्रे स्पष्टीभविष्यति इति। विवर्तत इति—स्फोटस्यैकत्वे प्रतीयमानवर्णाद्यात्मकाऽनेकत्वस्यौपाधिकत्वमिति बहुभिर्दृष्टान्तैर्दर्शयति-सचेत्यादि। 'पद वाक्यम्', इति—'इत्यभिधीयते' इति शेषोऽत्र द्रष्टव्य। वर्णादिव्यङ्ग्य इति—अत्र पद वाक्यञ्चादिशब्दार्थं। तेन वर्णरूपनादाद्व्यङ्ग्यो वर्णस्फोट, पदरूपमध्यमानादभिव्यङ्ग्य पदस्फोट, वाक्यरूपमध्यमनाद व्यङ्ग्यो वाक्यस्फोट इति तदर्थं। यितश्च रजतगवदवास्तिकोऽन्यथाभाव, तस्मात् कारणस्वरूपस्याऽविरोधेन कार्यप्रतिभास इति ब्रह्मणो निर्विकारत्वान्न क्षति स्वरूपनिरतिभाव। पूर्वोक्तमेव परिष्करोति—किञ्चेति।

ननु पदवाक्ययोः सत्यण्डत्वमते सर्वेषां वर्णानां पृथक्पृथक् प्रतिबिम्बगणनं कर्तव्

णदर्पणव्यञ्जकोपाधिवशाद्वैर्ण्यतुल्यत्वादिभान तद्वत्। तदुक्तम्—

पदे न वर्णा विद्यन्ते वाक्येष्वयवा न च।
वाक्यात्पदानामत्यन्त प्रविवेको न कश्चन॥ इति।

किंच व्यञ्जकध्वनिगत कत्वगत्वादिक स्फोटे भासते। बिम्बगत धर्मवैशिष्ट्येनैव प्रतिबिम्बस्य लोकेऽवधारणाद् व्यञ्जकरूपस्थितस्यैव स्फटिकादेर्भानाच्च। यथा चैकस्याकाशस्य घटाकाशो महाकाश इत्यौपाधिको भेद। यथा चैकस्यैव चेतनस्यौपाधिको जीवेश्वर भेदो जीवाना च परस्पर भेद। एव स्फोटे व्यञ्जकध्वनिगतकत्वादि भानात्कल्पितो बुद्ध इत्यौपाधिको भेदव्यवहार। औपाधिको भेद इत्यत्रोपाधि कत्वादिभिन्न उपधेयस्तु आकाशस्फोटादिरेक एवेति तात्पर्यम्। पदवाक्ययोरखण्डत्वपक्षे त्वन्तिमवर्णव्यङ्ग्य स्फोट एक एव। पूर्वपूर्ववर्णस्तु तात्पर्यग्राहकः। न्यायनये चित्रगुरित्यादौ चित्रादिपदवत्। ध्वनिस्तु द्विविध प्राकृतो वैकृतश्च॥ प्रकृतार्थबोधनेच्छया स्वभावेन वा जात स्फोटव्यञ्जक प्रथम प्राकृत। तस्मात्प्राकृताज्जातो विकृतिविशिष्टश्चिरस्थायी नियतको वैकृतिक। हरिरप्याह—

स्फोटस्याऽनन्त्यमित्याशङ्क्य समाधत्ते—पदवाक्ययोरित्यादि। सर्ववर्णना प्रतिबिम्बसमर्पकत्वेऽपि चरमवर्णप्रतिबिम्बानन्तरमेवस्यैव स्फोटस्याऽभिव्यक्तिरिति भाव।

पदे न वर्णा इति—अत्र श्लोके 'वाक्येष्ववयवा न चेत्यस्य स्थाने वर्णेष्ववयवा न चेति पाठो भूषणसारपुस्तके समुपलभ्यते।' दृष्टान्तबीजेनाह—वर्णेष्विति। एकारौकारककारादिवर्णेष्ववयवा प्रतीयमाना अपि यथा नेत्यर्थ। क्वचिदिवेत्येव पाठ। एव वाक्येऽप्याह—वाक्यादिति—पदानामपि वाक्यादिवेको भेदो नास्तीत्यर्थ" इति तद्विवरणञ्च सारेऽवलोक्यते। एतेन स्फोटस्य पदवाक्यात्मकस्यापि अखण्डत्वमिति सिद्ध भवति।

ध्वनिस्तु द्विविध इति—मध्यमानादाऽपरपर्यायो ध्वनिर्द्विविध इत्यर्थ, तस्यैव प्राकृतात्मकस्य स्फोटव्यञ्जकत्वम्। 'मध्यमानादव्यङ्ग्य स्फोट' इति पूर्वग्रन्थेनैकवावयत्वायाऽत्र मध्यमानादरूपध्वनेरेव ग्रहणमुचितम।

स्फोटस्यमहणे हेतु प्राकृतो ध्वनिरिष्यते ।
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृता ॥
ध्वनय समुपोहन्ते स्फोटात्मा तैर्न भिद्यते । इति ॥

शब्दस्याभिव्यक्तेरूर्ध्वं वैकृता ध्वनयो लायन्त इति शेष । वृत्तिभेद इति।

अभ्यासार्थे द्रुता वृत्तिर्मध्या वै चिन्तने स्मृता ।
शिष्याणामुपदेशार्थं वृत्तिरिष्टा विलम्बिता ॥

तिसृषु वृत्तिषु समुपोहन्ते कारणानि भवन्ति स्फोटस्तु तैर्न भिद्यते इत्यर्थः । अत्रेद बोध्यम् । केनचिद्घटमानयेति वैखरीनादः प्रयुक्तः स केनचिच्छ्रोत्रेन्द्रियेण गृहीत स नाद इन्द्रियद्वारानुविद्धत्व सन्नर्थबोधक शब्द स्वनिष्ठकत्वादिना व्यञ्जयति तस्मादर्थबोध । स्फुटत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोट । उच्चारयितुस्तु युगपदेव मध्य मावैखरीभ्या नाद उत्पद्यते । तत्र वैखरीनादो यद्दे फूत्कारादिप्रमथ्य मानादौत्साहिक, मध्यमानाद स्फोटं व्यञ्जयतीतिशीघ्रमेव ततोऽर्थ बोधः परस्य विलम्बेनाऽनुभवसिद्धत्वात् । अतएव श्रोत्रोपलब्धिबुद्धि

स्फोटस्य महण इति—महणे=अभिव्यक्तावित्यर्थ । अस्योत्तरार्द्धम्—'स्थितिभेदे निमित्तत्व वैकृत मतिपद्यते' इति । स्थितिभेदे=चिराच्चिरोपलब्धिभदे । वैकृतत्वञ्च ध्वनेरपलस्यादिकृतत्वात् । स्फोटात्मा तैर्नभिद्यत इति—वैकृतध्वनिना स्फोटस्य चिराच्चिरोपलब्धेरेव भेदो नतु स्वात्मन इति भाव । वृत्तिभेदे=द्रुतादिवृत्तिभेदे । वृत्ति=स्थिति । बुद्धि ह्यद्गत इति—बुद्धिश ह्यद्गत इत्यर्थ ।

एकमप्यन्त करण वृत्तेर्भेदाद्बुद्धिम् । वृत्तिश्च परिणति । संशयनिश्चयगर्व स्मरणात्मिकाश्चतस्रो वृत्तय । तथा च तत्रयात्मकं 'मन' इति, निश्चयात्मिका 'बुद्धि'रिति,गर्वात्मिका'ऽहङ्कार'इति, स्मरणात्मक 'चित्तमि'ति व्यवहियते । तदुक्तम्

मनो बुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥ इति ।

अन्त करणमन्तरिन्द्रियमित्यर्थ । चित्तमेव ह्यद्यदयम् इति विशेषोऽत्र द्रष्टव्य ।

अर्थबोधक शब्द=स्फोट । व्यञ्जयति—मध्यमानादोदीनद्वारेति

निर्ग्राह्य प्रयोगेणाऽभिव्वल्लित आकाशदेश शब्द इत्याकरग्रन्थसंग च्छते फस्वादिना श्रोत्रोपलब्धिरूप स्फोटात्मकपदादिरूपेण बुद्धिनिर्ग्रा ह्यत्वम्। स च प्रयोगेण वैखरीरूपेणाभिव्वल्लित स्वरूपरूपित कृत इति तदर्थ । तत्रापि शक्यत्वस्येव शक्तावच्छेदिकाया वर्णपदवाक्य निष्ठजातेर्वाचकत्वम्। तदुक्तम्--

अनेकव्यक्तयभिव्यङ्ग्या जाति स्फोट इति स्मृता ॥ इति ।

तस्मादष्टविधस्फोटात्मकशब्दो वृत्त्याश्रय । वस्तुतस्तु वाक्यस्फोटो वाक्यजातिस्फोट एव वा वृत्त्याश्रय । तत एव लोकेऽर्थबोध इत्याद्युक्त मित्यादिति सर्वं सुस्थम् ॥ इति स्फोटनिरूपणम् ॥

शेष,। अत एवाग्रिमग्रन्थेनैकवाक्यता। आकर ग्रन्थ इति--तच्च 'अइउण' सूत्रे महाभाष्यम्। प्रयोगेण वैखरीरूपेणेति--यद्यपि मध्यमादेनैव स्वरूप प्रतिबिम्बसमर्पणेन स्वरूपरूपितः क्रियते, तथापि परश्रवणगोचरेण वैखरीरूपेणैव व्यक्ततरीकरणात् तेनापि स्वरूपरूपितः क्रियते, तस्यापि व्यञ्जकत्वात्। आकाशदेशस्य इति--तत्तत्प्राणिहृदयदेशाऽवच्छिन्नाकाशदेशस्य, सर्वसमष्टेर्विराजो हृदयरूपाद्याकाशदेशस्यश्चेत्यर्थ ।

स्फोटे औपाधिकपदाद्यात्मकभेदवत् अनुगतप्रतीतिशापिता वर्णपदवाक्यात्मक स्फोटनिष्ठा जातिरेव लाघवात् वाचिकाऽस्तु, स्फुटति प्रकाशतेऽर्थो यस्मादिति व्युत्प त्त्या जातिरेव वा स्फोटोऽस्तु इत्याह--तत्रापिशक्यत्वस्येवेति--लाघवाय यथा अर्थनिष्ठजातेरेव शक्यत्वमिति केषामपि सिद्धान्तस्तथैव शब्दनिष्ठ जातेरपि शक्त त्वमस्तु इति भाव । अनेकव्यक्त्यभिव्यङ्ग्येति-अनेकया वर्ण्यव्यक्तिभिरभिव्यङ्ग्या न त्वेक्याऽपीति नैकवर्णश्रवणाद्वोध इत्येकोऽर्थ, भूषणसारानुसारेण। 'इद पदम्' 'इद पदम्' इत्येकव्यक्तिषु एकाकारप्रत्ययात् व्यज्यमाना या जातिस्मा स्फोट इत्यर्थ इति तु मिश्रा ।

वस्तुतस्तु--अष्टविधत्वन्तु स्फोटस्य व्यञ्जकोपरागात् स्फटिकवत्। वस्तुतस्तु अखण्ड एवैक स इति व्याख्यातपूर्वमित्याशय ।

अथाऽऽद्य प्रकरणस्यास्य परिष्कार --

तद्धर्माऽवच्छिन्नविषयकशाब्दबुद्धित्वाऽवच्छिन्नं प्रतीत्यादिकार्यकारणभावे इदन्तु चिन्त्यते—कोऽयं वृत्त्याश्रयीभूत शब्दो नाम ? न तावद्वर्णादीनां प्रत्येकं वर्णा, एकवर्णोच्चारणाऽनन्तरमर्थप्रतीतेरदर्शनात्, द्वितीयादिवर्णोच्चारणवैयर्थ्यं प्रसङ्गाच्च । नाऽपि सहिता, उच्चरितध्वंसिनां तेषां साहित्याऽसम्भवात्, उच्चरितध्वंसित्वञ्च तेषां 'परः सन्निकर्षः' इति सूत्रे भाष्ये स्पष्टम् । तेषामुत्पत्तेरभिव्यक्तेश्च क्षणस्थायित्वात् । न च वर्णानां तादृश्यत्वेऽपि तदीयसंस्काराणां यावत्कार्यं स्थिरत्वेन तद्बलात् उत्तरवर्णप्रत्यक्षकालेऽन्त्यबुद्धितोत्तरत्वसम्बन्धेन पूर्ववर्णेनच्च तदुत्तरवर्णेन स्मर्यते, एव तदुत्तरवर्णप्रत्यक्षकाले स्मृतपूर्ववर्णविशिष्टतद्वर्णवत्त्वं तदुत्तरवर्णे स्मर्यत इत्येव क्रमेण सकलवर्णात्मकपदवाक्यविषयक स्मृतिसमिनप्रत्यक्षात्मकं ज्ञानं सुक्रम मिति वाच्यम्, नष्टस्य प्रत्यक्षविषयेदमा परामर्शाऽयोगेन 'अयं पूर्वोऽस्य परः' इतीद शब्दघटिताऽभिलापाऽभिलप्यमानपौर्वापर्यज्ञानस्याऽसम्भवेन नष्टविद्यमानयोरुत्पत्ति तोत्तरत्वाऽयोगात्, नष्टविद्यमानयोरन्त्यबुद्धितोत्तरत्वस्य सम्बन्धताया सम्बन्धस्य त्वाच । एवञ्च 'इकोयणची' त्यादौ 'तस्मिन्निति' परिभाषोपस्कृतवाक्यायाऽसम्भ विश्च पौर्वापर्याऽयोगात् । न च शब्दजशब्दन्यायेन उच्चार्यमाणेन पदवाक्यप्रत्यक्षो पपत्तिरितिवाच्यम्, एव तस्य प्रत्यक्षसंभवेऽपि नष्टत्वेन तत्र (पदे, वाक्ये च) शक्त्याश्रयत्वस्य प्रदानुपपत्ते, घविद्यमाने आश्रयत्वाङ्गीकारे 'नष्टो घटो जलधार' इति व्यवहारस्य प्रमात्वाऽऽपत्ते । न च पूर्वपूर्ववर्णाऽनुभवजन्यसंस्कारसहकृत चरमवर्णाऽनुभवजन्यसंस्कारस्तावद्वर्णगोचरं समूहालम्बन स्मरणं जनयतीति स्मृतौ साहित्यसंभव इतिवाच्यम्, येन क्रमेणाऽनुभवस्तेनैव क्रमेण तत्संस्कारस्यिता यदि तेनैव क्रमेण तदुद्बोधोऽपीत्यत्र मानाऽभावात् सरोरसो यजकरा नरीरन इत्यादौ कदाचित् विपरीतसंस्कारोद्बोधे विपरीतस्मरणेन प्रत्येकमन्त्यार्थप्रत्ययाऽऽपत्ते, दृश्यते च लोके ह्यतरसंस्काराऽभावे युक्तमेणाऽपि स्मृति, इदापि यद्वदन्यभावे ह्यतरसंस्काराऽभावस्य सत्वात् । ननु कस्तर्हि वृत्त्याश्रय शब्द ? इति चेत्—स्फोटात्मा स इति ब्रूमः । कोऽयं स्फोट इति चेत्, अभिधीयते—कण्ठादौ भगवत् सिद्धदार्शनिकी माया जायते, ततो बिन्दुरूपमव्यक्त त्रिगुणं ब्रह्मशिरिति शास्त्रान्तरे प्रसिद्धं जायते । अस्माद्बिन्दो. शब्दब्रह्माऽरनालरूपे वर्णादिविभेदरहिते नादाख्ये मुत्पद्यते । एतज्जगदुपादानमेव 'रव' 'पद' शिवशक्त्यपरिपदे—

"निन्दोस्तस्माद्विधमानाद्रवोऽव्यक्तात्मकोऽभवत् ।
स एव श्रुतिसम्पन्नै शब्दब्रह्मेति गीयते ॥" इति प्रपञ्चसारोक्ते ।

एतत्तत्त्वंगतमपि प्राणिनां मूलाधारे शातमर्यं निच्चो पुस इच्छया जातेन प्रयत्नेन योगरूपसस्कारवत पवनस्य चलनेनाऽभिव्यज्यते । तदभिव्यक्त शब्दब्रह्म 'परा' वाग् इत्युच्यते । तदेव नाभिपर्यंत (मणिपूरचक्रम्) आगच्छता तेन वायुनाऽभिव्यक्त मनोविषय 'पश्यन्ती'त्युच्यते । एतद्द्वय सूक्ष्मतमसूक्ष्मतरमीश्वराधिदैव योगिनां समाधौ क्रमशो निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते । ततो हृदय-पर्यन्तम् (अनाहतचक्रम्) आगच्छता तेन वायुना हृदयदेशेऽभिव्यक्ताऽजपादौ तत्तद्यविशेषतच्छब्दविशेषोल्लेखिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदैवत्या परश्रोत्रग्रहणाऽयोग्यत्वेन सूक्ष्मा 'मध्यमावाग्' इत्युच्यते । स्वय तु कर्णपिधाने उपाशुप्रयोगे च श्रूयमाणा सेत्याहुः । एतदवस्था त्रयमपि क्रमश सूक्ष्मतम-सूक्ष्मतरसूक्ष्मप्रणवरूपम् । सैव च आस्यपर्यन्त (सहस्रारचक्रपर्यन्तम्) आगच्छता तेन वायुना कण्ठदेश (विशुद्धाख्यचक्र) गत्वा ऊर्ध्वमाक्रामता च मूर्धानमाहत्य परावृत्य च तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदैवत्या 'वैखरीवाग्' इत्युच्यते । प्रणव एव व्यानोदानाख्यां वायुभ्यां सह वैखरीरूप प्रति पद्यते, सर्वासामेव वाचां प्रणवापादानकत्वात्, तथाग्रे स्पष्टीभविष्यति ।

तत्र मध्यमायां यश्चेतनाशो मध्यमाया एव ध्वन्यंशप्रतिबिम्बेन रूपित स एव स्फोटात्मा वृत्त्याश्रयो वाचकश्च । न च वर्णातिरिक्तस्य तस्याऽनुभवविषयत्वाभाव इति वाच्यम्, 'गौ' इत्येकं पदम्, 'गामानये'त्येक वाक्यम्, इति नानावर्णा-तिरिक्तैकपदवाक्याऽनुगते सार्वजनीनत्वात् । नायमसति बाधके एकपदवाक्याऽनु-भवो भ्रम इति शक्यं वक्तुम् । नाप्यौपाधिक, उपाधि खल्वेकधीग्राह्यत्वम्, एकार्थधीजनकत्व वा स्यात् । न तावदेकधीग्राह्काणा धवखदिरपलाशानामेकत्व प्रत्ययोऽस्ति, तथा सति धवखदिरपलाशा इति न कदापि स्यात् । एकार्थधीजनक त्वन्तूकरीत्या वृत्त्याश्रयत्वाऽज्ञानात्खण्डितमेव । तद्धेतुत्वेन तु वृत्त्याश्रयत्वज्ञानेऽन्यो-ऽन्याश्रय वृत्त्याश्रयत्वज्ञानादर्थधीजनकत्वज्ञानम्, अर्थधीजनकत्वज्ञानाच्च वृत्त्याश्रय त्वज्ञानमिति । न च 'वनम्' 'सेना' 'शतम्' इतिवत् सामूहिकौपाधिकमेकत्व ज्ञानमिति वाच्यम्, तत्र स्थितयो वृक्षादीना सामूहिकसमवेऽप्यग्रेऽवस्थितिप्रध्वसिना

वर्णानां सादित्याऽसम्भवस्योपपादितत्वात् । तस्मादयमवाधितोऽनुवाधिकश्च पद वाक्यगोचर एकत्वनिर्मासो वर्णातिरिक्त तत्समूहातिरिक्तश्च कश्चनैक शब्दलाभ मालम्बते स एव स्फोट ।

वपरसूत्रे भाष्यकृताऽपि सूत्यन्तरे ऐसोऽनापत्ति तत्तद्वृत्तिभनकयत्नभदेन वर्णानां तत्तत्कालत्वस्यैवौचित्यादित्याशङ्क्य--"एव तर्हि स्फोट शब्द, ध्वनि शब्दगुण " इत्याद्युक्तम् । 'एओङ्' सूत्रेऽपि—'अयवोमवत स्फोटमात्रं निर्दि श्यते, श्रुतेर्लश्रुतिमवती 'त्युक्तम् । सरूपसूत्रेऽपि—एक इद्र शब्द श्रूयते प्रादुर्भूतो युगपत्सवयागेत्यङ्ग भवती"ति प्रोक्तम् । तत्त्वञ्च--स्फुटति प्रकाशतेऽर्थो यस्मादिति योगरूढ्या श्रर्थनिष्ठविषयताप्रयोजकशब्दत्वम् । स चैकोऽखण्डश्च सम्पूर्णे कैकवर्णनाऽपि अभिव्यज्यते तथापि पूर्वपूर्ववर्णाऽनुभवाहितसस्कारसहकृतचरमव र्णाऽनुभवजन्य-सस्कारेणैव स्फुटमवभासते, अतो नैकवर्णनाऽभिव्यक्तयुत्तरमर्थ प्रत्यय । अखण्डात्मकस्य तस्यैकत्वेऽपि व्यञ्जकवर्णादिध्वनीनामानन्त्यात्तदानन्त्या ध्यास । यथा जलचाञ्चल्येन चन्द्रप्रतिबिम्बस्य चलत्वेन ग्रहणम्, यथा च स्फटि कादेर्जपाकुसुमाऽऽद्युपाधिवशात्तद्रूपस्य भानम्, यथा च मुक्ते मणिकणाप दर्पणाद्यभिव्यञ्जकवशाद्दैर्घ्यवर्तुलत्वादिभानं तद्वत् । उच्चरितप्रध्वसिनां वर्णानां सादित्याऽसंभवेऽपि यावत्कार्यं स्थिरत्वेन तदीयसंस्काराणामेव स्फोटे प्रतिबिम्ब समर्पकत्वम् । येन क्रमेण च चित्ते सस्कारास्तेनैव क्रमेण व्यञ्जकरूपस्थितस्य तस्येति स्वीकारश्च 'वर्णे रस' इत्यनयोरविशेष । स्फोटे स्फोटान्तराऽनधिकरणीयापर्य ग्रहणश्च चित्तगतो वैशिष्टयमेव । अतएव 'वर सन्निकर्ष' इति सूत्रे भाष्यम—

बुद्धौ स्थित्वा सर्वाश्चेष्टा कर्ता धीरस्तत्त्वतीति ।
शब्देनाधान् याच्यान् दृष्ट्वा बुद्धौ कुर्यात्पौनरुक्त्यम् ॥ इति ।

ननूपाध्यभावे कदाचित् शुद्धस्फटिकवाधवत् केवलस्य स्फोटस्य भानं कस्मान्न ? इतिचेत्—न, स्फटिकादेरुपाधेरभावे सामग्र्यन्तरेणोपलम्भेऽपि स्फो टस्योपाधिभिन्नोपलम्भकाऽभावान्निरुपाधिब्रह्मवत् इव न कदापि वर्णादिगतित्वेना- पलम्भः, व्यञ्जकरूपमतिबिम्बनात् व्यञ्जकरूपस्थितस्यैव तस्योपलम्भ इति स्वी कारात् । नन्वेव वर्णादिसंस्काराणां स्थिरत्वात्सदा स्फोटानावृत्तिरित्यापन्न, ——————ाऽऽकारवृत्त्यतिरिक्तवृत्त्या तत्तत्संस्कारनाशात् । व्यञ्जकरूपस्थितस्यैव स्फो-

अथ शाब्दबोधसहकारिकारणानि आकाङ्क्षायोग्यताऽऽसत्तितात्पर्याणि। वाक्यसमयग्राहिकाऽऽकाङ्क्षा। सा चैकपदार्थज्ञाने तदर्थान्वय योग्यार्थस्य यज्ज्ञान तद्विषयेच्छा 'अस्याऽन्वय्यर्थं कः' इत्येवरूपा पुरुष निष्ठैव, तथापि तस्या स्वविषयेऽर्थे आरोप। अयमर्थोऽर्थान्तरमाका

रस्य मानेन यादृशव्यञ्जकाऽभिव्यक्ते शक्तिग्रहस्तादृशव्यञ्जकाऽभिव्यक्तादेव शाब्द बोध, अतो घटपदाभिव्यक्ते स्फोटे गृहीतशक्तिकस्य पुंसो न कलशपदाऽभि व्यक्तार्थबोध। अयञ्चान्तरत्वात् श्रोत्रग्राह्यवैखरीसंस्कृतान्तःकरणग्राह्य एवेति न वैखरीं विनाऽस्योपलब्धि परस्य, स्वस्य तु भवत्येव। अस्य च व्यञ्जक प्राकृत एव मध्यमानादाख्यो ध्वनि —"स्फोटस्य ग्रहणे हेतु प्राकृतो ध्वनिरिष्यते" इति हर्युक्ते। अतो वृत्तिभेदायवैकृतात्मध्वन्युपाधिको नाऽस्मिन्भेद, तस्माद्वृत्त्यन्तरेऽपि वैसादृश्यं सिध्यति। तस्य चोपाधिभेदादुक्ता अष्टौ भेदा। तस्य च नित्यत्व सूर्यादीनामिव कल्पादिकल्पान्तावधिसापेक्षत्व, प्रवाहनित्यत्ववादात् ब्रह्मत्वञ्च तस्य जगदुपादानत्वात्।

सचाऽयं स्फोट आन्तरप्रणव एव—"ओङ्कार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति" श्रुते। बह्वी=वाक्यपदादिरूपा, नानारूपा=घटपटाद्यर्थरूपा चेत्यर्थ। 'अकार एवे'ति श्रुत्यन्तरे पाठ, तत्राप्यवयवद्वारा प्रणवोपलक्षणत्वमितिदिक्। इति वृत्त्याशयवाद।

शाब्दबोधे वृत्तिविशिष्टज्ञानरूपस्य मुख्यकारणस्य निरूपणानन्तरं सहकारिकारणनिरूपणे प्रसङ्गस्य सङ्गतित्व सूचयन्नाह—अथेत्यादि। कारणानीति—कारणताऽवच्छेदकानीत्यर्थ अथवा तात्पर्याणीत्यस्य तात्पर्यज्ञानानीत्यर्थ। आकाङ्क्षादिभ्रमेणापि शाब्दबोधदर्शनेन स्वरूपतस्तेषां कारणत्वाऽभावेन तज्ज्ञानानामेव कारणत्वस्वीकारात्। अतएव मुक्तावल्याम्—"आसत्तिज्ञान, योग्यताज्ञानम्, आकाङ्क्षाज्ञान, तात्पर्यज्ञानञ्च शाब्दबोधे कारणम्" इत्युक्तम्। वाक्यसमयेति—समय शक्तिः। पुरुषनिष्ठैवेति—इच्छारूपाऽऽकाङ्क्षाया आत्मधर्मत्वेन समवाय सम्बन्धेन पुरुषनिष्ठत्वात्। स्वविषयेऽर्थे आरोप इति—यद्यपि विषयतासम्बन्धाऽवच्छिन्नेच्छानिष्ठप्रकारतानिरूपिताऽर्थनिष्ठविशेष्यताशालिज्ञानस्य प्रमात्वेन बाधकालिकत्वविरहान्नाऽऽरोपत्वम् तथापि, आकांक्षतीतिमतोतेः समवायसम्बन्धाऽ-

ङ्क्षत इति व्यवहारात्। इदमेवाभिधानापर्यवसानमित्युच्यते। पद तु नारोपः अर्थबोधोत्तरमेवाऽऽकाङ्क्षोदयात्। पद साकाङ्क्षमिति तु साकाङ्क्षार्थबोधकमित्यर्थकम्। तदुक्त समर्थसूत्रे भाष्ये परस्परव्यपेक्षा सामर्थ्यमेके। का पुनश्शब्दयोर्व्यपेक्षा। न शूमश्शब्दयोरिति किं तर्हि अर्थयोरिति। ईदृशजिज्ञासोत्थापक चैकपदार्थऽपरपदार्थव्यतिरेकप्रयुक्तरयान्वयबोधजनकत्वस्य ज्ञानमिति, तद्विषये तादृशान्वयबोधजनकवेप्याकाङ्क्षेति व्यवहार। यद्वा तत्थापकताविषयतान्यतरसम्बन्धेनोभयसम्बन्धेन वाऽऽर्थान्तरजिज्ञासा आकाङ्क्षा। आद्य पश्य मृगो धावतीत्यत्र दर्शनार्थस्य कारकघावनाकाङ्क्षोत्थापकत्वं धावन तु तद्विषय एव। अन्त्य पर्वति तण्डुल देवदत्त इत्यादौ क्रियाकारकयोर्द्वयोरपि परस्परं तदुत्थापकत्वा त्तद्विषयत्वाच्च। अतएव घट कर्मत्व आनयन कृतिरित्यतो घटमानये तिवन्नान्वयबोध। आकाङ्क्षाविरहात्। घटमानयेति विभक्तयन्ताख्या तान्तयोरेव साकाङ्क्षत्वाच्च।

यच्छब्देच्छानिष्ठप्रकारतानिरूपितकर्तृनिष्ठविशेष्यत्वाऽवगाहित्वेन तादृग्विशेष्यगा याश्च श्रवणार्थाऽऽन्तरमाकांक्षतीत्यत्र कर्तृभूतेऽर्थे धात्वेन मुक्तमेवात्र तादृग्ज्ञानस्यारोपत्वमिति नैयायिका। इदमेवेति—इदमेव—आकांक्षैव, अभिधानस्य=बोधकत्वस्य, अपर्यवसानम्=अपूर्णतेत्यर्थ।

ननु 'अस्माऽन्वय्यर्थं क!' इत्येवरूपाऽऽकांक्षा शाब्दबोधे कारणताऽभ्युपगमे चेत्तर्हि—"घट कर्मत्वम् आनयनं कृति" इत्यत्रापि घटमानयेतिवत् शाब्दबोधस्यात्ताद्दशाऽऽकाङ्क्षायास्तत्र सत्त्वादित्यत आह—यद्वा तत्थापकतेत्यादि। अतएवेति—उक्ताकाङ्क्षाज्ञानस्य शाब्दबोधं प्रति हेतुत्वादेवेत्यर्थ। अनेनाकाङ्क्षाज्ञानस्य शाब्दबोधकारणतास्वीकारेऽपि मानं दर्शितं भवति, उक्तवदपे पञ्जेति। अवगत्र परिष्कार—

पदार्थविशिष्टतदाऽऽकाङ्क्षा। वै० च—स्वघटितसमुदायपरकस्वेतरपदार्थविषयकजिज्ञासोत्थापकत्व—स्वघटितसमुदायपरकस्वेतरपदार्थोत्थापितजिज्ञासाविषयत्वैतदन्यतरत्वम्, स्वघटितसमुदायपरकस्वेतरपदार्थविषयकजिज्ञासोत्थापकत्व—स्वघटितसमुदायपरकस्वेतरपदार्थोत्थापितजिज्ञासाविषयत्वैतदुभयत्वम्—एतदन्य

योग्यता च परस्परान्वयप्रयोजकधर्मवत्त्वम्। तेन पयसा सिञ्चतीति वाक्य योग्यम्। अस्ति च सेकान्वयप्रयोजकद्रवद्रव्यत्व योग्यता जले, करणत्वेन जलान्वयप्रयोजकार्द्रीकरणत्व योग्यता सेककियायाम्। अतएव वह्निना सिञ्चतीति वाक्यमयोग्यम्। वह्नेः सेकान्वयप्रयोजकद्रव द्रव्यत्वाभावात्। एतादृशस्थलेपु नान्वयबोध किंतु प्रत्येक पदार्थबोध मात्रमिति नैयायिकास्तन्न, बौद्धार्थस्यैव सवत्रबोधविषयत्वेन बाधस्या भावात्। हरिरप्याह। "अत्यन्तासत्यपि स्वार्थे ज्ञान शब्द करोति चेति"। अतो वन्ध्यासुतादिशब्दाना प्रातिपदिकत्वम्। वह्निना सिञ्चतीत्यतो बोधाभावे तद्वाक्यप्रयोक्तार प्रत्यद्रवेण वह्निना कथ सेक ब्रूयीत्

तरसम्बन्धेन। पश्य मृगो धावतीत्यत्र दर्शनपदार्थे स्वघटितसमुदायघटकस्वेतरधावन-पदार्थविषयकजिज्ञासोत्थापकत्वम्, धावनपदार्थे च स्वघटितसमुदायघटकस्वेतर-दर्शनपदार्थोत्थापितजिज्ञासाविषयत्वम्। 'पचति तण्डुल देवदत्त' इत्यत्र तु क्रिया-कारकयोर्द्वयोरपि तदुभयवत्त्वम्। एव पूर्वोक्तवाक्ये मृगपदार्थेऽपि तदुभयवत्त्वमिति समन्वय। घट कर्मत्वम् आनयन कृतिरित्यत्र तु न केनापि सम्बन्धेन घटादीना पदार्थवैशिष्ट्यमिति नाऽतिप्रसङ्ग। अत्रैवोदासीनामस्त्यादिक्रियामादाय प्राप्तस्याति प्रसङ्गस्य वारणार्थं स्वघटितसमुदायघटकत्वविशेषणमितिदिक्।

अन्ये तु अमुतघटशब्दसमभिव्याहृतलोडादिशब्दस्य घटकर्मकानयनार्थबोधे आकाङ्क्षेति तत्तद्वाक्यार्थभेदेन भिन्नमाकाङ्क्षालक्षण परिष्कुर्वन्तीत्यलम्। इत्या काङ्क्षावाद।

अवसरसगत्या योग्यता निरूपयति योग्यता चेति। नैयायिका इति—योग्यताया शाब्दबोधे नैयायिका एव कारणत्व जानन्ति, न वैयाकरणादय इति भाव। एतेनाऽरुचि सूचिता। तदाह—तन्नेति। बाधस्याऽभावादिति—"शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इत्युक्तपातञ्जलसूत्रेण शब्दप्रयोज्ये बोधे बाधज्ञानस्याऽप्रतिबन्धकत्वाऽङ्गीकारात् तथाऽनुभवाच्च। अत्रार्थे हरिमपि प्रमाण यति—हरिरप्याहेति। "वस्तुतो बाधज्ञान न क्वाऽपि ज्ञाने प्रतिबन्धकम्, तत्कालेऽ पि हि त्या सामग्र्या जायत एव ज्ञानम्। तत्र स्वस्वसामग्रीवशाद् द्वयोरपि ज्ञानयो र्जातयोर्यत्र ज्ञाने सदोषसामग्रीजन्यत्वग्रहस्तत्राऽप्रामाण्यग्रह इत्येव मयादा व्या-

त्युपहासानापत्तेश्च। वाक्यार्थबोधे जाते युद्धार्थविषये प्रवृत्तिस्तु न भवति युद्धार्थेऽप्रामाण्यमहादित्यन्यत्र विस्तर।

प्रकृतान्वयबोधानुकूलपदाव्यवधानमासत्ति। गिरिरग्निमान्नित्याद्यम्। अनासन्नं च गिरिर्भुक्तमग्निमान्देवदत्तेनेति। आसत्तिरपि मन्दे रविलम्बेन शाब्दबोधे कारणम्। अमन्दयुद्धेस्त्वासत्त्यभावेपि पदार्थविल ताव काङ्क्षादितोऽविलम्बेनैव बोधो भवतीति न बोधे तस्या कारणत्वम्। ध्वनित चेद न पदा तसूत्रे भाष्ये। श्यामोदन पचतीत्यादौ श्यामा मित्यस्यौदनपदेन व्यवधानेपि प्रकृतान्वयबोधानुकूलत्वादासन्नत्वाच्च।

एतद्वाक्य पद वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छया

यसी, यथा 'गेहे घटोऽस्ति' 'गेहे घटोनास्ती'ति परस्परविरुद्धे द्वाभ्यां प्रयुक्ते" इति लघुमञ्जूषायां विस्तर। तदाह—इत्यन्यत्र विस्तर इति। तथा च योग्यताज्ञानस्य शाब्दबोधे कारणत्व नास्तीति सत्त्वम्। इति योग्यतावाद।

अवसरसगत्याऽऽसत्तिं निरूपयति—प्रकृतेति। मन्दयुद्धेरविलम्बेनेति—एतेन अनासन्नार्थके योजनावाक्यात्मन्दस्य बोधेऽपि विलम्बोऽस्त्येवेति सूचितम्। न च तत्र योजनावाक्यात्मन्दस्य यदि बोधस्तर्हि अस्मात् पदादयमर्थो बुद्ध इति अनुमतो विरुद्धयेतेति वाच्यम्, योजनावाक्यसम्पादनद्वारेण तस्यापि बोधे उपयोगेनाऽदोषात्। वस्तुतो योजनावाक्यकल्पना व्यर्था, सत्कल्पनाऽऽकाङ्क्षादिनाऽर्थं योजनाफलवनस्यैवौचित्यात्। परन्तु मन्दस्य सा विलम्बेन, अमन्दस्य तु सा शीघ्रमिति सत्यम्। तथाचासत्तेर्न बोधे कारणत्वमिति भावस्तदाह—न बोध इति। भाष्य इति—तथ हि—"अनानुपूर्व्येणापि सन्निधिष्टानां पदेष्वभिसम्बन्धो भवति। तद्यथा—अनड्वाहमुदहारि, पश्य स्म हरसि शिरसा कुम्भं भामिनि, साचीनमविधावन्तमद्राक्षीरिति" दृष्टम्। अत्राऽऽनुपूर्व्यम् पदान्तरेणाऽव्यवधानस्याऽऽसत्तिरेव। एवञ्च आसत्यभावेऽपि अन्यपदार्थ इति दृष्टमत्र भाष्यग्रन्थे इत्यासत्तेरपि कारणत्वं निरस्तं बोद्धव्यम्। इत्यासत्तिवाद।

अवसरसंगत्या तात्पर्यं निरूपयति—एतद्वाक्यमिति ईश्वरेच्छातात्पर्य-

त्पर्य्यम्। अत एव सति तात्पर्य्ये सर्वे सर्वार्थवाचका इति शाब्दिकनये घटशब्दात्पटप्रत्ययो नेत्याद्युक्तम्। नानार्थस्थले लोके तात्पर्य्यन्तु एत त्पद वाक्य वा एतदर्थप्रत्ययाय मयोच्चार्य्यते इति प्रयोक्तुरिच्छारूप, तात्पर्य्यनियामक च लोके प्रकरणादिकमेव अतो भोजनप्रकरणे सैन्ध वमानयेत्युक्ते सैन्धवपदेन लवणप्रत्यय। युद्धाऽवसरेऽश्वप्रत्यय। वेद वाक्ये ऐश्वरतात्पर्य्यादर्थबोध। ननु प्रकरणादीना शक्तिनियामकत्वे शक्त्यैव निर्वाहे किन्तात्पर्य्येणेति चेन्न। अस्माच्छब्दादर्थद्वयविशेष्यको बोधो जायते अर्थद्वये शक्तिसत्त्वात्तात्पर्य्य तु क्वेति न जानीम इत्यनु

मिति—इयमिच्छैव नैयायिकाऽभिमतसङ्केतोऽपि, पूर्वोक्तेश्वरेच्छात्मकसङ्केतताऽस्या मविशेषत्वलाभात्। तथा च इदृगीश्वरे छात्मकतात्पर्यज्ञान 'घटशब्दो घत्वाऽवच्छिन्ने शक्त' इतिशक्तिज्ञानजनकमेव, न तु तस्य शाब्दबोधे कारणत्वम्, शक्तिज्ञानेनाऽन्यथासिद्धत्वात्, धूलालजनकवत्। तच्चात्पर्यज्ञानञ्चास्माकं देवता महर्षिलोकवृद्धपरम्परातो भवतीत्युक्तपूर्वम् व्याकरणकोपादितश्चेति तत्त्वम्। अतएव = ऐश्वरतात्पर्यज्ञानस्य शक्तिग्राहकत्वादेव। शाब्दिकनयेति—शाब्दिकानां मते स्फोटस्यैव वृत्त्याश्रयत्वात् तस्य चैक्येन तस्यैकस्यैव वस्तुत सर्वार्थवाचकत्वम्। नैयायिकादीना मते तु स्फोटाङ्गीकाराऽभावात् तत्तच्छब्दानां विशिष्यैव तत्तदर्थवाचकत्वमिति भाव। नानाथस्थले लोकेति—लोके नानार्थस्थले ऐश्वरतात्पर्यज्ञानादन्यदपि प्रयोक्तृतात्पर्यज्ञानमन्यतरार्थविषयकज्ञाने प्रामाण्यनिश्चयोपयोगितयाऽऽवश्यकम्। वेदे तु प्रयोक्तुरभावान्नेदमावश्यकमिति भाव। नानार्थत्वञ्च—नानाघमाऽवच्छिन्न शक्यतानिरूपितयावत्ताऽनवच्छेदकैकधर्मवत्त्वम्। वेदवाक्ये चैश्वरेति—ऐश्वरतात्पर्यादिति = ऐश्वरतात्पर्यादेवेत्यर्थ। ऐश्वर तात्पर्यन्तु द्विविधम्, पूर्वोक्तसङ्केतरूप लोकवेदसाधारणमेकम्, नानाथस्थलीयवेदमात्रविषयक द्वितीयम्। अन्यतरार्थविषयकज्ञाने प्रामाण्यनिश्चायकतया च द्वितीयोपयोग। अर्थबोध = शक्तिग्रह, तदर्थविषयकज्ञाने प्रामाण्यग्रहेत्यर्थ।

प्रकरणादीनामिति—सयोगा विप्रयोगश्चेतिश्लोकोक्तानामित्यर्थ। शक्तिनियामकत्वे=एकतरार्थविषयकज्ञाने प्रामाण्यनिश्चायकत्व इत्यर्थ। बोधो जायते, तात्पर्य तु क्वेति न जानीम इति—एतेन तात्पर्यज्ञानमन्तरेणापि शाब्दबोधो

भवविरोधात्। अतएव च पय आनयेत्युक्तेऽप्रकरणज्ञस्य दुग्ध अज्ञ का आनेयमिति प्रश्न सङ्गच्छते। इत्याकाङ्क्षादिविचारः।

जायत इति न तात्पर्यज्ञानस्य शाब्दबोध कारणत्वमिति सूचितम्। इत्यलं भवेति—तया च तात्पर्यज्ञान केवलमेकतरार्थविषयकज्ञाने प्रामाण्यनिश्चायकम्। प्रकरणादिज्ञानात्तात्पर्यज्ञान, तात्पर्यज्ञानादेकतरार्थविषयकज्ञाने प्रामाण्यनिश्चयक इति तदर्थं तात्पर्यज्ञानमावश्यकमेवेतिलभ्यतेऽनुभवानुरोधादिति वाक्यम्। अतएव च प्रयोक्तृतात्पर्यज्ञानस्यैकतरार्थज्ञाने प्रामाण्यनिश्चयार्थमावश्यकत्वादेव। प्रश्न सगच्छत इति—एतेनाऽपि तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वाऽभाव सूचितः पूर्व सूच्यते।

अत्राऽयं परिष्कार—तात्पर्यज्ञानस्य न शाब्दबोध कारणत्वम्, प्रत्यक्षाऽनुभवप्रश्नानुरोधात्। शुकादिवाक्यात्, देवताप्रसादेन, पूर्वजन्मसंस्कारेण वा मूलभालकृतोत्तमकाव्याद् वक्तृतात्पर्यव्यतिरेकनिश्चयेऽपि शाब्दबोधोदयेन तात्पर्यज्ञानस्य बोधे हेतुत्वाऽसम्भवाच्च। तद्व्यतिरेकनिश्चयस्य वक्तृतात्पर्याऽज्ञानात्। न चैवं तत्र तात्पर्यमितिचेन्न तस्य शाब्दबोधरूपफलोपयत्वेन बोधाव्यवधानात्। स्पष्टञ्चेदं संदर्भासङ्गतिसूत्र भाष्ये। तत्र हि—"अत्र हि—गवान् प्राप्तं पाशुपतपाद्यमप्रकरणज्ञमागत ब्रवीतु—'गोपालकमानय, करजकमानय'ति, तमन्य गतिस्तस्य भवति, साधीयो वा यष्टिहस्तं गमिष्यति" इत्युक्तम्। अत्र 'उभयगतिस्तस्य भवति' इत्यनेन तात्पर्यज्ञानाऽभावेऽपि शाब्दबोधदर्शनात्तात्पर्यज्ञानस्य कारणत्व स्पष्टमेव सूचितम्।

तात्पर्यनिर्णयोपयोगस्तु नानार्थस्थले अन्यतरार्थविषयकज्ञाने प्रामाण्यनिश्चय द्वारा प्रवृत्तौ। यथा 'गवे शैन्धवमस्ति' इत्युक्तौ तात्पर्यज्ञानमन्तरेण अश्वनिष्ठ शैन्धवविषयक ज्ञानं जातम्, प्रकरणादिना लवणविषयकज्ञाने तात्पर्यनिर्णयेन तद्विषयकज्ञाने प्रामाण्यनिश्चय तद्विरुद्धविषयकज्ञानेऽप्रामाण्यबुद्धौ प्रमितज्ञानविरुद्धं प्रवृत्तिर्भवति लोकस्येति। तथा तत्तद्वाक्यार्थविषयकज्ञान प्रामाण्यग्रहे तत्तद्वाक्यार्थबोधोत्तरज्ञानमपि तात्पर्यज्ञानमिव वृत्त। अस्तत्रभवान्—प्रत्ययमाद विषञ्जिका सूत्रयतम्। तत्र धर्म = वाक्यार्थधर्मः, प्रमाद = अन्यथाग्रहण, विप्रलिप्सा = प्रतारणा = प्रतीतविषयोपनिषादविधा। व्याख्यानञ्च—'अथ प्रकृतविषये ईदृशो

अथ सकलशब्दमूलभूतत्वाद्धात्वर्थो निरूप्यते । तत्र फलानुकूलो यत्न सहितो व्यापारोधात्वर्थः । फलत्व च तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययस मभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्वम् । विभागजन्य

स चवान्, आसत्वविरोधिधर्मानधिकरणत्वात्, इत्यनुमानेन । वेदस्याऽकर्तृकत्वे तु अनाप्तोक्तत्वाऽभावशान हेतुवाक्य । तच्च आप्तोक्तत्वज्ञानात् अनुक्तत्वनिर्णया
*द्देति मञ्जूषाया विस्तर । एवञ्च तात्पर्यज्ञानस्याऽपि कारणत्व खण्डित वेदित व्यम् । इतितात्पर्यवाद ।

स्फोटग्रन्थेन शब्दान् निरूप्य शाब्दबोधीयमुख्यकारणताऽवच्छेदकवृत्तिनि रूपणा ते प्रसङ्गात्तदाश्रयनिरूपण कृत्वा शाब्दबोधीयसहकारिकारणताऽवच्छेदका-काङ्क्षादिनिरूपणेन विषयसिद्धया प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिकालाऽ वच्छेदेन सकलशब्दमूलभूतत्वेन हेतुनाऽवश्यवक्तव्यत्वरूपाऽवसरसंगत्या धात्वर्थ निरूपण प्रतिजानीते—अथेति । सकलशब्दमूलेति—उणादीनां व्युत्पन्नत्व मिति मतेदम् । तत्रेति = निरूपणविषयीभूत इत्यर्थ । फलानुकूल इति—
* फले व्यापारे च खण्डश शक्ति, अनुकूलत्वञ्च आकाङ्क्षाभाग्य संसर्ग । यत्नसहित इति—यद्यपि "कर्मणायमभिप्रैती"ति सूत्रस्थोक्तभाष्यसम्मततया 'जानाति, इच्छति, यतते करोती'ति प्रक्रियया नान्तरीयकत्वात् क्रियाया यत्नपूर्व कत्वादेव पचतीत्यादौ यत्नस्याऽपि प्रतीतिनिर्वाह, किञ्च मनोव्यापाररूपयत्नस्याऽपि व्यापार एवान्तर्भावेण व्यापारपदेनैव बोधसिद्धिस्तथापि यत्नस्य पृथगुक्ति'र्यत्न आख्यातार्थ' इति तार्किकमतस्य नि सारता ज्ञापयितुम् । रथो गच्छतीत्यादौ च धातोर्व्यापारमात्रे शक्तिः, रथादौ स्वकीययत्नस्याऽभावात्, परकीययत्नेनैव तस्य सञ्चारात् । इय शक्ति प्रसिद्धा, अप्रसिद्धा वेत्यन्यत् ।

* ननु "स्वरितञित" इत्यादौ फल रूदा उद्देश्यम्, तादृशफलस्यैवात्र ग्रहण स्यात् पाकोद्देश्यीभूतत्तुन्निवृत्तेरभावे अपाक्षीदित्यनापत्ति, तस्मादत्र पारिभाषिक फलत्व किञ्चिद्वाच्यमित्याह—फलत्वञ्चेति ।

कर्तृप्रत्ययेति—उपलक्षणमिदं, नतु विशेषणम्, अन्यथा कर्मप्रत्ययसम-भिव्याहारे विक्लित्यादेः फलत्वानापत्ते । विभागजन्येति—'वृक्षाद् भूमौ पतती'त्यकर्मकप्रयोगदर्शनाऽनुरोधेन विभागजन्यसयोगरूप पतधात्वर्थ आवश्यक ।

तथाहि फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधात्वुत्त्यु
पस्थिति कारण, व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधात्वु
जन्योपस्थिति कारणमिति कार्य्यकारणभावद्वयकल्पन घातोरवयवद्व
शक्तिद्वयकल्पन घातोर्बोधजनकत्वसम्बन्धद्वयकल्पन चातिगौरवम्। तस्मा
त्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातुना शक्ति कर्तृ
र्थिकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामक इत्याहुः।

यत्तु मीमासकाः फल धात्वर्थो व्यापार प्रत्ययार्थ इति यदाहि।
तन्न। ल कर्मणीत्यादिसूत्रविरोधापत्ते। नहि तेन व्यापारस्य प्रत्ययार्थता
लभ्यते। किञ्च पचति पक्ष्यति पक्त्वेत्यादौ फूत्कारादिप्रतीतये तत्रा
नेकप्रत्ययाना शक्तिकल्पनापेक्षयैकस्य धातोरेव शक्तिकल्पनोचिता।

त्यर्थ। तदेव दर्शयति तथाहीति। बोधजनकत्वसम्बन्धद्वयेति—बोधज
नकत्वस्य विषयाऽसम्बन्धेऽनुपपत्त्या तत्तत्समभिव्याहारविशिष्टधातौ विशिष्टार्थनिरू
पितवाच्यवाचकभावात्मकसम्बन्धद्वयकल्पनमावश्यकमित्याशय। ननु धात्वर्थ
शक्तिरिति प्राचां मतानुसारेणैवेयं पृथगुक्ति, स्वमते तु वाच्यवाचकभावात्मक
सम्बन्धस्यैव शक्तित्वे शक्तिद्वयकल्पनगौरवेणेद गतार्थमिति बोध्यम्।

धातुना शक्तिरिति—न च गुरुशक्तताऽवच्छेदकद्वयकल्पन प्रयुक्त गौरव
मिति वाच्यम्, प्रामाणिकत्वेनास्य गौरवस्याऽदोषावहत्वात्, अन्यथा गुरुवि
वेचिन्यकल्पनापत्तिरिति।

मीमासका इति—आभट्टमतीनिर्देशेन, आदरात्, प्रथमान्तरहाद्वा तेन
येन व्यापारमात्र प्रत्ययार्थ, व्यापारस्य च प्रत्ययेनैव लाभात्प्रकृत्यर्थ इति
तेषामाशय। नन्वु ल कर्मणीति सूत्रे कर्तृकर्मभेदे कर्तृत्वकर्मत्वयोरे आकृतिवादि
दात्। तथा च व्यापारभेदस्य कर्तृभेदार्थतेन 'प्रकृतिप्रत्ययोक्ते प्रकारीभूते ज्ञाने
इति सिद्धान्तेन कर्तृभेदावच्छेदकीभूतव्यापारस्य प्रत्ययार्थता सम्भवत्येवेति चेत्। सत्य
किञ्चेति। अनेकप्रत्ययानाम्—क्त क्तवतु लुडादीनामित्यर्थ।

ननु 'पठति' 'पचति' 'भवति'त्यादौ धातुभेदेनाऽकपाठना प्रकारे यदि

किञ्च फूत्कारादे प्रत्ययार्थत्वे गच्छतीत्यादौ तत्प्रतीतिवारणाय तद्बोधे पचिसमभिव्याहारस्यापि कारणत्वकल्पनेऽतिगौरवम्। किञ्च सकर्मकाकर्मकव्यवहारोच्छेदापत्ति। न च प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्, तन्मते तत्समानाधिकरणफलवाचकत्वमकर्मकत्वं च प्रत्ययार्थव्यापाराश्रयत्व कर्तृत्वम्, घट भावयतीत्यादौ णिजर्थव्यापार व्यधिकरणफलाश्रयत्वेन घटादे कर्मत्वमिति वाच्यम्। अभिधानानभि

कल्पनायामेव गौरवतरं प्रत्ययापेक्षया धातूनामाधिक्यादित्यत आह—किञ्चेति। फूत्कारादेरिति—फूत्कारत्वाधिश्रयणत्वादिविशेषधर्मपुरस्कारेणैव बोधस्यानुभवित्वात् पचतीत्यादौ प्रत्ययेन तथाबोधस्येष्टत्वे शक्तताऽवच्छेदकैक्यात् गच्छतीत्यादावपि तादृग्विशेषरूपप्रतीत्यापत्तिरिति तद्वारणाय तद्बोधे पचिसमभिव्याहारस्य नियामकत्वकल्पनेऽतिगौरवमिति भाव।

ननु व्यापारस्य धात्वर्थत्वमतेऽपि धातुत्वाऽवच्छिन्नस्य व्यापारत्वाऽवच्छिन्ने शक्तिरितिज्ञानमात्रेण तादृगनुभवसिद्धविशेषधर्मप्रकारकबोधस्याऽनिर्वाहेण तत्तद्धातूनामेव विशेषधर्मप्रकारकबोधे कारणत्व कल्पनीयमिति तुल्यमेव गौरवमित्यरुचेराह—किञ्च सकर्मकेति। उच्छेदेति—'स्वार्थव्यापारव्यधिकरणफलवाचकत्व सकर्मकत्वम्' 'स्वार्थव्यापारसमानाधिकरणफलवाचकत्वमकर्मकत्वम्' इतिलक्षणलक्षितव्यवहारयोर्व्यापारस्य धात्वर्थत्वाऽभावेऽसिद्धिरितिभाव।

ननु व्यापारस्य धात्वर्थत्वाऽभावे धात्वर्थव्यापाराश्रयत्वरूपकर्तृत्वाऽसिद्धिरितिचेदाह—प्रत्ययार्थेति।

ननु प्रत्ययार्थव्यापाराश्रयस्य कर्तृपदार्थत्वे 'घटं भावयती'त्याद्यसिद्धि, णिजर्थप्रेषणव्यापारस्य घटादावसम्भवेन कर्तृत्वाऽभावे गत्यादिसूत्रेण कर्मत्वाऽसिद्धेरित्यत आह—घट भावयतीति। कर्तुरीप्सितेति सिद्धि स्यादितिभाव। चिन्त्यमिदम्, पाचयति देवदत्तो यज्ञदत्तेनेत्यादौ गत्यादिनियमाऽप्राप्त्या कर्तुरिति कर्मत्वाऽऽपत्ते, कर्तरि तृतीयाऽनापत्तेश्च। स्वरूपव्याक्रियैव परव्याक्रियेतिन्यायेन तु ग्रन्थकृता नैतन्निराकृतमिति बोध्यम्।

अभिधानानभिधानेति—तिङ आश्रयार्थकत्वाऽभावे "तिङकृत्तद्धित समासै परिसङ्ख्यानमि"ति वार्तिकोक्तपरिगणनरीत्या आश्रयात्मकयो कर्तृकर्मणोस्तिङाऽभिधान न स्यादिति भाव।

घानव्यवधयोश्छेदापत्ते । न च व्यापारेणाऽऽश्रयाऽऽक्षेपात्कर्तुरभिधानम् । कर्मोच्यते च प्रधानेन फलेन स्वाश्रयाक्षेपात्कर्मणोऽभिधानमिति साध्यम् । जातिशक्तिवादे जात्याश्रिमव्यक्तेरिवाश्रयप्राधान्यापत्तौ "क्रिया प्रधानमाख्यातम्" इति यास्कवचोविरोधापत्ते । किञ्च फलस्य धातुना तदाश्रयस्य चाक्षेपेणैव लाभसम्भवेन ल कर्मणीत्यस्य वैयर्थ्यापत्ते । कर्तृकृता कारकभावनोभयवाचकत्वे गौरवाच्च । किञ्च भावविहितप्रत्ययादीनां व्यापारावाचकत्वे ग्रामो गमनवानित्यादापत्ति तद्वाचकत्वे तु तेनापि स्वाश्रयाक्षेपे कर्तुरभिधानापत्ति । किञ्च गुरु शिष्याभ्यां पाचयतीत्यादौ हेतुमति चेतिसूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार आख्यातार्थो वाच्य । एवञ्च मुद्गपाया स्वस्वाचकत्वात्तृतीयार्थव्यापारेऽन्वयिन्येवाऽऽश्रयाच्छिष्याभ्यामिति द्विवचनानापत्ति । पाचयतीत्येकवचनानापत्तिश्च । गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेरेव शिष्यादुद्वात्तदापत्तेश्चेत्यन्यत्र विस्तर ।

आक्षेपात्कर्तुरिति—अभिधानस्य न शक्तिमद्जन्यापरोक्षतिविषयत्वेन, किन्तु बोधविषयत्वमात्रम् । अनुमितिरूपाबोधविषयत्वेऽपि तत्त्वमस्त्येवेति तात्पर्य ।

ननु जातिशक्तिवादे 'घटो नष्टः' इतिव्यवहारबलेन आश्रिताभेदस्य प्रामाण्येऽपि मते तस्य प्राधान्ये मानाभाव', प्रत्युत यास्कवचोऽनुरोधेन तस्यैव गौणत्वमेव स्यादित्यत आह—किञ्च फलस्येति । गौरवाच्चेति—यैराकरणानां मते केवलाभवनावाचकत्वमितिलाघवम् । कृतां कारकभावनोभयवाचकत्वं विना केवलभावनावाचकत्वमिति मीमांसकानां यैरपि निगूढमपीत्युपहासोऽप्यत्र ध्वन्यते ।

ननु ग्रामादि भावनावाचकत्वमेव, न्याभयस्य चाक्षेपेणैव प्रतीतिसम्भवादिति चेदाह—किञ्च भावेति । ग्रामोगमनवानिति—ग्रामः क्रियाश्रयत्वेनाक्षिप्त इति भाव । अभिधानापत्तिरिति—तथा च चैत्रस्य गमनमित्यादावनभिहिते सत्तमप्रत्ययापत्त्या प्रथमाया अवाचिरचेति भाव ।

व्यापारान्वयिन्येवान्वयेति—एकत्रत्ययोगाऽन्यत्रप्रत्ययो वा कल्पनागौरवेणैवान्वय स्यादिति भाव । गुरोरनभिधानेनेति—द्विवचनानापत्तेरिति भाव । प्रयोज्यव्यापारस्य गुरुत्वभावेनाभवादेवेति यत्नानभिधानमेव, किन्त्वेक

घुद्वया प्रकल्पिताभेद क्रियेति व्यपदिश्यते ॥

इति भूवादिसूत्रस्यभाष्यार्थप्रतिपादकहरिमन्यात्। क्रमजन्मना ग्वा पाराणा समूह प्रति गुणभूतैरवयवैर्युक्त सकलनात्मिकयैकत्वबुद्धया प्रकल्पिताऽभेदरूप समूह क्रियेति व्यवह्रियत इति द्वितीयकारिकार्थं। अत्राऽवयवाश्रय पौर्वापर्य्यं समुदायाश्रयमेकत्वम्। क्षणनश्वराणा ग्वा पाराणा वस्तुभूतसमुदायाभावात् बुद्ध्येत्युक्तम्। पचति पक्ष्यतीत्यादावसिद्ध अपाक्षीदित्यादौ सिद्धमसिद्ध वा साध्यत्वेनाभिधीयमान क्रिया। आ श्रितेति योगदर्शन कृतम् अवयवाना क्रमेणोत्पत्या। अतएवागामिक्रम रूपा क्रियेत्यादिप्रथमकारिकार्धं। एकैकावयवेऽपि समूहरूपारोपादपिशय णकालेऽपि पचतीति व्यवहार। तदुक्तम्—

एकदेशे समूहे वा व्यापाराणा पचादय।
स्वभावत प्रवर्तन्ते तुल्यरूप ममाश्रिता ॥ इति।

मानवस्तुविशेषैः, (उपलक्षित) क्रमजन्मनाम् = क्रमिकोत्पत्तिमत्ता पूर्वभाग दीना, (समूह इत्यन्वयीदम्) घुद्वया = संकलनात्मकान्त करणबुद्ध्या, प्रकल्पि ताऽभेद = प्रकल्पितः प्रतीतिविषयीकृत अभेद एकत्वम् (अवयवानामेव) यत्र तादृश समूहः (इदं क्रमजन्मनामित्यन्वयि) 'क्रिया'इति व्यपदिश्यते व्यवहियते आचार्यैरिति शेष इत्यर्थं। वस्तुभूतसमुदायाऽभावात् बुद्ध्येत्यस्य निरूपणप्रस्तावे उपपादा यणीयमिति भावः। क्रियेत्यभिधाने हेतुमाह— आश्रितेतियोगदर्शनमिति। चिन्त्यमिदम्, "कृञः श च" इति सूत्रेण श्नभाग मधि णिग्यन्तस्य 'क्रिया' शब्दस्य अवयवार्थनिरूपितयत्किरूपयोगेन क्रमवरर्थं कत्वाऽलाभात्। अथवा क्रमजन्मन्यर्थे क्रमशब्दात्पूर्वादीनीतिसूत्रेण क्रिया शब्दस्य जायते स्यादिति। इदमप्याऽकोपेन्—यद्य च न क्रमिकोऽवयवानां पारस्तत्र स्थितेरादरणीया, पौर्वापर्यारोपो वा। पक्षस्याऽपि स्वगतक्रमाभाव गतपौर्वापर्यापेक्षया क्रियात्वेनैव भानम्। अतएव कर्मकर्तरि पक्ष्यते वस्तुत स्तण्डुलैरेत्यादौ पक्त्रादे पक्षमाश्रयत्वे भावुकमतसिद्धि, कारकाणा क्रियै वान्वय इति नियमश्च संगच्छते। अन्यथा कर्मकरणस्य पक्षेनैवाऽन्वयलाभा दिति पदम्। समूहरूपारोपादिति—आगमे च प्रतीतिरेव शरणम्। न

अत्र केचित्--सिद्धत्व क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वयायोग्यत्वम्। साध्यत्वं च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदक सत् कारकान्तरान्वययोग्यतावच्छेदकरूपवत्त्वम्। हिरुगाद्यव्ययाना साध्यत्वाभावेऽपि क्रियावाचकत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात्। तत्र सिद्धत्व पाक इत्यादौ घञादिवाच्यम्। साध्यत्व तु सर्वत्रैव धातुप्रतिपाद्यम्।

ननु हरिं नमेच्चेत्सुख यायात् इत्यत्रापि क्रियान्तराकाङ्क्षत्वेन सिद्धत्वमस्ति इति चेन्न। चेच्छब्दसमभिव्याहारेणाकाङ्क्षोत्थापनात् इत्याहु ।

च तथा सति गौणार्थत्वाऽऽपत्तिरिति वाच्यम् तदतिरिक्तमुख्यार्थाऽप्रसिद्धया तस्य गौणत्वाऽभावात्, यस्य हि मुख्योऽन्योऽर्थस्तस्यैवेदृशस्य गौणत्वात्।

ननु 'साध्यत्वेनाऽभिधीयमान क्रियेत्युक्त, तत्र साध्यत्व किंस्वरूपमिति जिज्ञासायामाह—अत्र केचिदिति। अत्र=साध्यत्वप्रसङ्ग इत्यर्थ। साध्यत्व वैपरीत्यपरिचिकीर्षयाऽऽह—सिद्धत्वमित्यादि—अत्र लक्षणे विशेष्यप्रयोगमात्रेण निर्वाहेऽपि सत्यन्तविशेषणदलद्वयं स्वरूपपरिचायकमात्र बोध्यम्। क्रियाऽन्तरेत्यन्तरपदेन क्रियात्वमपि लक्षणघटकमिति सूच्यते, अन्या क्रिया क्रियान्तरम्, कस्या अन्या, स्वस्या इतिव्युत्पत्ते। यद्यपि द्रव्यादावपि सिद्धत्वमिष्ट तथाऽपि अत्र सिद्धक्रियालक्षणमेव चिकीर्षितम्। वस्तुतस्तु अन्तरपदमधिकमेवात्र, द्रव्यादेरेव सिद्धत्वस्येष्टत्वात्। घञादिवाच्यक्रियायास्तु सिद्धतुल्यत्वमेव, "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इति भाष्येण तथैव बोधनात्। अत एव मञ्जूषायामन्तर शब्दरहित एव पाठ। साध्यत्वञ्च क्रियान्तरेति—अत्र अन्तरपद युक्तमेव, क्रियाया एव साध्यत्वेन बोधात्।

ननु हिरुगाद्यर्थस्य क्रियान्तराऽऽकाङ्क्षादर्शनेन साध्यत्वाऽभावे साध्यात्मक क्रियावाचकत्व व्यवहारोऽनुपपन्न इत्यत आह—हिरुगादीति। तत्र=तयोर्मध्ये। क्रियाया अपि इति—क्रियाया धातुवाच्याया अपीत्यर्थः।

ननु साध्यत्व यदि क्रियान्तराकाङ्क्षाऽनुत्थापकताऽवच्छेदक तर्हि 'पचति भवती'त्यादि भाष्योक्तवाक्ये 'भुक्त्वा गच्छती'त्यादौ च भवतिभुक्त्वेत्यादीना क्रियाऽन्तराकाङ्क्षादर्शनेन कारकाऽन्वयानापत्तिः धातुत्वाऽनापत्तिश्चेत्यत सिद्धान्तमाह—

वस्तुतः साध्यत्व निष्पाद्यत्वमेव तद्रूपेणैव बोध्य । स्पष्ट चेदमुत्तरत्र मतिङ्त्यादौ भाष्ये ।

ननु घटं करोतीत्यादौ द्रव्यस्यापि साध्यत्वेन प्रतीतिरिति चेन्न, कर्तृपदादिसमभिव्याहारात्तथा प्रत्ययेऽपि स्वतो घटादिपदाद् द्रव्यस्य सिद्धत्वे नैव प्रतीते । अस्ति - भवति वर्तते विद्यतीनामर्थः सत्ता । सा चानेक कालस्थायिनीति कालगतपौर्वापर्येण क्रमवतीति तस्या क्रियात्वम्, सत्तोद्भूतत्वधारणम् । अकर्मकत्वञ्च फलव्यधिकरणव्यापारवाचकस्य फल समानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । क्वचित्तु फलाशाभावाद् अकर्मकत्वम् । यथाऽस्त्यादौ केवल सत्तादिरेवार्थः । फलाशस्य सूक्ष्मरूपेणाप्यप्रतीतेः । उत्पन्नस्य सत्त्वस्य स्वरूपधारणरूपा सत्तासामान्येऽस्त्यादिरिति निरुक्तिश्च ।

वस्तुत इति । तद्रूपेणैव = निष्पाद्यस्वरूपसाध्यत्वप्रकारक एवेत्यर्थः । स्पष्टमेवमु इति—इदं निष्पाद्यस्वरूपसाध्यत्वप्रकारकज्ञानम्, पक्वादिशब्दकिंचा सिद्धरूपत्वम्, धात्वाख्यक्रियाया साध्यरूपत्वञ्चेत्यर्थः । इत्यादाविति—आदिना "सु'कार्मूर्यः" इति पदमूह्यते । भाष्ये इति—तत्र हि—"यूय भ्रू साधनेन युज्यते, पश्चादुपसर्गेण । साधन हि क्रियां निर्वर्तयति, सामुपसर्गो विधि नाटि । अभिनिर्वृत्तस्य चायस्थानुपसर्गेण विशेष शक्या वक्तुम्" इत्युक्तम् । "प्र मिहिता मायो द्रव्यवद्भवति" इति चोक्तम् । अत्राद्यमाद्य 'साधनं हि क्रियां निर्वर्तयती'त्यनेन धात्वाख्यक्रियाया निष्पाद्यस्वरूपसाध्यत्वेन भानमिति फलति भवति । द्वितीयमाद्येन च पक्वादिशब्दक्रियाया सिद्धत्वमिति च फलतीति । विस्तरेण तूपसर्गवादे निरूपयिष्यामः ।

प्रसङ्गादाह—अस्तिभवतीत्यादि । ननु सत्तायें कथमाख्यात, अभिधेयक्रियात्वाद्धातुरवधिरित्यत आह—साधनैककालेति । कालगतपौर्वापर्येण क्रमवत्त्वं कालगतपौर्वापर्यानवच्छेदकत्वम् । न च गौरवमुक्तं बाधात् ।

प्राचां मतेनाह—सकर्मकत्वञ्चेति । क्वचित्तु फलेति—नन्वत्रापि कथमाख्यातानुपपत्तिरित्यत्राह, यत्नः, फलविधिरूपव्यापारोद्देश्यकत्वमकर्मकत्वम् । वैयधिकरण्येनेत्यनुषङ्गः ।

वस्तुतस्तु शाब्दशाब्दीयकर्मसङ्गकार्थान्वयव्यर्थकत्व सकर्मकत्वम्। तदनन्वयव्यर्थकत्वमकर्मकत्वम्। तेन 'अध्यासिता भूमय' इत्यादिसिद्धि'। अन्वयश्च पृथग्बुद्धेन ससर्गरूप। अन्वयपदस्य तत्रैव व्युत्पत्ते। तेन जीव तीत्यादौ न दोप। तत्र प्राणादिरूपकर्मणो धारणार्थधात्वर्थात्पृथगबोधात् इति 'सुप आत्मन इति' सूत्रे भाष्ये स्पष्टम्। अधिशीङ्स्थेत्यनेन भूमय इत्याधारस्य कर्मत्वम्। जानातेर्विषयतया ज्ञान फलम्। आत्ममन सयोगो व्यापार'। अतएव मनो जानातीत्युपपद्यते। आत्मान्तःकरण मनोऽपि तद्वृत्तिविशेषरूपम्। आत्मा आत्मान जानातीत्यादौ अन्तःकरणावच्छिन्न कर्त्ता शरीरावच्छिन्न कर्मेति कर्मवत्सूत्रे भाष्ये स्पष्टम्।

ननु देशकालादिकर्मकधातुषु अधिशीङादिषु चेदकसकर्मकत्वाऽव्याप्ति फल व्यधिकरणव्यापारवाचकत्वाऽभावात्, तथा च तेभ्यः कर्मणि लकारो न स्यात्। अकर्मकत्वाऽनुगमायं तादृग्वैशिष्टयनिवेशे गौरवञ्चेति सिद्धान्तमाह—वस्तुतस्तु शब्देति। पृथग्बुद्धेन=पृथगुपस्थितेन। व्युत्पत्ते=योगशक्तेरित्यर्थ। सुप आत्मन इति सूत्रे भाष्ये इति—तत्र हि "अथाऽस्य क्रियाजन्तस्य कानि साधनानि भवन्ति? भाव कर्ता च। अथ कर्म? नाऽस्ति कर्म। ननु चायमपि सकर्मको यस्याऽयमर्थे क्रियाविशेषोयते? अभिहित तत्कर्मान्तर्भूत धात्वर्थं सम्पन्नो न चेदानीमन्यत्कर्माऽस्ति येन सकर्मक स्यात्। कथ तर्ह्ययं सकर्मको भवति—अपुत्रं पुत्रमिवाचरति पुत्रीयति माणवकमिति? अस्त्यत्र विशेषो—द्वे ह्यत्र कर्मणी उपमानकर्मोपमेयकर्म च। उपमानकर्माऽन्तर्भूतम्। उपमेयेन कर्मणा सकर्मको भवति।" इत्युक्तम्।

वक्ष्यमाणनैयायिकमतं कटाक्षयन्नाह—जानातेरिति। फलताऽवच्छेदकसम्बन्धमाह—विषयतयेति। तृतीयार्थोऽवच्छिन्नत्वम्-विषयतासम्बन्धाऽवच्छिन्न ज्ञानाऽनुकूलव्यापारो धात्वर्थ इति भाव। आत्ममन सयोग इति-आत्माऽत्र तत्तदिन्द्रियाण्युपलक्षणम्—"मनसा सयुक्तानीन्द्रियाण्युपलब्धौ कारणानि भवति" इति "लिट" सूत्रे भाष्योक्तेरित्यन्यत्र विस्तर।

कर्मवत्सूत्रे भाष्ये इति—तत्र हि "सिद्धन्तु प्राकृतकर्मत्वात्। सिद्धमेतत्। कथम्? प्राकृतकर्मत्वात्, प्राकृतमेवैतत्कर्म। यथा कटं करोति, शकटं करोतीति।

यच्चु आवरणभङ्गो विषयता वा फलम्, व्यापारस्तु ज्ञानमेवेति। तन्न। कर्मस्थक्रियकत्वापत्ते। तद्व्यवस्थाचेत्या मुक्ता हरिणा—

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था तन्येषा शब्दैरेव प्रकल्पिता॥ इति।

अस्यार्थः—यत्र कर्मणि कर्तरि वा क्रियाकृतो विशेषः करिष्यद् दृश्यत, तत्र क्रिया व्यवस्थितेत्युच्यते। न चैष पच्यादिकर्तर्यपि ममादित्यविशेषाय दर्शनादिदमयुक्तम्। किञ्च चिन्तयति पश्यतीत्यादीना कर्तृस्थभावकत्वा नुपपत्ति। कर्तरि क्रियाकृतविशेषाभावात्। अत्र आह—अन्येषामिति। मत इतिशेषः। यत्र कर्तृकर्मसाधारणरूप फल शब्देन प्रतिपाद्यते, स कर्तृस्थ

कथ पुनर्ज्ञायते—साधनमेवैतत्कर्मेति। आत्मसंयोगेऽकर्मकर्तृ कर्मदर्शनात्। आत्मसंयोगेऽकर्मकर्तृ कर्म दृश्यते। कथ। हन्त्यात्मानं, हन्यत आत्मेति। निदर्शनोपन्यासः। हन्त्यात्मानमिति कर्म दृश्यते, कर्ता न दृश्यते। आत्मना हन्यत इति च कर्ता दृश्यते कर्म न दृश्यते। पदलोपश्च। पदलोपश्चायं द्रष्टव्यः। हन्त्यात्मानमात्मा, आत्मना हन्यत आत्मेति। क पुनरयमात्मानं हन्ति, को वाऽनेन हन्यते। द्वावात्मानौ, अन्तरात्मा शरीरात्मा च। अन्तरात्मा सत्कर्म कृतं देन शरीरात्मा सुखदुःखे अनुभवति, शरीरात्मा सत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति।" इत्युक्तम्।

नैयायिकमतमाश्रित्य खण्डयति—यत्तु इति। कर्मस्थक्रियकत्वापत्तेरिति—आयते पर स्वयमेवेऽवयवेरिति भाव। तदुपरिमेव विवृणोति—तद्व्यवस्था चेति। श्लोकस्थमेत्यस्य विवरणमाह—कर्मणि कर्तरि वा इति। यत्र कर्मणि कर्तरि चेत्यर्थः। अन्येषामिति मतोक्तियुतो बीजमाह—अन्येषमिति। दृश्यमुक्तम् इति—दृश्यते खेन खिदादिनेति भावः। कर्तृस्थभाव कत्वाऽनुपपत्तिरिति—यदा च कर्तृस्थभावकत्वेन साध्यत्वाभिप्रायस्तदा वैयर्थ्यमिति भाव। अन्येषामिति=क्षित्यादिनाभिमतेत्यर्थः। इदमेव मतं मुक्तम् उपयुक्तेतिपदेन। शब्देरेवेति श्लोके धात्वानन्तरशब्देरेवेत्यर्थः। तस्य भावमाह—यत्र कर्तृकर्मसाधारणेति। शब्देन=धातुनेत्यर्थः। श्लोके शब्देरेवेत्येव शब्देन कर्तृकर्मवृत्तिविशेषदर्शनस्य स्वरूपभेदः। प्रतिपाद्यते=ज्ञाप्यत इत्यर्थः।

भावक, यथा पश्यति घट, ग्राम गच्छति,हसतीत्यादौ । तत्र विषयतासमवायाभ्या ज्ञानमुभयनिष्ठ सयोगश्चोभयनिष्ठ । एव हसोपि, नहि विषयतावरणभङ्गावेवम् । यत्र कर्तृवृत्तिकर्मस्थफल सकर्मस्थभावक , यथा भिनत्तीत्यादौ । नहि द्विधाभवनादि कथमपि कर्तृनिष्ठमिति हेलाराज । तथा चावरणभङ्गस्य विषयतायाश्च कर्ममात्रनिष्ठत्वाज्ज्ञानातेरपि कर्मस्थक्रियत्वापत्तिरित्यलम् । इच्छतेरिच्छानुकूल ज्ञानमर्थ । अतीतानागतयोरपि बुद्ध्युपारोहात् फलशालित्वम् । पतिर्गमिवत्सकर्मक । नरक पतित इत्यादिप्रयोगात् । विभागजन्यसयोगमात्रपरत्वेऽकर्मक इति । कृञ उत्पत्तिव्यधिक

शक्त्या उच्यते इत्यर्थस्तु न, फालिकादिसम्बधेन पच्यादौ फलाश्रयस्य कर्मत्ववारणाय फलताऽवच्छेदकसम्बधेन फलाश्रयस्य कर्मत्वसिद्धये धातूना तत्तत्सम्बधविशिष्ट एव फले शक्तिस्वीकारेण पश्यतीत्यादावपि विषयतासम्बधाऽवच्छिन्न फलस्यैव शक्त्या बोधनेन फलस्य कर्ममात्रवृत्तित्वेनाऽतिप्रसङ्गात् । यथाकथञ्चिद्बोधविषयत्वे तु शक्त्या फलस्य कर्ममात्रनिष्ठत्वबोधेऽपि तत्र फलस्य समवायरूप वृत्तिनियामकान्तरसम्बधेनाऽन्यत्रापि सत्त्वान दोष फलताऽवच्छेदकसम्बधस्याऽऽकाङ्क्षामाप्यत्वे तु यथाश्रुतार्थ एव रमणीय । उभयनिष्ठम्=कर्तृकर्मनिष्ठमित्यर्थ । नहि विषयतेति—विषयतायाश्चावरणभङ्गस्य च कर्ममात्रनिष्ठत्वमितिभाव । प्रसङ्गादाह—२च्छतेरिति । अत्र ज्ञान व्यापाररूपम् ।

प्रसङ्गादेवाह—पतिरिति । नरक पतित इति—विभागजन्याऽधोदेशानुयोगिकसयोगानुकूलव्यापाररूपपतधात्वर्थप्रयोज्यसयोगरूपफलाश्रयत्वेन कर्तुरीप्सितेति नरकस्य कर्मसज्ञया कर्मसज्ञकायाऽन्वय्यर्थकत्वेन पतधातो सकर्मकत्वमिति बोध्यम् । अत एव द्वितीयाश्रितेति पतितशब्दयोगे समासविधान सङ्गच्छते । विभागजन्येति—वृक्षमजहत्यपिभूमिं स्पृशति पर्णे वृक्षात्पर्णं पततीत्यप्रयोगात्तत धात्वर्थे विभागजन्यत्वप्रवेशस्याऽऽवश्यकत्वादिति भाव । सयोगमात्रेति । अत्र मात्रपदेन तदनुकूलव्यापारस्य व्यवच्छेद अत्र सयोग एव व्यापार इति भाव । अकर्मक इति—फलाश्राऽभावेन अस्त्यादिवत् कर्मणोऽभावात्तदनन्वय्यर्थकत्वेनाऽकर्मकत्वमिति बोध्यम् । शिष्टप्रयोगदर्शनमत्र मूलम् । प्रसङ्गादाह—कृञ इति । उत्पत्तिव्यधिकरणेति—अस्य ग्रन्थस्य नैयायिकमतमर्दनपरत्वेन

यत्तु आवरणभङ्गो विषयता वा फलम्, व्यापारस्तु ज्ञानमेवेति। तन्न। कर्मस्थक्रियकत्वापत्ते। तद्व्यवस्थाचेत्था मुक्ता हरिणा—

विशेषदर्शन यत्र क्रिया तत्र व्यवस्थिता।
क्रियाव्यवस्था त्वन्येषा शब्दैरेव प्रकल्पिता॥ इति।

अस्यार्थः—यत्र कर्मणि कर्तरि वा क्रियाकृतो विशेषः क्वचिद् दृश्यते तत्र क्रिया व्यवस्थितेत्युच्यते। नन्वेष पच्यादिकर्तर्यपि श्रमादिरूपविशेषस्य दर्शनादिदमयुक्तम्। किञ्च चिन्तयति पश्यतीत्यादीना कर्तृस्थमावकत्वा नुपपत्ति। कर्तरि क्रियाकृतविशेषाभावात्। अत आह—अन्येषामिति। मत इतिशेषः। यत्र कर्तृकर्मसाधारणरूप फल शब्देन प्रतिपाद्यते, स कर्तृव्य

कथ पुनर्ज्ञायते—माकृतमेवैतत्कर्मेति। आत्मसयोगेऽकर्मकर्तुः कर्म दृश्यते। क्व। हन्त्यात्मान, हन्यत आत्मेति। विषम उपन्यास। हन्त्यात्मानमिति कर्म दृश्यते, कर्ता न दृश्यते। आत्मना हन्यत इति च कर्ता दृश्यते कर्म न दृश्यते। पदलोपश्च। पदलोपश्चात्र द्रष्टव्य। हन्त्यात्मानमात्मा, आत्मना हन्यत आत्मेति। क पुनरात्मानं हन्ति, को वाऽऽत्मना हन्यते। द्वावात्मानौ, अन्तरात्मा शरीरात्मा च। अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति, शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति।" इत्युक्तम्।

नैयायिकमतमनूद्य खण्डयति—यत्तु इति। कर्मस्थक्रियकत्वापत्तेरिति—'ज्ञायते घट स्वयमेवे'त्यापत्तेरिति भाव। तदापत्तिमेव विशदयति—तद्व्यवस्था चेति। श्लोकस्थयत्रेत्यस्य विवरणमाह—कर्मणि कर्तरि वा इति। यत्र=कर्मणि कर्तरि चेत्यर्थः। अन्येषामिति मतोक्तितो बीजमाह—नन्वेवमिति। इदमयुक्तम् इति—पच्यते ओदन इत्यस्याऽसिद्धेरिति भाव। कर्तृस्थभावकत्वाऽनुपपत्तिरिति—तथा च कर्तृस्थभावकत्वेन भाष्यवार्तिकहृदयव्यवहारोऽसङ्गतिरिति भाव। अन्येषामिति=सिद्धान्तिनामितीत्यर्थः। इदमेव मतं दुष्टम्, उक्तयुक्तेरितिशब्दम्। शब्दैरेवेति श्लोके धात्वात्मकशब्दैरेवेत्यर्थः। तस्य भावमाह—यत्र कर्तृकर्मसाधारणेति। शब्देन=धातुनेत्यर्थः। श्लोके शब्दैरेवेत्यत्र शब्देन कर्तृकर्मइतिविशेषदर्शनस्य व्यवच्छेदः। प्रतिपाद्यते=धात्वर्थ इत्यर्थः।

भावक, यथा पश्यति घट, ग्राम गच्छति,हसतीत्यादौ । तत्र विषयतासम वायाभ्या ज्ञानमुभयनिष्ठ सयोगश्चोभयनिष्ठ । एव हसोपि, नहि विषयता वरणभङ्गावेषम् । यत्र कर्तृवृत्तिकर्मस्थफल सकर्मस्थभावक , यथा भिनत्ती-त्यादौ । नहि द्विधाभवनादि कथमपि कर्तृनिष्ठमिति हेलाराज । तथा चावरणभङ्गस्य विषयतायाश्च कर्ममात्रनिष्ठत्वाज्ज्ञानातेरपि कर्मस्थक्रिय फत्वापत्तिरित्यलम् । इच्छतेरिच्छानुकूल ज्ञानमर्थ । अतीतानागतयोरपि बुद्ध्युपारोहात् फलशालित्वम् । पतिर्गमिवत्सकर्मक । नरक पतित इत्यादि-प्रयोगात् । विभागजन्यसयोगमात्रपरत्वेऽकर्मक इति । कुञ्च उत्पत्तिव्यधिक

शक्त्या उच्यते इत्यर्थस्तु न, कालिकादिसम्बन्धेन पच्यादौ फलाश्रयस्य कर्मत्व वारणाय फलताऽवच्छेदकसम्बन्धेन फलाश्रयस्य कर्मत्वसिद्धये धातूना तत्तत्सम्बन्ध विशिष्ट एव फले शक्तिस्वीकारेण पश्यतीत्यादावपि विषयतासम्बन्धाऽवच्छिन्न फलस्यैव शक्त्या बोधनेन फलस्य कर्ममात्रवृत्तित्वेनाऽतिप्रसङ्गात् । यथाकथञ्चि द्बोधविषयत्वे तु शक्त्या फलस्य कर्ममात्रनिष्ठत्वबोधेऽपि तत्र फलस्य समवायरूप वृत्तिनियामकान्तरसम्बन्धेनाऽन्यत्रापि सत्त्वान दोष फलताऽवच्छेदकसम्बन्धस्याऽऽ काङ्क्षामाप्यत्वे तु यथाश्रुतार्थ एव रमणीय । उभयनिष्ठम्=कर्तृकर्मनिष्ठमित्यर्थ । नहि विपयतेति—विषयताया आवरणभङ्गस्य च कर्ममात्रनिष्ठत्वमितिभाव । प्रसङ्गादाह—इच्छतेरिति । अत्र ज्ञान व्यापाररूपम् ।

प्रसङ्गादेवाह—पतिरिति । नरक पतित इति—विभागज याऽधोदेशानु योगिकसंयोगानुकूलव्यापाररूपपतधात्वर्थप्रयोज्यसंयोगरूपफलाश्रयत्वेन कर्तुरीप्सितेति नरकस्य कर्मसंज्ञया कर्मसञ्ज्ञकार्याऽन्वय्यर्थकत्वेन पतधातो सकर्मकत्वमिति बोध्यम् । अत एव द्वितीयाश्रितेति पतिवशब्दयोगे समासविधान सङ्गच्छते । विभागजन्येति—वृक्षमजहत्यपिभूमिं स्पृशति पर्णं वृक्षात्पर्णं पततीत्यप्रयोगात्तत-धात्वर्थं विभागजन्यत्वप्रवेशस्याऽऽवश्यकत्वादिति भाव । सयोगमात्रेति । अत्र मात्रपदेन तदनुकूलव्यापारस्य व्यवच्छेद अत्र सयोग एव व्यापार इति भाव । अकर्मक इति—फलांशाऽभावेन अस्त्यादिवत् कर्मणोऽभावात्तदनन्वय्यर्थ फत्वेनाऽकर्मकत्वमिति बोध्यम् । शिष्टप्रयोगदर्शनमत्र मूलम् । प्रसङ्गादाह—कुञ्च इति । उत्पत्तिव्यधिकरणेति—अस्य ग्रन्थस्य नैयायिकमतमर्दनपरत्वेन

पचते देवदत्ताय देहीत्यादौ शतृशानजादीनामपि तिपादियलादेशादि शेषेण तेभ्य कृतिमात्रबोधापत्तेश्च । नचेष्टापत्तिराश्रयिभावेन कर्मणि सम्प्रदाने च कृतेरन्वयात् इति वाच्यम् । नामार्थयोरभेदान्वयो व्युत्पन्न इति व्युत्पत्तिभङ्गापत्ते । ननु फलमुखगौरव न दोषाय इति न्यायेन शप्रादीना कर्तरि शक्ति तिपादीना कृतावेव इति चेन्न । स्थान्येव वाचको लाघवात् आदेशाना महत्त्वेन तेषा वाचकत्वे गौरवमिति हि तत्र मतम् । एव च तिपादीना शप्रादीना च स्थान्यर्थस्मारकतया लिपिस्थानीयत्व बोधकस्तु लकार एव । स च शप्रायन्ते कर्तरि शक्तस्तिबाद्यन्ते कथ कृति बोधयेत् । 'अन्यायश्चानेकार्थत्वम्' इति न्यायात् ।

ननु ल कर्मणीति सूत्रे फलकर्मपदे भावप्रधाने, कर्तृत्व कृति कर्मत्व फल, तयो शक्तौ सूत्रस्थरस । कर्मप्रत्ययान्ते पच्यते ओदनो देवदत्तेनेत्यादौ देवदत्तनिष्ठकृतिजन्यव्यापारजन्यविक्लित्तिमान् ओदन इति बोध। कर्तरि कृदिति सूत्रे तु कर्तरीति पदस्य धर्मिप्रधानत्वात् कृत्याश्रये शप्रादीना शक्तिरिति चेत्, कर्तरि कृदितिसूत्रे यत्कर्तृपदग्रहण तत्रैव ल कर्मणीति सूत्रे चकारानुकृष्टत्वेन भावप्रधानत्वे सूत्रान्तरभावात् शप्रादीना 'स्थान्यर्था

व्यत्वे तदभाव स्यादिति भाव । लादेशाऽविरोधेनेति—स्थान्यर्थेनैव निराऽऽकाङ्क्षत्वात् शतृशानजादीनामपि "ल कर्मणी"त्यनेनैव शक्तिनैव शक्तिग्रहो नतु "कर्तरिकृत्" इत्यनेन, आकाङ्क्षितविधानं न्याय इति न्यायादिति भाव । नामार्थयोरिति—इद पक्षितार्थनिवेदनम् । व्युत्पत्ते स्वरूपन्तु—नामार्थयो भेदेच शब्दान्वयोऽसुलभ इति । एतन्मूलञ्च—भेदसम्बन्धाऽवच्छिन्ननामार्थ निष्ठप्रकारतानिरूपितविशेष्यतासंसर्गेण शाब्दबुद्धित्वाऽवच्छिन्नं प्रति विशेष्यता सम्बन्धेण तत्प्रकृतिकप्रत्ययजन्यापस्थिति कारणमिति कार्यकारणभाव । अन्याय श्चेति—'सकृदुच्चारित शब्दः सकृदयं गमयतीतिभाष्यमूलकाऽयं न्याय । भाव प्रधानेति—"स्त्रियाम्" "द्व्येकयो" इतिसूत्रवदिति भाव । आकृतिरात्मिपाद इति मतिमाति । कर्तृत्व कृतिरिति—कृत्याश्रयभूते कर्तरि कृते प्रकारभूतस्य प्रकृतिजन्यधात्वे प्रकारो भाव इत्यभियुक्तोक्त्या कर्तृशब्दोत्तरभावप्रत्ययेन कृतेरपीति धानमिति भावः । एव फलाश्रयभूते कर्मणि पक्षस्य प्रकारीभूतत्वेन कर्मशब्दो

भिधानसमर्थस्यैवादेशत्वम्'इति न्यायेन स्थान्यर्थेन निराकाङ्क्षत्वादाकाङ्क्षितविधान ज्याय इति न्यायात् कर्तरि कृदित्यनेन शक्तिग्रहाभावाच्च ।

ननु नामार्थयोरभेदान्वयानुरोधात् शतृशानजादीना कर्तरि शक्ति रिति चेन्न । पचतिक्रिय पचतिरूप देवदत्त इत्याद्यनुरोधेन तिङ्कृदपि कर्तुरेव वाच्यत्वौचित्यात् । किञ्च कृतिवाच्यत्वे रथो गच्छतीत्यादौ आश्रये लक्षणास्वीकारे गौरवापत्ति । अभिहितत्वानभिहितत्वव्यवस्थोच्छेदापत्तिश्च । नच 'अनभिहिते' इति सूत्रस्थानभिहितसदृशकेऽप्यर्थेवर्णन मिति वाच्यम् । कृत्तद्धितसमासै सह्यथाभिधानस्याप्रसिद्धत्वात् । किञ्च यत्नोऽपि व्यापारसामान्य धातुत एव लभ्यते, स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली पचतीति कारक इत्यधिकारसूत्र भाष्यप्रयोगात् अनन्यलभ्यस्यैव शब्दार्थत्वात् कृतौ शक्तेरुक्तिसम्भव एव नेत्यलम् । आख्यातार्थे धात्वर्थो विशेषणमित्यस्य निराकरणमवशिष्यते । तथाहि । प्रकृत्यर्थप्रत्ययार्थयो सह्यर्थत्वे प्रत्ययार्थस्यैव प्राधान्यमित्युत्सर्ग । पाचक औपगव इत्युदाहरण, पाककियाश्रय उपगुसम्बन्ध्यभिन्नापत्यमिति प्रत्ययार्थस्य प्राधान्य तयोरर्थे । तत्रापि प्रत्ययवाच्यस्यैवार्थस्य प्राधान्य,

---

त्तरभावप्रत्ययेन फलस्याऽभिधानम् । शतृशानजादीनामिति—भावार्थकलकार स्थानिकभिन्नानामितिशेष तेन 'देवदत्तेन शप्यमाने' इति प्रयोगाऽसङ्गतिर्न । दूषणान्तरमाह—किञ्चेति । अभिहितत्वेति—कृतेर्वाच्यत्वे तिङाकारकस्याऽभिधानाऽप्रसिद्धेरिति भाव ।

ननु अनभिहिते कर्मणि कर्मत्व इत्याद्येवार्थेति चेदाह—किञ्चेति । स्थालीस्थ इति—भाष्ये यद्यपि नेद वाक्यस्वरूपमेकस्थानाऽवच्छेदेन लभ्यते, तथापि तत्र स्थानद्वयाऽवच्छेदेन तल्लभ्यत एवेति तत एव द्रष्टव्यम् ।

प्रकृतिप्रत्ययेति—'प्रकृतिप्रत्ययौ सह्यर्थं वृत्तस्तयो प्रत्ययार्थस्य प्राधान्यम्' इति हि व्युत्पत्तिस्वरूपम् । सह्यर्थ निरूप्यनिरूपकभावापन्नमर्थमित्यर्थ । अस्या व्युत्पत्तौ मूलञ्च—प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंसर्गेण शाब्द बुद्धित्वाऽवच्छिन्न प्रति विशेष्यतासंसर्गेण प्रत्ययजन्योपस्थिति कारणमिति कार्यकारणभाव । वृत्तस्तु =सामान्यशास्त्रम् । अपवाद इति—तत्कृत्काऽऽवश्य

सुपन्त हि यथानेकं तद्धन्तस्य विशेषणम् ।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम् ॥ इति ।

वार्किकमते तु अन्यनेशसयोगानुकूलकृतिमन्मृगकर्मक प्रेरणाविषयीभूतं यद्दर्शन तदनुकूलकृतिमास्त्यमितिबोध । तन्न । विशेष्यभूतार्थधात्वर्थक मृग शब्दस्य प्रातिपदिकत्वात् दृशिक्रियाकर्म्मत्वाच्च द्वितीयापत्तौ धावन्तं मृग पश्येतिवत् पश्य मृगं धावतीत्यापत्ते । किञ्चाप्रयमासमानाधिकरणे शतृशानचोर्नित्यत्वादेव प्रयोगविलयापत्तेश्च । ननु विशिष्टार्थबोधकस्य धावति मृग इति वाक्यस्य कर्म्मत्वेऽपि पृथग् मृग इत्यस्य प्रातिपदिकस्य कर्म्मत्वाभावान द्वितीयेति चेन्न । 'अनभिहिते' इत्यधिकारसूत्रप्रघट्टके अभिधानञ्च विकृत्तद्धितसमासैरित्येतत्परिगणनप्रत्याख्यानपरभाष्यरीत्या द्वितीयापत्ते । तथाहि—कट भीष्म कुर्वित्यादौ विशेष्यकटशब्दादुत्पन्न द्वितीयया कर्म्मत्वस्योक्तत्वात् विशेषणीभूतभीष्मशब्दाद् द्वितीया न स्यादत परिगणन भाष्ये कृतम् । तत्प्रत्याख्यानञ्च सर्वकारकाणा साक्षात्स्वाश्रयद्वारा वा अरुणाधिकरण न्यायेन भावनान्वयस्वीकारात् । अत एवोक्त भाष्ये-कटोऽपि कर्म्म भीष्मादयोऽपीति, तत्र कटनिष्ठकर्म्मत्व स्कायपि भीष्मत्वादिगुणविशिष्टकर्म्मत्वानुपपत्तेस्तस्माद्द्वितीयेतितात्पर्यम् । उभयो पश्चात्परस्परमन्वयस्तु विशेष्यविशेषणभावेन । अयमेवान्वय पार्ष्णिक इत्युच्यते । एतमेवान्वयोऽरुणाधिकरणे "अरुणया पिङ्गाक्ष्यैकहायन्या गवा सोमं क्रीणाति" इत्यत्र क्रयणक्रियाया मीमासकैस्वीकृतत्व स्माद्धावति मृग इत्यत्र उभयो कर्म्मत्वे धावतीत्यस्य प्रातिपदिकस्वाभावाद् विशेषणत्वेनान्यत्र निराकाङ्क्षत्वाच्च द्वितीयोत्पत्त्यभावेऽपि मृगशब्दाद् द्वितीया दुर्वारैवेत्यवेहि । वार्त्तिकमते तु क्रियाविशेषत्वेनेतरार्थे निरा

पचति, भवति पचति, भवत्यपाचीदिति । एवैवा याचष्टे—पच्यादय क्रिया भवन्ति क्रियाया कर्म्मो भवन्ति" इत्युक्तम् । अत्र क्रियो. क्रियाकारकभावेनाऽन्वयाङ्गीकारापेक्ष्यन्वादेन परस्य मृगो धावतीत्यर्थानि तथा बोध इष्ट एवेति भाव । प्रेरणाविषयीभूतमिति—इष्टसाधनीभूतमिति भाव, तार्किकाणा मते तस्यैव विषयत्वात् । स्वाश्रयद्वारेति—इदमधिकरणकारकाभिप्रायेण । इत्यलमिति—

काङ्क्षत्वान्मृगशब्दान्न द्वितीया । तार्किकमते तु विशेष्यार्थवाचकात् मृग शब्दात् राज्ञ पुरुषमानयेतिवद् द्वितीया दुर्वारेत्यलमतिविस्तरेण । इति धात्वर्थनिर्णय ।

अथ निपातार्थनिर्णय ॥ अनुभूयते सुख, साक्षात्क्रियते गुरु रित्यादौ निपाताना द्योतकत्वेनानुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेन सकर्मकत्वम् । कर्मसङ्गकार्थाक्रियार्थकत्व सकर्मकत्वमितिनिष्कृष्टम तेऽपि फलाश्रयतया कर्मसङ्गकस्य धात्वर्थफले एवान्वयौचित्येन द्योतकत्वमावश्यकम् । द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वम् । क्वचित्तु क्रियाविशेषाक्षेपकत्व द्योतकत्वम् । यथा प्रादेश विलिखतीत्यादौ विद्यमानक्रियाक्षेपक । प्रादेश विमाय लिखतीत्यर्थावगमात् । अतएवाथ शब्दानुशासनमित्यत्राथशब्दस्य प्रारम्भक्रियाक्षेपकत्व कैयटाद्युक्त सङ्गच्छते । क्वचित्तु सम्बन्धपरिच्छेदकत्व द्योतकत्वम् । यथा कर्मप्रवचनीयानाम् । विशिष्टस्य न धातुत्वम्, अपाठात् । अडाद्यव्यवस्थापत्तेश्च ।

यत्तु तार्किका उपसर्गाणा द्योतकत्व तदितरनिपाताना वाचकत्व 'साक्षात्प्रत्यक्षतुल्ययो' इतिकोशात् । नम'पदेन देवाय नम इत्यादौ नमस्कारा

एवञ्च वैयाकरणमते—आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावना त्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्य । भावनाप्रकारबोध प्रति तु कृजन्योपस्थितिवत् धात्वर्थभावनोपस्थितिरपि हेतु पश्य मृगो धावति, पचति, भवति, इत्याद्यनुरोधादितिदिक् । इति धात्वर्थवाद ।

प्रसङ्गान्निपातार्थनिरूपणप्रकरणमाह—अनुभूयत इत्यादि । नैयायिकान् मर्दयन्नाह—साक्षात्क्रियते इति । निपाताना द्योतकत्वे बीजमाह—सकर्मकत्व मिति । निपाताना द्योतकत्वञ्च त्रिविधम्—स्वसमभिव्याहृतपदनिष्ठशक्तिशालकत्वम्, क्रियाविशेषाक्षेपकत्वम्, सम्बन्धविशेषपरिच्छेदकत्वञ्चेति । तदाह—द्योतकत्वञ्चेत्यादिना कर्मप्रवचनीयानामित्यन्तेन । एवञ्च व्यञ्जनावृत्ति रावश्यक्येव । द्योतनैव सेति बोध्यम् । आक्षेपश्चानुमानमित्यन्यत्र विस्तरः ।

प्रत्यक्षतुल्ययोरिति—सप्तम्या वाचकत्वार्थे पर्यवसानात् प्रत्यक्षतुल्यवाचक साक्षाच्छब्द इति तदर्थात् । साक्षात्क्रियते गुरुरित्यत्र कर्मणि लकारसिद्धय आह—

र्थत्वस्य दानावसरे गवे नम इत्यत्र पूजार्थत्वस्य प्रसिद्धत्वाच्च । सकर्मकत्व च—स्व स्वसमभिव्याहृतनिपातान्यतरार्थफलव्यधिकरणव्यापार वाचकत्वम् । कर्म्मत्व च स्व-स्वसमभिव्याहृतनिपातान्यतरार्थफलशालित्व मित्याहु । तन्न । वैपम्ये बीजाभावात् । अनुभूयत इत्यनेन साक्षात्क्रि यत इत्यस्य समत्वात् । नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयाभावात् । निपातार्थधात्वर्थयोरन्वयस्यैवासम्भवात् । निपातार्थफलाश्रयत्वेऽपि धा त्वर्थान्वय विना कर्म्मत्वानुपपत्तेश्च । यदपि केचिच्छाण्डिक्या निपा ताना वाचकत्वे शोभन समुच्चय इतिवच्छोभनश्च इत्यापत्ति, घटस्य समुच्चय इतिवत् घटस्य च इत्यापत्ति, पट घटं च पश्येत्यादौ पष्ठ्यापत्तिश्चेत्याहु । तन्न । शब्दशक्तिस्वभावेन निपातै स्वार्थस्य परविशेषण त्वेनैव बोधनेन विशेषणान्वयाप्रसङ्गात् । च शब्दद्योत्यसमुच्चयस्यासत्व भूतत्वात् षष्ठ्यप्राप्तेश्च । किञ्च घट पट च पश्येत्यादौ घटपदस्य घट प्रतियोगिकसमुच्चयवति अप्रसिद्धा शक्तिरेव लक्षणा चशब्दस्तु तात्पर्य

सकर्मकत्वञ्चेति । भेदेन साक्षादिति—नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयोऽ व्युत्पन्न इति व्युत्पत्तेरितिभावः । अन्यथा तण्डुलं पचतीत्यर्थे तण्डुल पचतीति प्रयोगस्य नामार्थधात्वर्थयोः कर्मत्वेनान्वये प्रामाण्यापत्ति । विभक्त्यर्थं मुख्यकर्म तु तयोरन्वयो भवतीत्याह—साक्षादिति ।

तार्किकोक्तं कर्मत्वलक्षण विघटयति धात्वर्थान्वयं विनेति । गामेत्यत्र यज्ञातीयत्व दोहयारणार्थं कर्तृसहगसामग्र्यात्, प्रकृतधात्वर्थफलाश्रयत्वेन कर्मसगविधानादिति भाव ।

सारङ्गकृतः कृपणामास निरस्यति—यदपीत्यादि । केचिच्छाण्डिक्या = सारङ्गा इत्यर्थं । परविशेषणत्वेनैवेति—एवेन विशेष्यत्वस्य व्यवच्छेदः । तथा च—पदार्थान्तरनिष्ठप्रकारत्वानिरूपितविशेष्यतासम्बन्धेन शाब्दमुद्देश्यत्वाऽवच्छिन्नं प्रति नमिवरनिपातेतरपदजन्योपस्थितेर्विशेष्यतासम्बन्धेन कारणत्वमिति भाव कारणमाव फलतीति भाव । घटो नास्तीत्यादौ निपातार्थेऽपि विशेष्यतासम्बन्धेन शाब्दबोधदर्शनादुक्तं नमिवरेति । षष्ठ्यप्राप्तेश्चेति—अत्राऽपि विशेषणत्वेनान्वयाऽभा-माव एव हेतुः । प्रकारान्तरेणाऽपि षष्ठ्यप्राप्तिं वियदयति—किञ्चेति ।

ग्राह्यक'। अत एवोभयो सामानाधिकरण्येन क्रियान्वयाद् द्वितीया। घटसमुच्चयवन्त पटम्पश्येतिबोध। त्वन्मतेऽपि समुच्चयस्य प्रतियोग्या काङ्क्षाया सन्निहितत्वात् घटस्य प्रतियोगित्व, पटे तु समुच्चयस्य भेदेनान्वयो न तु पटस्य समुच्चये इति क्व षष्ठ्यापादनम्, नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया। निपातानामर्थवत्त्वमपि द्योत्यार्थमादायैव शक्तिलक्षणाद्योतकतान्यतमसम्बन्धेन बोधकस्यैवार्थवत्त्वात्। नञ्समासे उत्तरपदार्थप्राधान्य

इति बोध इति-शाब्दबोध इत्यर्थः। घटस्य प्रतियोगित्वमिति-आर्थे बोधे इति शेष। एतेन परविशेषणत्वेनैवेति पूर्वग्रन्थेन विरोध इत्यपास्तम्। भेदेनाऽन्वयः-अनुयोगित्वात्मकस्वरूपसम्बन्धेनान्वय इत्यर्थ। प्रतियोगिवाचकाच्च षष्ठी भवतीति न पटपदेऽतिप्रसङ्गः। न तु पटस्येति—प्रतियोगित्वसम्बन्धेनेति शेष। क्व षष्ठ्यापादनम्—चार्थसमुच्चयस्य घटे शाब्दाऽन्वयाऽभावात् पटे शाब्दान्वयोऽपि पटस्य विशेषणत्वाऽभावात् विशेषणवाचकशब्दादुत्पत्तिस्वभावा षष्ठी न प्राप्नोतीति भाव। विशेषणवाचकादेव षष्ठीत्यग्रे सुबर्थवादे वक्ष्याम। एवञ्च धूलिमदेवेण नैयायिकमतखण्डन न युक्तं, किन्तु प्रागुक्तन्याय्यरीत्यैवेति ग्रन्थकृत्तात्पर्यम्।

ननु चार्थसमुच्चयस्य पटे भेदेनाऽन्वय कथ, नामार्थयोरिति व्युत्पत्तेर्विरोधादित्यत आह—नामार्थयोरिति। वस्तुतोऽव्ययेषु नामत्वमेव नास्ति, "चत्वारि पदजातानि नामाख्यातोपसर्गनिपातश्चे"ति भाष्ये नामत पृथगुपसर्गनिपातयोर्ग्रहणात्। तस्मात् लिङ्गसङ्ख्यानिष्ठप्रकारतानिरूपितविशेष्यताप्रयोजकत्व नामत्वमिति पारिभाषिकनामत्वस्वीकारे उक्तव्युत्पत्तौ निपातेतरसङ्कोचस्याऽपि नाऽऽवश्यकता। मूलन्तु स्वाद्यन्तत्वनिबन्धननामत्वानुसारेण। यद्वा समुच्चयवांश्चार्थस्तेन पटेऽभेदान्वयेऽपि क्षतिर्नास्ति। समुच्चितमात्रे तदन्वयस्वीकारादेव 'समुच्चितानन्तर चादिप्रयोग' इति वृद्धा इतिलघुमञ्जूषाया स्पष्टम्।

प्रातिपदिकसञ्ज्ञासिद्धये आह—निपातानामर्थवत्त्वमिति। अन्यतम सम्बन्धेन बोधकस्यैवेति—तादृगन्यतमसम्बन्धेन अर्थविषयबोधजनकत्वप्रकारक तात्पर्यीयविशेष्यताप्रतियोगिकपर्याप्त्यनुयोगिताऽवच्छेदकधर्मवत्त्वमेवार्थवत्त्वमिति भाव। बोधजनकता च फलोपधायकता ग्राह्या।

द्योत्यार्थापेक्षयैव । प्रतिष्ठते इत्यत्र तिष्ठतिरेव गतियाची, धातूनामनेकार्थत्वात् । प्रशब्दस्तु तदर्थगत्यादिमत्त्वस्य द्योतक । अत एव धातु पूर्वं साधनेन युज्यते पश्चादुपसर्गेणेति सिद्धान्तितम् । साधनकारकम् तत्प्रयुक्तकार्येण, उपसर्गेण उपसर्गसञ्ज्ञकशब्देनेत्यर्थः । तत्र हि भाष्ये—"पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति । इतर आह नैतत्सार पूर्वं धातुस्साधनेन युज्यते

ननु प्रतिष्ठते इत्यत्र कथं गत्यर्थद्योत, स्थाधातोर्गतिनिवृत्तिवाचकत्वात् इत्यत आह—प्रतिष्ठते इत्यत्रेति । "भूवादयो धातव" इति सूत्रे भाष्ये स्पष्टमेतत्—तत्र हि "बहव्यो अपि धातवो भवन्तीति । तद्यथा—अपि प्रक्रिये कृते क्वेनेऽपि चापि वर्तते—केशश्मश्रु अपतीति । एवमिहापि तिष्ठतिरेव अजिगिमिषा माह, तिष्ठतिरेव अजिगमिषाया निवृत्तिम् ।" इत्युक्तम् ।

अत एव = उपसर्गाणां द्योतकत्वादेव । सिद्धान्तितमिति—'गुदुक्षात्पूर्वं' इत्यत्र 'उपपदमतिङ्' इत्यत्र च भाष्ये इति शेषः । तत्प्रयुक्तकार्येण = धातुप्रयुक्तत्वलडादिना । लक्षणया साधनशब्दस्याऽयमर्थः । उपसर्गसञ्ज्ञकशब्देनेति—उपसर्गार्थस्य तु द्योत्यत्वे धात्वर्थं एवान्तर्भावात् धातुना तयोगस्य चर्चैवाऽयुक्ता, योगस्य विश्लेषसापेक्षत्वादितिभावः । एतेन उपसर्गद्योत्यभूयोऽवयवार्थप्रयुक्तलुगादियोगश्च धातुसञ्ज्ञाया अपि पूर्वं भवतीति सूचितम् । तेन संचस्करेत्यस्य सिद्धिः । 'गुदुक्षात्पूर्वं' इति न वक्तव्यमिति भाष्ये स्पष्टम् । एवञ्च पूर्वं धातुरित्यादेरयमर्थः—उपसर्गसञ्ज्ञकशब्दयोगात्पूर्वं धातोर्लडादयुत्पत्तौ कर्तरीत्यादिरूपनिष्पत्तेरनन्तरं समाप्युपसर्गसंज्ञकशब्दयोग इति । तत्र हि भाष्ये पूर्वं धातुरुपसर्गेणेति—'उपास्यते गुरु' इत्यादौ उपसर्गयोगात्पूर्वं धातो कर्मणा साधनाऽन्वययोग्याऽर्थांऽभावेन सकर्मकत्वाऽभावात् कर्मरूपसाधनप्रयुक्तलडादिकार्ययोगोऽसम्भवेव । तस्मात् साधनयोगात्पूर्वं धातोरुपसर्गयोगो मन्तव्यः, सयोगे जाते तु तेषां वाचकत्वेन तत्तदभिधाहानात् कर्माऽन्वययोग्योपासनाद्यर्थलाभेन धातोः सकर्मकत्वसिद्धौ पश्चात्साधनप्रयुक्तलडादियोगो भवतीति भाष्याशयः । उपसर्गाणां वाचकत्वनेषेति हृदयम् । एतत्सारमित्यादि—नैतत् सारमिति-एतत् = पूर्वोक्तं, न सारम् न तथ्यम् । किन्तर्हि सारम् ? इत्यत्र आह—पूर्वं धातु साधनेनेति । अतएव मत्वेति, मत्वर्थ इत्यादिसिद्धिः "क्त्वेल्यप्" इति ल्यबन्ते ।

पश्चादुपसर्गेण। साधन हि क्रिया निर्वर्तयति तामुपसर्गो विशिनष्टीति। सत्यमेवैतत्। यस्त्वसौ धातूपसर्गयोरभिसम्बन्धस्तमभ्यन्तर कृत्वा धातु रसाधनेन युज्यते योह्येव मन्यते तस्य आस्यते गुरुणा इत्यकर्मक उपा स्यते गुरुरिति केन सकर्मक स्यात्।

पूर्वोक्तस्य असारत्वे एतस्यैव सारत्वे च का युक्ति? इत्यत आह—साधन होति। साधन=कारकप्रयुक्तखडादि। क्रियाम्=साध्यत्वेन क्रियाप्रतीतिम्। निर्वर्तयति=जनयति। साधनयोगेन हि साध्यत्वेन धात्वर्थप्रतीति, साध्यत्वस्य साधननिरूप्यत्वात्। क्रियाया साध्यत्वेनैव प्रतीतिस्तु इष्टा, तथाऽनुभवात्। ताम्=साध्यत्वेन प्रतीताम्। उपसर्ग=उपसर्गसञ्जकशब्दयोग। विशिनष्टि=तत्र विशेषणीभूतमर्थं द्योतयतीत्यर्थ। साध्यत्वेन प्रतीतिक्रियायोगे हि उपसर्गत्व विधानात्। अत्र भाष्ये इताऽग्रे इदमधिकम्—"अभिनिर्वृत्तस्य चाऽन्यस्योप सर्गेण विशेष शक्या वक्तुम्।" इति। अभिनिवृत्तस्य=साध्यत्वेन ज्ञातस्य। विशेष=विशेषणम्। वक्तुम्=द्योतयितुम्। एवञ्च पूर्वं धातुरुपसर्गे णेति न सारमिति भाव। इतर एतदङ्गीकुर्वन्नेव उपसर्गायनिमित्तककार्यस्य सुट्टादेरन्तरङ्गत्व व्युत्पादयितुमाह—सत्यमेवैतद्। यस्त्वसाविति—उपसर्ग सञ्जकशब्दयोगात्पूर्वं साधनयोग इति सत्यमेव। तेन प्रत्यय, अध्ययनमित्यादि सिद्धि। परन्तु त्वदभिमत धातूपसर्गसम्बन्धकृतमयम् अभ्यन्तरं कृत्वा उपसर्ग सञ्जकशब्दयोगं विनाऽपि अर्थत्वेनाङ्गीकृत्य धातु पूर्वं नियमेनाऽऽकाङ्क्षितार्थत्वात् साधनेन सम्बद्धयते। साधनप्रयुक्तप्रत्ययप्रयोगे कृते तु क्रियात्याऽवगतौ पश्चात् श्रोतु बोधाय उपसर्गसञ्जकशब्दयोग। अन्यथा केवलधातुत सर्वत्राऽप्रतीयमान सोऽर्थ कथ श्रोता बुद्धयेतेति भावः। योह्यत्र मन्यते—उपसर्गसञ्जकशब्दयोगवत् उपसर्गाऽप्रयोगोऽपि पश्चादिति यो मन्यते इत्यर्थ। केन सकर्मक स्यादिति—इदमत्र भाष्यग्रन्थस्य सारम्—येनैव क्रमेण अर्था बुद्धिमारूढा भवन्ति तेनैव क्रमेण तद्बोधकशब्दप्रयोग इति निर्विवादम्। 'उपास्यते' इत्यादिशब्दविवक्षाकाले पूर्वम् उपासनादिक्रियार्थस्य बुद्धावुपस्थिति। ततस्तद्बोधार्थम् आसादिधातुसञ्जक शब्दप्रयोग। तत क्रियाया साध्यत्वेन बोधात्साध्यस्य च साधनाऽऽकाङ्क्षत्वात् साधनार्थोपस्थिति। ततः साधनवाचकखडादिशब्दप्रयोग। सर्वत पश्चात् धात्वर्थ-

हरिणाप्युक्तम्—

धातुसाधनयोगस्य भाविन प्रक्रमाद्यथा ।
धातुत्व कर्म्मभावश्च तथान्यदपि दृश्यताम् ॥
बुद्धि स्यादभिसम्बन्धात्तथा धातूपसर्गयोः ।
अभ्यन्तरोक्तवो भेद पदकाले प्रकाशते ॥ इति ।

अस्यार्थ । यथा भाविसाधनसम्बन्धाश्रयणेन क्रियावाचित्वमाश्रित्य धातुसज्ञोच्यते यथा च सन्प्रत्यये चिकीर्षिते भावीपिकर्म्मत्वमाश्रित्य प्रक्रमे एवेपिकर्म्मतनमुक्तम्, तथा भाव्युपसर्गसम्बन्धाद्धातुप्रक्रमे एव विशिष्टक्रियावाचकत्व दृश्यताम् । धातूपसर्गयोस्सम्बन्ध बुद्धिविषयीकृत्योपसर्गार्थीकृतो विशेष धातुनैवाभ्यन्तरीकृत पदप्रयोगकाले उपसर्गसम्बन्धे सति प्रकाशते । श्रोतुरिति शेष । उपसर्गयोगात्प्रागेव

स्यैव द्योतकत्वेन नवार्थोपस्थापकत्वाऽभावात् वस्तुतो निष्प्रयोगनस्याऽपि उपपुरसर्गसंसर्गसन्दस्य केवल श्रोतुर्बोत्यार्थबोधाय प्रयोग, अन्यथा ह्यासादिधातो सर्वत्र उपासनार्थकाऽभावात् श्रोतुरुपासनार्थस्य बोध कर्तेरेव स्यात् । धाढ रेवोपासनादिविशिष्टार्थवाचक इति उपास्यते गुरुरित्यादौ कर्मणि लकारसिद्धि । सञ्चस्कारेत्यादौ भूषणाद्यर्थस्य धातुसंसर्गोऽपि पूर्वमुपस्थितत्वेनान्तरङ्गतरत्वात् तन्निमित्तकसुगो लिङुत्वत्वे पूयमेष सिद्धिरिति सुट्कात्पूर्व इति प्रत्याख्यात भाष्ये । उपसर्गसंसर्गकरन्दमागनिमित्तकार्यन्तु सर्वत पश्चाद्भवत्वेन बहिरङ्गतरमिति प्रत्येति प्रत्यय इत्यादि सिद्धम्, "णेरप्यपने" इति निर्देशश्च सगच्छते । उप सर्गाश्च धातवो ह्यर्थेषु सुट्कुर्वते 'धातु: पूर्वं साधनेन युक्यते पश्चादुपसर्गेणेति' । तेषां वाचकत्वे तु तथागात्पूर्वम् । उपास्यते गुरुरित्यादौ कर्मणि लकारादनुक्रम प्रक्रमात् पूर्वं धातु साधनेनेतिमाष्यसिद्धान्तोऽसङ्गत एव स्यात् । धातुत्वे तु उप सर्गयोगात् पूर्वमपि उपासनार्थस्य धात्वर्थत्वादेव धातो कर्मणि लकार सिद्धयन्येवेत्यलम् ।

प्रक्रमात्—आरम्भात् । साधनसम्बन्धं विना साध्यस्य स्वभावाया क्रियाया स्वरूपाऽनिष्पादादिति भाव । कर्मभावरूपस्यार्थमाह—यथा च सन्प्रत्यय इति । तथाऽन्यदर्थस्यार्थमाह—तथा भाव्युपसर्गेत्यादि । भेद: = विशेष ।

धातुनैवोपसर्गार्थविशिष्ट स्वार्थं उच्यते इति तात्पर्यम्। पूर्वं धातुरुप सर्गेणेति तु तदर्थस्य धात्वर्थान्तर्भावाद् व्यवहार ।

चन्द्र इव मुखमित्यादौ चन्द्रपदस्य स्वसदृशोऽप्रसिद्धा शक्तिरूपा लक्षणा "नञिवयुक्तमन्यसदृशाधिकरणे" इति न्यायात्। इवपद तात्पर्य-ग्राहकम्। तात्पर्यग्राहकत्वञ्च स्वसमभिव्याहृतपदस्यार्थान्तरशक्तिद्योतकत्व मित्यागतम् इवनिपातस्य द्योतकत्वम्।

यत्तु इवार्थस्सादृश्य तत्र प्रतियोग्यनुयोगिभावेनैव चन्द्रमुखयोरन्व योपपत्तौ किं लक्षणया। तथा च चन्द्रप्रतियोगिकसादृश्यस्याश्रयो मुख

ननु यद्यक्तरीत्या पूर्वं धातु साधनेन युज्यते इति सिद्धान्त, तर्हि पूर्वं धातु रुपसर्गेणेति व्यवहार कथम्? इत्यत आह-पूर्वं धातुरिति। उपसर्गेण उपसर्ग द्योत्यायन युज्यते वाचकत्वेन सम्बद्धयते, इत्यर्थ इति भाव ।

नञिवयुक्तमिति—"नञिवयुक्तमन्यसदृशाऽधिकरणे तथाह्यर्थगति" इति हि न्यायस्वरूपम्। वार्तिकमेतत्। "नञ्युक्तमिव युक्त वा यत्किञ्चिदिह दृश्यते ततोऽन्यस्मिंस्तत्सदृशे कार्य विज्ञायते। तथा ह्यर्थो गम्यते। 'अब्राह्मणमानये'त्युक्ते ब्राह्मणसदृश एवानीयते नाऽसौ लोष्टमानीय कृती भवती"ति वदद्भ्याम् 'भृशा दिभ्य' इति सूत्रे। अधिकरणे द्रव्ये इत्यर्थ। अत्र अयसदृशोत्युक्त्या सादृश्ये भेदघटित नास्तीति सूचितम्। एतेन तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्व सादृश्य मिति नैयायिकोक्तलक्षण परास्तम्, अभेदेऽपि सादृश्याङ्गीकारात्। काव्यप्रकाशे कृताऽपि भेदे साधर्म्यमुपमेति वदताऽभेदेऽपि साधारणधर्मसम्बन्धस्याङ्गीकारात्। किञ्च सादृश्य साधारणधर्मसम्बन्धप्रयोज्य सदृशादिपदशक्यताऽवच्छेदकतया सिद्ध सदृशदर्शने संस्कारोद्बोधकत्वस्य सर्वसम्मतत्वेन तत्कारणताऽवच्छेदकतया च सिद्धमखण्डमतिरिक्त पदार्थ। अतएव 'अनेनाय सदृश' इत्युक्ते केन धर्मेणाऽ नयो सादृश्यमित्येव जिज्ञासा, न तु को धर्माऽनया सादृश्यमिति। न चाति रिक्तपदार्थत्वे गौतमकणादोक्तपदार्थसंख्याविरोध इति वाच्यम्, प्रमेयपदार्थे गौतमो-क्तेऽन्तर्भावात्, पदार्थसंख्याव धनस्योपलक्षणत्वाच्च। तदुक्त गौतमेन—"सङ्ख्यैका न्ताऽसिद्धि"रित्यन्यत्र विस्तर। सादृश्यप्रयोजकवर्गश्च—सादृश्यप्रतियोगिताऽवच्छे दकीभूतो यो धर्मस्तद्व्यापकीभूतो यो धर्म स एव, तथाऽनुभवादित्यलम्।

हरिणाप्युक्तम्—

धातोस्साधनयोगस्य भाविन प्रक्रमाद्यथा ।
धातुत्व कर्म्ममावश्च तथान्यदपि दृश्यताम् ॥
बुद्धि स्यादभिसम्बन्धाच्चथा धातूपसर्गयो ।
अभ्यन्तरीकृतो भेद पदकाले प्रकाशते ॥ इति ।

अस्यार्थ । यथा भाविसाधनसम्बन्धाश्रयणेन क्रियावाचित्वमाश्रित्य धातुसञ्ज्ञोच्यते यथा च सन्प्रत्यये चिकीर्षिते भावीषिकर्म्मत्वमाश्रित्यो पक्रमे एवेषिकर्म्मत्वमुक्तम्, तथा भाव्युपसर्गसम्बन्धादुपक्रमे एव विशिष्टक्रियावाचकत्व दृश्यताम् । धातूपसर्गयोस्सम्बन्ध बुद्धिविषयी कृत्योपसर्गार्थकृतो विशेष धातुनैवाभ्यन्तरीकृत पदप्रयोगकाले उपसर्गसम्बन्धे सति प्रकाशते । श्रोतुरिति शेष । उपसर्गयोगात्प्रागेव

स्यैव द्योतकत्वेन नवार्थोपस्थापकत्वाऽभावात् वस्तुतो निष्प्रयोजनस्याऽपि उपसर्गसंज्ञकशब्दस्य केवलं श्रोतुर्बोधार्थंवाचाय प्रयोग, अन्यथा आसादिधातो सर्वत्र उपासनाद्यर्थाऽभावात् श्रोतुरुपासनाद्यर्थस्य बोध कलेशेन स्यात् । धातु रेवोपासनादिविशिष्टार्थवाचक इति उपास्यते गुरुरित्यादौ कर्मणि लकारसिद्धिः । सञ्चस्कारेत्यादौ भूषणाद्यर्थस्य धातुसञ्ज्ञातोऽपि पूर्वमुपस्थितत्वेनान्तरङ्गतरत्वाद् तन्निमित्तकसुटो लिङ्गुत्वे पूर्वमेव सिद्धिरिति सुट्कात्पूर्व इति प्रत्याख्यातं भाष्ये । उपसर्गसञ्ज्ञकशब्दयोगनिमित्तककार्यन्तु सर्वत पश्चाद्भवत्वेन बहिरङ्गतरमिति प्रत्येति प्रत्यय इत्यादि सिद्धम्, "णेरध्यमने" इति निर्देशश्च संगच्छते । उप सर्गश्च द्योतका एवेति सुष्ठूच्यते 'धातु। पूर्वं साधनेन युज्यते पश्चादुपसर्गेणेति' । तेषां वाचकत्वे तु तद्योगात्पूर्वम् । उपास्यते गुरुरित्यादौ कर्मणि लकाराऽनुत्पाद प्रसङ्गात् पूर्वं धातु साधनेनेतिभाष्यसिद्धान्तोऽसङ्गत एव स्यात् । धातुकत्वे तु उप सर्गयोगात् पूर्वमपि उपासनाद्यर्थस्य धात्वर्थत्वादेव धातु सकर्मकत्वेन कर्मणि लकार सिद्धयत्येवेत्यलम् ।

प्रक्रमात्—आभरणात् । साधनसम्बन्ध विना साध्यत्व स्वभावाया क्रियाया स्वरूपाऽनिष्पादादितिभाव । कर्मभावश्चेत्यस्यार्थमाह—यथा च सन्प्रयय इति । तथाऽन्यदपीत्यस्यार्थमाह—तथा भाव्युपसर्गेत्यादि । भेदः = विशेष ।

धातुनैवोपसर्गार्थविशिष्ट स्वार्थो उच्यते इति तात्पर्यम्। पूर्वं धातुरुप सर्गेणेति तु तदर्थस्य धात्वर्थान्तर्भावाद् व्यवहार ।

चन्द्र इव मुखमित्यादौ चन्द्रपदस्य स्वसदृशोऽभिसिद्धा शक्तिरूपा लक्षणा "नञिवयुक्तमन्यसदृशाधिकरणे" इति न्यायात्। इवपद तात्पर्य ग्राहकम्। तात्पर्यग्राहकत्वञ्च स्वसमभिव्याहृतपदस्यार्थान्तरशक्तिद्योतकत्व मित्यागतम् इवनिपातस्य द्योतकत्वम्।

यत्तु इवार्थस्सादृश्य तत्र प्रतियोग्यनुयोगिभावेनैव चन्द्रमुखयोरन्व योपपत्तौ किं लक्षणया। तथा च चन्द्रप्रतियोगिकसादृश्यस्याश्रयो मुख

ननु यद्युक्तरीत्या पूर्वं धातु साधनेन युज्यते इति सिद्धान्त, तर्हि पूर्वं धातु रुपसर्गणेति व्यवहार कथम्? इत्यत आह-पूर्वं धातुरिति। उपसर्गेण उपसर्ग द्योत्यार्थेन युज्यते वाचकत्वेन सम्बद्धयते, इत्यर्थ इति भाव ।

नञिवयुक्तमिति—"नञिवयुक्तमन्यसदृशाऽधिकरणे तथाह्यर्थगति" इति हि न्यायस्वरूपम्। वार्तिकमेतत्। "नञ्युक्तमिव युक्त वा यत्किञ्चिदिह दृश्यते ततोऽन्यस्मिंस्तत्सदृशे कार्य निशायते। तथा ह्यर्थो गम्यते। 'अत्राक्षणमानये'त्युक्ते ब्राह्मणसदृश एवानीयते नाऽसौ लोष्टमानीय कृती भवती"ति तद्भाष्यम् 'भृशा दिभ्य' इति सूत्रे। अधिकरणे द्रव्ये इत्यर्थ। अत्र अन्यसदृशेत्युक्त्या सादृश्य भेदघटित नास्तीति सूचितम्। एतेन तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्व सादृश्य मिति नैयायिकोक्तलक्षण परास्तम्, अभेदेऽपि सादृश्याङ्गीकारात्। काव्यप्रकाशे-कृताऽपि भेदे साधर्म्यमुपमेति वदताऽभेदेऽपि साधारणधर्मसम्बन्धस्याङ्गीकारात्। किञ्च सादृश्य साधारणधर्मसम्बन्धमयोज्य सदृशादिपदशक्यताऽवच्छेदकतया सिद्ध सदृशदर्शने सस्कारोद्बोधकत्वस्य सर्वसम्मतत्वेन तत्कारणताऽवच्छेदकतया च सिद्धमखण्डमतिरिक्त पदार्थं। अतएव 'अनेनाय सदृशः' इत्युक्ते केन धर्मेणाऽ नयो सादृश्यमित्येव जिज्ञासा, न तु को धर्मोऽनयो सादृश्यमिति। न चाति रिक्तपदार्थत्वे गौतमकणादोक्तपदार्थसख्याविरोध इति वाच्यम्, प्रमेयपदार्थे गौतमो-क्तेऽन्तर्भावात्, पदार्थसख्याव धनस्योपलक्षणत्वाच। तदुक्त गौतमेन—"सङ्ख्यैका न्ताऽसिद्धि"रित्यन्यत्र विस्तर। सादृश्यप्रयोजकधर्मश्च—सादृश्यप्रतियोगिताऽवच्छे दकीभूतो यो धर्मस्तद्व्यापकीभूतो यो धर्म स एव, तयाऽनुभवादित्यलम्।

मिति बोध इत्याहु । तन्न । चन्द्र इव मुख दृश्यते, चन्द्रमिव मुख पश्यामीत्यादौ चन्द्रपदस्य मुखरूपकर्म्मसामानाधिकरण्याभावादुक्तानुक्तत्वप्रयुक्तविभक्त्यनापत्तौ षष्ठ्यापत्तेश्च ।

परेत्विवशब्दस्योपमानताद्योतकत्वम् । उपमानत्वञ्च उपमानोपमेयोभयनिष्ठसाधारणधर्म्मवत्त्वेनेषद्भितरपरिच्छेदकत्वम् । तद्धर्म्मवत्तया परिच्छेद्यत्वञ्चोपमेयत्वम् । साधारणधर्म्मसम्बन्धश्च क्वचिद् विशेष्यतयाऽन्वेति क्वचिद् विशेषणतया । एवञ्च चन्द्र इव आह्लादक मुखमित्यादौ आह्लादकोपमानभूतचन्द्राभिन्नमाह्लादक मुखमिति बोधः । चन्द्र इव मुखमाह्लादयतीत्यादौ चोपमानभूतचन्द्रकर्तृकाह्लादाभिन्नो मुखकर्तृकाह्लाद इति बोधः । इदमुपमानानि सामान्यवचनैरित्यत्र भाष्ये स्पष्टमित्याहुः ।

कर्मसामानाधिकरण्याभावात् = कर्मणाऽभेदाऽन्वयाऽभावादित्यर्थः । अस्मन्मते तु चन्द्रपदस्य चन्द्रसदृश्यार्थकतया मुखरूपकर्मणि अभेदाऽन्वयेन उक्ताऽनुक्तत्व प्रयुक्तविभक्तिर्लभ्यत एव । षष्ठ्यापत्तेश्चेति—प्रतियोगित्वेन चन्द्रपदार्थस्येवार्थसादृश्येऽन्वये तु चन्द्रपदे षष्ठी दुर्वार, भेदसम्बन्धीयप्रतियोगिवाचकशब्दे षष्ठ्या अनुशासनलब्धत्वात् इतिभाव ।

इदानीं स्वमतमाह—परे तु इति = सिद्धान्तिनस्तु इत्यर्थः । क्वचित् विशेष्यतया, क्वचिद्विशेषणतयेति—यत्र साधारणधर्मवाचकशब्दस्तिङन्तस्तत्र विशेष्यतया, यत्र तु स सुबन्तस्तत्र विशेषणतयेति विवेक । इति बोध इति—चन्द्रपदस्योपमानभूतचन्द्रार्थेऽप्रसिद्धा शक्ति, इवपदं तात्पर्यग्राहकम् । साधारणधर्मस्य च द्वयोरुपमानोपमेययोरन्वय । पूर्वार्धे उपमानोपमेययोरभेदाऽन्वयेन तद्वाचकपदयोः समानं विभक्तिकत्वम् उत्तरार्धे तु साधारणधर्मभूतायां क्रियायां कर्तृत्वेनाऽन्वयाद् द्वया समानविभक्तिकत्वम् । इदम् = उक्तरीत्या उपमानत्वम्, उपमेयत्वम्, इव शब्दस्योपमानताद्योतकत्वम्, साधारणधर्मस्योपमानोपमेयोभयाऽवगाढिज्ञानजन्यं सर्वमित्यर्थ । भाष्ये स्पष्टमिति—तत्र हि भाष्ये—"उपमानानीत्युच्यते, कानि पुनरुपमानानि ? किं यदेवोपमानं तदेवोपमेयम् ? आहोस्विद् यदेवोपमानं नपुंसकमेवमेयम् ? किञ्चातः ? यदि यदेवोपमानं तदेवोपमेयम्, क इवोपमार्थः—'गौरिव गौरिति' ।

(यदेवेत्येवकारेण तयोरत्यन्ताऽभेद सूचित । उपमानोपमेयत्वबोधकेवशब्दप्रयोगे किं फलम् ? उपमाकर्मकरणत्वरूपोपमानोपमेयत्वबोधस्यैकत्राऽसभवादिति भाव ।) अथाऽन्यदेवोपमानमन्यदुपमेय क इहोपमार्थ—'गौरिवाश्व इति' ? (अन्यदेवेत्यनेनाऽत्यतभेद सूचित । सर्वथाभेदे तत्स्वीकारे इदमुदाहरण वाच्य, तच्चाऽयुक्तम्, साधारणधर्ममूलकोपमानोपमेयभावाऽप्रतीतेरिति भाव ।) एव तर्हि यत्र किञ्चित्सामान्य कथञ्चि विशेषस्तत्रोपमानोपमेये भवत । (श्यामत्वादि साधारणधर्मेणाऽभेद, शब्दोपात्तप्रत्येकधर्मेण शक्तीत्व देवदत्तत्वादिना च भेद इत्यर्थ ।) मान हि नाम अनिर्ज्ञातज्ञानार्थमुपादीयते—'अनिश्चितमर्थं शास्त्रा मीति' । तत्समीपे यन्नाऽत्यन्ताय मिमीते तदुपमान—गौरिव गवय इति । गौर्निर्ज्ञातो गवयोऽनिज्ञात । (अज्ञातार्थस्य साकल्येन ज्ञापक हि मानम्, यथा प्रस्थादि, अज्ञातस्य परिमाणरूपार्थस्य साकल्येन ज्ञापकम्, न तथोपमानम् । गौर्हि गवय कतिभिश्चिद्भेरेव तद्गतैर्ज्ञापयति न साकल्येन । हीन मानमुपमानमिति हीनार्थकोपशब्देन कर्मधारय, उपोऽधिके चेत्यादाव्ययस्य हीनार्थकत्वदर्शनात् । उपमाना नीति निपातनाच्च समास, अन्यथा कर्मप्रवचनीयसज्ञाविधानसामर्थ्यात् न स्यात् । मानं हि अत्यन्ताऽभेदेनैव वा परिच्छेदेऽन्येति—'प्रस्थो व्रीहि'रित्यादौ परिच्छेद्ये तद्व्यारोपात् । भेदेनैव वा—'प्रस्थोऽस्य परिमाणमित्यादौ । उपमान तु भेदाऽभेदाभ्यामिति विशेष इति भाव ।) अस्मात् भाष्यात् उपमानोपमेययो कथितलक्षणम्, इव शब्दस्योपमानताद्योतकत्वञ्च स्पष्टमेवायाति । अग्रे पुन—"किं पुनरिहोदाहरणम् ? शक्तीश्यामा । कस्य पुनरय श्यामाशब्दो वर्तते ? शक्त्या मित्याह । केन तर्हीदानी देवदत्ताऽभिधीयते ? समासेन यद्येव शक्तीश्यामो देवदत्त इति न सिद्धयति । 'उपसर्जनस्ये'ति ह्रस्वत्व भविष्यति । यदि तर्हि उपसर्जनान्यप्येवजातीयकानि भवन्ति, 'तित्तिरिकलापी' 'कुम्भकपाललोहिनी' अनुपसर्जनलक्षण ईकारो न प्राप्नोति । एव तर्हि शक्त्यामेव शक्तीशब्दो, देवदत्ताया श्यामाशब्द । . एवमपि 'समानाधिकरणेने'ति वर्तते । व्यधिकरणत्वा त्समासो न प्राप्नोति । किं हि वचनान्न भवति ? यद्यपि तावद्वचनात्समास स्यादिति तु खलु मृगीव चपला मृगचपला समानाधिकरणलक्षण पुवद्भावो न प्राप्नोति । एव तर्हि तस्यामेवोभय वर्तते । एतच्चात्र युक्त यच्छस्यामेत्रामर्थं वर्तते

यदा तु, भेदवदर्थको नञ् ब्राह्मणादिभिर्विशेष्यते—'ब्राह्मणभिन्न' इत्यर्थस्तदा पूर्वं पदार्थः—प्रधानम् । यदा च आरोपितब्राह्मण्यवत्तादर्थकः नञ्—आरोपित ब्राह्मण्यवान् क्षत्रियादिरित्यर्थस्तदोत्तरपदार्थप्रधान समास' । द्वन्द्ववत्तु स्वतन्त्र पदार्थद्वयाऽनवगमादुभयपदार्थप्राधान्यपक्षो न संभवति । एषु पक्षेषु कतमोऽत्र पक्ष ! इत्याशयेन तत्र हि आशङ्कितम्—"किंप्रधानोऽय समासः ?" इति । ततश्च अन्यपदार्थप्राधान्यपक्षे 'अन्नपा हेमन्त' इत्यत्र "हेमन्तस्य यल्लिङ्गं वचनं च तत्समासस्याऽपि प्राप्नोती"ति दोषमुक्तवान् । यद्यपि "परवल्लिङ्गमि"ति लिङ्गादेः समाधानमस्ति तथापि न्यासभेदेन द्वन्द्वैकदेशिसमासयोरेव परवल्लिङ्गता इत्याशय, वचनदोषस्य तावताऽप्यपरिहार एवेत्याशयश्च । अतस्मै, असः, इत्यादौ तु न दोष, एतत्तदोरितियूनेऽनञ्समासग्रहणाल्लिङ्गात् नञ्समासे उपसर्जनत्वप्रयुक्तकार्या ऽभावस्य ज्ञापनात् । अन्यथा एतत्तदोरर्थद्वारेण सम्बन्धिन सुप्शब्दस्य लोपो विधीय मानोऽनेवो ददात्यसो ददातीत्यत्र कथ प्राप्नुयात्, तादृशरूपाऽसिद्धेश्चेति अन्न ञसमासग्रहण व्यर्थमेव स्यात् इति माष्याशय । ततश्च पूर्वपदार्थप्राधान्यपक्षेऽपि नञ्यप्राधान्ये लिङ्गसंख्याद्ययोगाऽऽशङ्कायाः शब्दस्वाभाव्येन समाधानं कृत्वाऽपि 'अनेकम्' इत्यत्रैकभिन्नमित्यर्थे भेदस्य प्रतियोगिताऽवच्छेदकेन सह विरोधाद् भेदस्यैकत्वस्याऽनवगतेरेकवचनाऽसिद्धिप्रसङ्ग इत्याशयेन पदान्तर परिगृह्याऽ परितोष सूचित । अनेकमित्यत्रैकवचनस्यैवेष्टत्वमित्यर्थे माष्यकृदेवोक्तवानिति निरूपयिष्यते । ततश्चोत्तरपदार्थप्राधान्यपक्ष एव युक्त इत्याशयेन सिद्धान्तिना समुक्त मितम्—"उत्तरपदार्थप्रधान" इति । यद्यपि आरोपितब्राह्मण्यवदर्थकत्वतात्पर्याऽ नभिधानैकदेशिनाऽत्रापि पक्षे दोष शङ्कित—"यद्युत्तरपदार्थप्रधानः, अब्राह्मण मानयेत्युक्ते ब्राह्मणमात्रस्याऽऽनयनं प्राप्नोती'ति । अभावो नञ्यर्थ, तस्य विशे षणत्वे अभावप्रतियोगी भेदप्रतियोगी वा ब्राह्मण इत्यभवोधे यत्किञ्चिन्निष्ठाऽभाव प्रतियोगित्वस्य तादृशभेदप्रतियोगित्वस्य वा केवलान्वयित्वेनाऽव्यावर्तकत्वान्नञोऽ नयर्थकत्वाऽऽपत्त्या ब्राह्मणाऽब्राह्मणशब्दयो पर्यायताऽऽपत्त्या ब्राह्मणसामान्यस्याऽऽ नयनं प्रसज्यते, न तु शौचाचारादिहीनब्राह्मणविशेषस्यैवेष्टस्य, न वा क्षत्रियादेरिति तदाशय । ततश्च 'नाऽयमभावार्थको नञ्, किन्त्वारोपविपरीतार्थक इति नोक्त दोष' इत्याशय शङ्कासमाधानाभ्यां स्फुटीकर्तुं सिद्धान्ती समाह—"अथवा पुन

रस्तूत्तरपदार्थप्रधान । ननु चोक्तम्—अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयन प्राप्नोतीति ? नैषदोष । इद तावदयं प्रष्टव्य —अथेह राजपुरुषमानयेत्युक्ते पुरुष-मात्रस्यानयनं कस्मान्न भवति ? अस्त्यत्र विशेष । राजा विशेषक प्रयुज्यते, तेन विशिष्टस्यानयन भवति । इहापि तर्हि नञ् विशेषक प्रयुज्यते, तेन नञ् विशिष्टस्यानयन भविष्यति । क पुनरसौ ? निवृत्तपदार्थक" इति । नन्विव शिष्टस्येति—नञ्द्योत्यारोपितब्राह्मणत्वविशिष्टस्येत्यर्थ । कः पुनरसाविति—अभा-वस्यैव नञर्थत्वेन प्रसिद्धत्वात्तथ च अभावप्रतियोगीत्याद्यर्थे पूर्वोक्तदोषस्याऽवारण-प्रसङ्गात्तादृशबोधीयविषयताशाल्यतिरिक्त कोऽसौ नञर्थविशिष्ट उत्तरपदार्थ इति प्रश्न । निवृत्तपदार्थक इति—आरोपितप्रवृत्तिनिमित्तवानुत्तरपदार्थ इत्युत्तरम् । तथाहि—क पुनरसौ नञर्थविशिष्टोत्तरपदार्थ इति प्रश्नस्योत्तरत्वेन प्रयुक्तत्वात् 'निवृत्तपदार्थक' इत्यस्य निवृत्तपदार्थको नञ्विशिष्ट उत्तरपदार्थ इति सम्बन्धो वाच्य । एवञ्च यदि 'निवृत्तपदार्थक' इत्यस्य सर्वथाशून्यपदार्थक इत्यर्थस्तर्हि तस्य नञर्थविशिष्टत्वाऽयोगात् नञ्विशिष्टस्याऽऽनयनं भविष्यतीति भाष्याऽसङ्गतिरेव, समासस्योत्तरपदार्थप्राधान्याऽयोगाच्चत्परकभाष्याऽसङ्गतिश्च । यदाऽपि 'निवृत्त प्रवृत्तिनिमित्तक' 'निवृत्तमुख्यप्रवृत्तिनिमित्तको वा' इत्येतन्मात्रमेवाश्रयस्तदाऽपि प्रवृत्तिनिमित्तशून्यस्याऽर्थस्याऽप्रसिद्धयोक्तभाष्यद्वयाऽसङ्गतिस्तदवस्थैव । तस्मात् 'निवृत्त पदार्थो मुख्यं प्रवृत्तिनिमित्तं यस्मिन्निति बहुव्रीहिणा लब्धेन निवृत्तमुख्य प्रवृत्तिनिमित्तक इत्यक्षरार्थेन 'आरोपित प्रवृत्तिनिमित्तक' इत्याधिक्यं भाष्यस्य तात्पर्यमुन्नीयते । अस्मिन्नर्थे च नञ्द्योत्यारोपितत्वेन विशिष्टत्वमपि उत्तरपदार्थ-ब्राह्मणत्वत्पदार्थ-प्राधान्यमपीति सर्वमवदातम् । एवञ्च अब्राह्मण इत्यस्य आरो पितब्राह्मणत्ववानिति शाब्द प्रत्ययो लभ्यते, स्पष्टञ्चेद कैयटोद्योतयो ।

यत्तु भूषणसारकृता भावार्थकक्तप्रत्ययेन निवृत्त पदार्थो यस्य स —नपुसके भावे क्त इति क्त —अभावार्थको नञ् इत्यर्थ इति व्याख्यात तन्न भद्रेय, बहुदोष-ग्रस्तत्वादितिदिक् ।

अग्रे पुनश्च सिद्धान्तिना निवेदितम्—"इद खल्वपि भूय उत्तरपदार्थप्राधान्ये सति सगृहीत भवति । किम् ? 'अनेकमि'ति । किमत्र सगृहीतम् ? एकवचन मि"ति । आरोपितैकत्ववत्त्वेनैव बोधादेकवचनसिद्धिरिति भाव । यत्तु पूर्वपदार्थ-

तस्माद् अब्राह्मण इत्यादौ आरोपितब्राह्मणत्ववान् क्षत्रियादिरिति बोधः

न चेवमपि सर्वपदार्थे एवान्यसम्बन्धस्य सत्त्वेन अन्ययोगव्यवच्छेदाऽप्रसिद्धेः विशिष्टे शक्त्यसंभवात् अन्ययोगे व्यवच्छेदे च स्वरूपेण शक्त्या अन्ययोगप्रतियोगिकव्यवच्छेदत्वाऽवच्छिन्नधर्मितानिरूपिताऽन्ययोगनिष्ठप्रकारतायाः आश्रयत्वाभाव्यप्रतियोगितानिरूपकत्वसम्बन्धाऽवच्छिन्नत्वेन एवशब्दशक्तिभाव्यसम्बन्धावच्छिन्नत्वसत्त्वेन स्वविशिष्टतया तदवच्छेदकत्वेन अन्ययोगत्वस्य प्रवृत्तिनिमित्तत्वं न स्यात्, इति प्रवृत्तिनिमित्ततदाश्रयाऽतिरिक्ताऽन्ययोगत्वस्य बोधनादेव शब्दात्प्रथमाऽनाऽऽपत्तिरितिचेत्—सत्यम्, एवशब्दादुपस्थितस्यान्ययोगस्यैव व्यवच्छेदोऽन्वये पुनरपि अन्ययोगव्यवच्छेदाऽप्रसिद्धिरेव। तस्मात् 'पार्थ एव धनुर्धर' इत्यादौ एव शब्दार्थैकदेशे भेदे (अन्वये) स्वप्रतियोगिकत्वसम्बन्धेन पार्थादिपदार्थस्याऽन्वयं कृत्वा पार्थप्रतियोगिकभेदयत्प्रतियोगियोगित्वाऽवच्छिन्नस्य प्रतियोगितानिरूपकत्वसम्बन्धेन व्यवच्छेदेऽन्वयः कार्यः। 'पार्थप्रतियोगिकभेदयत्प्रतियोगिकतादात्म्यसम्बन्धाऽभाववान् धनुर्धर' इति बोधात्। तथा च पार्थाऽन्यप्रतियोगिकतादात्म्यसम्बन्धाऽभावो धनुर्धरे प्रसिद्ध्यति। एवञ्च व्यवच्छेदत्वाऽवच्छिन्नधर्मितानिरूपिता प्रतियोगितानिरूपकत्वसम्बन्धाऽवच्छिन्ना अन्ययोगनिष्ठप्रकारता परम्परया पार्थत्वावच्छिन्नाऽपि। प्रवृत्तिनिमित्तलक्षणे च स्वविशिष्टप्रकारतायां स्वेतरपदप्रतिपाद्यताऽवच्छेदकधर्माऽनवच्छिन्नत्वेनाऽपि वैशिष्ट्यस्य निवेश्यते। अन्ययोगत्वाऽवच्छिन्ना च प्रकारता परम्परया पार्थत्वाऽवच्छिन्नत्वेन स्वविशिष्टा नास्तीति तदवच्छेदकेऽन्ययोगत्वे नाऽव्याप्तिरिति सर्वमवदातम्। तथा च—स्वविशिष्टत्वं स्वप्रवृत्तिनिमित्तत्वम्। वै० च-स्ववाच्यत्वं, स्वावान्यनिष्ठविशेष्यतानिरूपितोपस्थितीयप्रकारताऽऽश्रयत्वं, स्वविशिष्टप्रकारताऽनवच्छेदकत्वं तयसम्बन्धेन। सम्बन्धचतुष्टयं वैशिष्ट्यं च—स्वप्रयोज्यधर्मितानिरूपितत्वं, स्वनिष्ठशक्तिभाव्यसम्बन्धाऽनवच्छिन्नत्वं, स्वेतरपदप्रतिपाद्यताऽवच्छेदकधर्माऽनवच्छिन्नत्वेतिश्लिष्टसम्बन्धेनेति लक्षणं पर्यवसितमिति प्राहुः।

तस्मात्—पर्युदासेन अरोपविषयताबोधकत्वात्। अब्राह्मण इति—आरोपितब्राह्मणत्ववत्त्वेन क्षत्रियादेर्बोधो नतु क्षत्रियादित्वेनाऽपि, अतोऽन्द

अत एवोत्तरपदार्थप्राधान्य नञ्तत्पुरुषस्येति प्रवादस्सङ्गच्छते । अत एव चातस्मै ब्राह्मणाय अस शिव इत्यादौ सर्वनामकार्य्यम् । अन्यथा गौण त्वान्न स्यात् । प्रवृत्तिनिमित्तारोपस्तु सदृशे एव भवतीति पर्य्युदास सदृश ग्राही "इति प्रवाद । पर्य्युदासे निषेधस्त्वार्थ । अन्यस्मिन्नन्यधर्मारोपस्तु आहार्य्यज्ञानरूप' । बाधकालिकमिच्छाजन्य ज्ञानमेवाहार्य्यमिति वृद्धा । सादृश्यादयस्तु प्रयोगोपाधय , पर्य्युदासे त्वार्थिकार्थो । तदुक्त हरिणा—

त्वादिति ध्येयम् । अत एवेति—पर्युदासनञस्तद्द्योतकत्वादेव । अत एव चेति पर्युदासनञ आरोपविषयताद्योतकत्वेनोत्तरपदार्थस्य प्राधान्यादेव चेत्यर्थ । अन्यथेति—पर्युदासनञ आरोपविषयताद्योतकत्वाभावे दर्शितभाष्यरीत्योत्तरपदार्थप्राधान्येऽसम्भवेन दर्शितभाष्याशयरीत्या पूर्वपदार्थान्यपदार्थप्राधान्याभ्युपगम इत्यर्थ । गौणत्वादिति—इतरपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताऽवच्छेदकताप्रयोजकत्वादित्यर्थ । न स्यादिति—वार्तिककृता "सशोपसर्जनप्रतिषेध" इति प्रतिषेधारम्भात्, भाष्यकृता च सर्वनामसज्ञाया 'अथवा महतीयं सज्ञा क्रियते' इत्यादिना अन्वर्थसज्ञात्वाऽऽश्रयणादितिभाव । सदृश एव भवतीति—"अब्राह्मणमानये त्युक्ते ब्राह्मणसदृश एवानीयते, नाऽसौ लोष्टमानीय कृती भवति" इति 'भृशादिभ्य' इतिसूत्रस्थ भाष्यमत्र मूलम् । प्रसङ्गादारोपशब्दार्थमाह—अन्यस्मिन्निति ।

बाधकालिकमिति-बाधनिश्चयकालिकमित्यर्थ । इच्छाजन्यमिति-इच्छा च तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वप्रकारिका ग्राह्या । तथा च—यत्किञ्चिद्धर्मविशिष्टज्ञानमाहार्यज्ञानम् । वै० च—स्वाऽभाववत्त्वप्रकारकनिश्चयविशिष्टत्वस्वाऽभाववन्निष्ठविशेष्यतानिरूपितस्वनिष्ठप्रकारताशालिज्ञानत्वप्रकारकेच्छाजन्यत्वोभयसम्बन्धेन । सम्बन्धघटकवैशिष्ट्यञ्च स्वसामानाधिकरण्यस्वाऽन्यवहितोत्तरकालिकत्वसम्बन्धाभ्याम्, यत्र बाधनिश्चयाऽभावे सति 'घटे पटज्ञान जायतामि'तीच्छोत्तर घटे पटज्ञान जात तादृशे भ्रमविशेषेऽतिव्याप्तिवारणाय आद्यम् । तादृशनिश्चयसमानाधिकरण तादृशनिश्चयान्यवहितोत्तरकालिके प्रमात्मकज्ञानेऽतिव्याप्तिवारणाय अन्त्यम् । अन्यत्सरलम् । यथा माणवके 'सिंह' इति ज्ञान यथा वा मुखे 'चन्द्र' इति ज्ञानम् । इदमेव तु रूपकाऽलङ्कारस्य बीजमिति स्मरणीयम् ।

सादृश्यादयस्तु इति—तुः पूर्वोक्तार्थान्निन्नत्वसूचक । उक्तारोपविषयत्वाऽर्थः

तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ इति ।

तत्सादृश्यम् गर्दभेऽनश्वोऽयमित्यादौ । अभावस्तु प्रसज्यप्रतिषेधे वक्ष्यते, तदन्यत्वम् अमनुष्य प्राणिनमानयेत्यादौ । तदल्पत्वम् अनुदरा कन्या इत्यत्रार्थात्स्थूलत्वनिषेधेनोदरस्याल्पत्वं गम्यते । अप्राशस्त्यं ब्राह्मणेऽब्राह्मणोऽयमिति प्रयोगे । विरोधः असुर अधम इति प्रयोगे । पर्युदासस्तु स्वसमभिव्याहृतपदेन सामर्थ्यात्समस्त एव । क्वचित्तु "यजतिषु येयजामह करोति नानुयाजेषु" इत्यादौ घट अपटो भवतीत्यर्थके घटो न पट इत्यादौ च समासविकल्पादसमासेऽपि । अन्योन्याभावः फलितो भवति । प्रसज्यप्रतिषेधस्तु समस्तोऽसमस्तश्चेतिद्विविधः । तत्र विशेष्यतया क्रियान्वयनियमात्सुबन्तेनासाकाङ्क्ष्येऽपि असूर्यंललाट

शब्दवृत्त्या लभ्यते, सादृश्यादयस्त्वर्थवृत्त्या लभ्यन्त इति भावः । प्रयोगोपाधय इति अर्थनिष्ठवृत्त्या लभ्या इत्यर्थः । तदेव स्पष्टीकरोति—आर्थिकाऽर्था इति । सादृश्यादय इत्यादिशब्दमात्मान् विवृणोति तदुक्तमित्यादिना । नञर्थाः पङ्क्तिः—अत्र पञ्चाऽर्थाः पर्युदासनञ्, अभावस्तु प्रसज्य नञ् इति विवेकः । पञ्चाऽमी आर्थिकाऽर्थाः अभावस्तु प्रसज्य-नञ् शब्दार्थ एव वेदनीय । तत्राऽपि सादृश्यमेव व्यापकम् । अत एवोक्तमुपरिष्टात् 'सदृश एव भवती'ति, 'सदृशग्राही'ति च ।

यजतिषु इति—यजतिशब्दो यागसामान्यवचनः, अनुयाजशब्दो याग विशेषवचनः, पञ्चप्रयाजाः, नवोऽनुयाजा इति दर्शनात् । येयजामहशब्दः अय आद्यजन्तत्वेन 'येयजामह' शब्दघटितमन्त्रवचनः । करोतिश्चोच्चारयितृवचनोऽत्र । तथा च—आरोपिताऽनुयाजत्वविशिष्टेषु (अनुयाजभिन्नेषु) यागेषु येयजामह शब्दवन्तं मन्त्रमुच्चारयति दीक्षित इति बोधः । पर्युदासस्यादेशाऽनेकविषयार्थकत्वरूपैकवाक्यत्वम् । अन्यथा विधिनिषेधोभयविधाने वाक्यभेदापत्तिर्गौरवं स्यात् । अपटो भवति = आरोपितपटत्ववान् भवतीत्यर्थः । फलित इति—शाब्दोऽपि नञोऽयं आरोपविषयत्वमेवेति भावः ।

प्रसज्यप्रतिषेधस्तु इति—प्रसज्य (क्रियागुणौ विधाय) प्रतिषेधतीति पचाद्यजन्तोऽयं शब्दः । तत्र—तयोः समस्तोऽसमस्तयोर्मध्ये इत्यर्थः ।। विशेष्य

योगित्यादिज्ञापकात्समास । तदुक्तम्—

प्रसज्यप्रतिषेधोऽय क्रियया सह यत्र नञ् ॥ इति ।

अत्र क्रियापद गुणस्याप्युपलक्षणमिति बहव । अत एव नञ्सूत्रे भाष्ये "प्रसज्याय क्रियागुणौ तत पश्चान्निवृत्ति करोति" इत्युक्तम् । उदाहरणम्—

तयेति—अत एव अद नास्मीत्यादौ पुरुषवचनव्यवस्थोपपत्तिरित्यनुपदमेव वक्ष्यति । क्रियाऽन्वयनियमादिति—अत्र क्रियापद गुणस्याऽप्युपलक्षणमित्यग्रे स्फुटीभविष्यति । सुबन्तेनाऽसामर्थ्येऽपि—गुणेन सामर्थ्येऽपि भाष्यात्तो त्तरपदार्थप्राधान्यस्य मञ्जूषायां बोध्या । इत्यादिज्ञापकादिति—असूर्यंपश्या इत्यस्य सूर्यं न पश्यन्तीत्यर्थबोधेन नञ क्रियायामन्वयेन सूर्यपदार्थेऽन्वयाऽभावात् परस्परसम्बन्धाऽभावेनैकार्थीभावाऽभावात् असूर्यशब्दे समासस्यैव दुर्लभत्वे तस्मिन्नुपपदे सति खश्विधानोक्तिरसगतैवेति सूत्रप्रवृत्तिरसूर्यशब्दे समास ज्ञापयत्येवेति-भाव । अत एव—प्रसज्यनञ क्रियागुणयोर्निषेधबाधकत्वादेवेत्यर्थ । नञ् सूत्रे भाष्ये-तत्र हि-अनेकशब्द प्रक्रम्य—"कथ पुनरेकस्य प्रतिषेधेन द्विबहूनां सम्प्रत्यय स्यात् ?' [ज्ञापकात्प्रसज्यप्रतिषेधेऽपि नञ्समासस्य जायमानत्वेन प्रसज्यप्रतिषे-धाऽऽश्रयणेनैकदेशी शङ्कते—अनेकमितिशब्देन 'एक ने'त्येव प्रतीतेर्द्विबहूनां प्रतीतिर्न स्यादित्यर्थ । सिद्धान्ते पर्युदासपक्षे तु 'अनेक'शब्देन द्विबहूनां प्रतीति सुलभैव, द्वयादिष्वेवैकत्वारोपात् । तत्र द्वित्वादिनिर्णयस्तु तात्पर्य ग्रहादिति बोध्यम् । आरोपितैकत्ववत्त्वेनैव बोधाच्चैकवचनसिद्धि । एवञ्चाऽ-नेके इति बहुवचनमसाध्वेवेति मञ्जूषायामत्र च पूर्वत्र विस्तर ।]

एकदेशिन प्रसज्यप्रतिषेधाश्रयणेन शङ्कायाम् अभ्युपेत्यवादेनैव प्रसज्यप्रतिषे-धार्थमपि निर्णेतु सिद्धान्ती समुत्तरयति—'प्रसज्याऽय क्रियागुणौ तत पश्चान्निवृत्ति करोति इति । तद्यथा—आसय, शायय, भोजय । अनेकमिति ।" (आसन, शायन, भोजनानि विधाय पश्चादनेकमित्यनेन एक न आसयेत्यादिक्रमेण एककर्मकासनादिक्रियाया निषेध क्रियते । अनेकशब्देन गुणनिषेधे उदाह-रणम्—रूप, रसो, गन्ध , अनेकस्मिन्निति । अत्र रूपादिविधानोत्तरमेकाधिक-रणकरूपादिगुणानां निषेध इति तात्पर्यम् । यद्यप्येव घट पटो मठ इत्यादि द्रव्याणि विधायाऽपि अनेकस्मिन्नित्यनेन तादृङ्निषेध कर्तुं शक्यते, तथापि

नास्माकमेक प्रियमिति । एकप्रियप्रतिषेधे बहुप्रियप्रतीतिः । एवं 'न सन्देह नोपलब्धि' इत्याद्युदाहरण गुणस्य सन्देहादीना गुणत्वात् । क्रियोदाहरणम् 'अनघि च' 'गेहे घटो नास्ति' इत्यादि तस्य समस्तस्य तु अत्यन्ताभाव एवार्थ । असमस्तस्य तु अत्यन्ताभावोऽन्योन्याभावश्च ।

तद्भाप्यमाणत्वात् शब्द शक्तिस्वाभाव्यात् एकस्मिन् घटो नेत्यादौ घटीयसत्तायाः (क्रियाया) एव निषेध प्रत्येतव्य । तत्र निषेधयोश्च गुणक्रिययोरसंभवादनिषेतसद्भूयद्रव्याक्षेपे सति एकप्रतिषेधाद् बहूनां प्रतीतिरिति उत्तरम् । प्रसज्यायमिति भाष्येण प्रसज्यप्रतिषेधनञ्यदार्थस्य निर्णय इति स्पष्ट लभ्यते इति तत्त्वम् ।) "यद्यपि तावदत्रैतच्चोद्यते वक्तु यत्र क्रियागुणौ प्रसज्येते । यत्र तु खलु पुनर्न प्रसज्येते तत्र कथम्—'अनेक तिष्ठती'ति ? (यत्र तु पूर्वमेव प्रतिषेधः पश्चात्क्रियागुणविधानं तत्र कथ बहूनां संप्रत्यय ? तत्र पूर्वं क्रियोपस्थित्यभावात् अनियतसङ्ख्यद्रव्याक्षेपाऽभावेनैका न तिष्ठतीत्येवबोधपर्यवसानादिति भावः ।) "भवति चैव जातीयकानामप्येकस्य प्रतिषेधेन बहूनां संप्रत्यय, तद्यथा—'न न एक प्रियम', 'न न एक सुख'मिति ।" [आख्यातस्य पश्चात्प्रयोगोऽस्तु पूर्वं वा, धात्वर्थेन तावत्कारकस्याक्षेपोऽवश्यभावीति तत्रैकप्रतिषेधसामर्थ्यादेव क्रियाद्यपेक्षिसाधनाक्षेपः, अन्यथा 'न प्रियमि'त्येव वाच्य स्यात् । तस्माद्यत्र वाक्येऽपि सामर्थ्यात्संख्यान्तरगतिर्भवति तत्र समासे वाक्यविलक्षणधर्मप्रादुर्भावहेतौ किं न भविष्यतीत्युक्त भवति । न अस्माकमेक प्रिय न, किन्त्वनेकमिति यदर्थं । स्पष्टश्चैतत् कैयटोद्योतयो ।]

एकप्रियप्रतिषेध इति—अत्र एकत्व सङ्ख्यारूपो गुणस्तत्प्रतिषेधः, एवम् प्रिये एकत्वसङ्ख्याप्रतिषेध पर्यवस्यति । न चासीतिपदाऽध्याहारादेकप्रियकर्तृकसत्ताया एव निषेध इति क्रियोदाहरणमेवैतदिति वाच्यम्, उक्तभाष्यप्रामाण्यात् गुणस्यैवाऽत्र निषेधाऽनुभव इत्याशयात् । तस्य समस्तस्य तु—तस्य = प्रसज्य प्रतिषेधनञ्र इत्यर्थं । असमस्तस्य तु—प्रसज्यप्रतिषेधनञ् पर्युदासनञ्योरिति शेषः । तथा च—असमस्तस्य प्रसज्यप्रतिषेधनञोऽत्यन्ताभावोऽर्थं, असमस्तस्य पर्युदासनञस्तु अन्योऽन्याऽभावश्चेति । चकारात् आरोपविषयत्वमिति योजना । घटो न पट इति तु असमस्तस्य पर्युदासनञोऽन्योऽन्याभावबोधकत्वे उदाहरणम् ।

तादात्म्येतरसम्बन्धाभावोऽत्यन्ताभाव । तादात्म्यसम्बन्धाभावोऽन्यो न्याभावो भेद इत्यर्थ । असूर्य्यंपश्या राजदारा, गेहे घटो नास्ति, घटो न पट इत्युक्ताहरणानि । प्रागभावप्रध्वंसाभावौ तु न नञ्द्योत्यौ ।

तत्रात्यन्ताभावो विशेष्यतया तिङर्थक्रियान्वय्येव । नञर्थात्यन्ताभावविशेष्यकबोधे तिङ्समभिव्याहृतधातुज योपस्थिते कारणत्वात् । अन्योऽन्याभावोऽप्यत्र पतितार्थ एव, शाब्दस्तु आरोपविषयत्वमेवेति विशेषोऽवसेय । तेन प्रसज्यप्रतिषेधनञ पदार्थनिर्णायकेण उक्तभाष्येण, घटो न पट इत्यादाविति स्वीयपूर्वग्रन्थेन च विरोधो न भवतीतिदिक् । एवञ्च—पर्युदासत्वम्—आरोपविषयताद्योतकत्वम् । प्रसज्यत्वञ्च—क्रियागुणाऽन्यतरप्रतियोगिकाऽत्यन्ताऽभावद्योतकत्वमिति लक्षण द्रष्टव्यम् । तादात्म्येतरेति—तादात्म्येतरसम्बन्धाऽवच्छिन्नप्रतियोगिताकोऽभावोऽत्यन्ताऽभाव, तादात्म्यसम्बन्धाऽवच्छिन्नप्रतियोगिताकोऽभावोऽन्योऽन्याऽभाव इत्यर्थ ।

असूर्यंपश्या इति—सूर्यकर्मकदर्शनप्रतियोगिकाभाववन्तो राजदारा इति शाब्दबोध । गेहे घटो नास्तीति—गेहाधिकरणकघटकर्तृकसत्ताऽभाव इति बोध । घटो न पट —आरोपितपटत्ववान् घट इति शाब्दबोधे घटत्वाऽवच्छिन्नप्रतियोगितानिरूपकभेदविशिष्टो घट इत्यन्योऽन्याऽभाव फलितो भवतीति द्रष्टव्यम् ।

प्रागभावेत्यादि—'इह घटो भविष्यति' इति प्रतीतिसाक्षिक प्रागभाव, 'इह घटो नष्ट' इति प्रतीतिसाक्षिक प्रध्वंसाऽभाव । इमौ नञा नाऽभिलप्येते स्वभावात् । अतएव ध्वंसप्रागभावयोर्नाऽत्यन्ताऽभावविरोधित्वमिति प्रक्रम्य रक्तिमध्वंसप्रागभाववति श्यामे घटे 'रक्त रूप नास्ती'ति प्रत्ययस्याऽत्यन्ताऽभावाऽविषयत्वमेन सिद्धान्तित टीघितिकृता—"न चैष रक्तिमध्वंसाद्यविषयगाही, पूर्वा परक्तिमध्वंसप्रागभाववति (इदानी) रक्तेऽपि तथाप्रत्ययप्रसङ्गात्" इत्यन्तेन ग्रन्थेन । तत्रेति—अत्यन्ताऽभावाऽन्योऽन्याभावयोर्मध्ये इत्यर्थ, निर्धारणे सप्तमी । तिङन्तार्थक्रियेति—अत्राऽपि गुणस्य प्रवेश पूर्वोक्तभाष्यानुरोधात् । कारणत्वादिति—नञर्थाऽत्यन्ताऽभावत्वाऽवच्छिन्नविशेष्यतानिरूपित प्रकारतासम्बन्धेन शाब्दबुद्धित्वाऽवच्छिन्न प्रति भावनात्वगुणत्वाऽन्यतरधर्माऽवच्छिन्नविशेष्यतासम्बन्धेन तिङ्समभिव्याहृतधातुगुणवाचकपदाऽन्यतरजन्यो

तथा च घटो नास्तीत्यादौ घटकर्तृकसत्ताप्रतियोगिकोऽभाव इतिबोधः। अत एवाहु नास्मि त्व नासीत्यादौ घटो नस्तो घटा न स न्तीत्यादौ च पुरुषवचनव्यवस्थोपपद्यते। अन्यथा युष्मदादेस्तिङ्सामानाधिकरण्याभावात् मदभावोऽस्तीत्यादाविव सा न स्यात्। असद्देह इत्यादौ तु आरोपितार्थकनञ्चेव समासः। अत्यन्ताभावस्तु फक्किक एव। यायौ रूप नास्तीत्यथ तु तात्पर्यानुपपत्त्या रूपप्रतियोगिकात्यन्ताभावे लक्षणा, तेन चाश्रयाधिकरणका रूपाभावकर्तृका सत्तेति बोध। वस्तुतस्तु समनियता

पारिशेष्यते कारणत्वादित्यर्थ। अत एव = नञर्थोऽत्यन्ताभावस्य क्रियागुणौ प्रति विशेष्यत्वेन बोधादेव। नन्वेवम् 'असद्देह' इत्यादिसमासेऽपि अभावविशेष्यक प्रती वाधुत्तरपदार्थप्राधान्यात्मकभाष्यसिद्धान्तस्य भङ्गापत्तिरित्यत आह—असद्देह इत्या दावति। आरोपितार्थकनञ्चेति—तथा च नाऽय प्रसज्यप्रतिषेध किन्तु पर्युदास एवेति भाव। ननु यायौ रूप नास्तीत्यत्र अस्तीत्यशाऽपि बाधाऽन्यव रत्वस्य सत्त्वेऽपि बाधप्रकारतासम्बन्धन शाब्दबोधस्याऽनिष्टत्वेन प्रोक्तकार्यकारण भावेऽन्वय यभिचारः, रूपाऽभावकर्तृकसत्ताया एव विशेष्यत्वबोधादित्यत आह—यायौ रूप नास्तीति। तात्पर्यानुपपत्त्येति—रूपाऽभावप्रकारकबोधस्यैव तात्पर्य विषयत्वादिति भावः। लक्षणेति—रूपपदस्य रूपप्रतियोगिकाऽत्यन्ताऽभावे लक्षणा, नञ्पदञ्च तात्पर्यग्राहकम्। तथाचोक्तकार्यकारणभावीयकारणताऽवच्छेदकक्षणे नञ्पदस्य प्रवेशावश्यकत्वेन प्रकृते नञो निरर्थकत्वेन न कारणताऽवच्छेदकाऽऽ क्रान्तिरिति नास्ति व्यभिचार। तथा च याचकनञ्समभिव्याहृतेति विशेषण कारणताऽवच्छेदके पूरणीयम्। इद तु बोद्धव्यम्—नञो याचकतावादिनो मतानुरोधे नेद सर्वम्। याचकतावादिनां सिद्धान्ते तु नञर्थस्य पृथगनुपस्थित्याऽन्वयव्यभिचारऽ सङ्गतिरेवेति। लक्षणाऽऽश्रयणे गौरवादाह—वस्तुतस्तु इति। समनियताऽ भावेति—सामनियत्यञ्च—व्याप्यत्वे सति व्याप्यत्वम्, अन्यूनाऽनति-रिक्तवृत्तित्वमिति यावत्। समनियताऽभावानामैक्यमिति हि केषामपि मतम्। रूपसत्ताऽभावस्य स्वाभावसामनियत्येन द्वयारैक्ये रूपाऽभावकर्तृक सत्तेति बोध पर्यवसितार्थ एव, शाब्दस्तूक्तकार्यकारणभावाऽनुरोधेन रूपकर्तृकसत्ताऽभाव इत्याकारक एव। इद यथाश्रुतकार्यकारणभावा-भिप्रायेण। "प्रसज्याऽय क्रियागुणा"दिति-

भावैक्यमाश्रित्य फलितार्थ एवायम्, अरूपमस्तीत्यर्थक वा तत् । एतेना-त्यन्ताभावप्रकारकक्रियाविशेष्यको घोध इति तार्किकोक्तमपास्तम् ।

नन्वेव घटसत्तारूपोऽर्थ प्रथम बुद्धो नञा निवर्तयितु मशक्य', सतो निषेधायोगादसत्तस्त्वसत्त्वादेव निवृत्ति सिद्धा निषेधो व्यर्थ' । तदुक्तम्—

सता च न निषेधोऽस्ति सोऽसत्सु च न विद्यते ।
जगत्यनेन न्यायेन नञ्यर्थ प्रत्यय गत ॥ इति चेन्न ।

बौद्धो हि शब्दो वाचक' बौद्ध एवार्थो वाच्य इत्युक्तत्वात् बुद्धिसतोऽप्यर्थस्य नञा बाह्यसत्तानिषेधात् । बुद्धौ सन्नपि घटो बहिर्नास्तीत्यर्थात् । न च घटास्तिपदाभ्या या घटविषयाऽस्तिबुद्धिर्जाता सा नञा निवर्त्यते किं बौद्धाथस्वीकारेणेति वाच्यम् । बुद्धशब्दावाच्यत्वेन नञा सन्निषेधायोगात् । एतेन बौद्धार्थमस्वीकुर्वन्ता नञ्यर्थबोधाय कष्टकल्पना

भाष्यानुरोधेनोक्तकार्यकारणभावे गुणस्य प्रवेशे तु वायौ रूप नास्तीत्यत्र तादृशान्यतरत्वस्य गुणे क्रियायाञ्चोभयत्र सत्त्वेन व्यभिचारस्य दुवारत्वेनोक्तरीत्या लक्षणाऽप्रसिद्धा शक्तिर्वाऽऽश्रयणीयेति द्रष्टव्यम् । इत एवाऽपरितोषादाह-अरूपमस्तीति ।

आसमस्तीत्यर्थक वा तत्—अस्य 'वायौ' इत्यादि । तत्=वायौ रूप नास्तीति वाक्यम् । अरूपमिति समासस्य वैकल्पिकत्वेन तदभावपक्षे वाक्यमिदम् । ततश्च पर्युदासनञ्जेवात्र । आरोपितरूपत्ववद्वाय्वधिकरणकस्पर्शादिकर्तृकसत्तेति शाब्दबोधे वायौ रूपाऽभावबोध' फलितार्थ एवेति तात्पर्यम् ।

"नाऽसतो विद्यतेऽभावो नाऽभावो विद्यते सत " इति गीताप्रदर्शितसाङ्ख्योक्त सत्कार्यवादसिद्धान्तरीत्या शङ्कते—नन्वेवमिति । एवम्=तिङन्तार्थप्रकारकनञर्थविशेष्यकशाब्दबोधाङ्गीकार इत्यर्थ । इत्युक्त्वादिति—स्फोटवादे शक्तिवादे चेत्यादि । स्वप्नाद्यनुरोधेन च बौद्धपदार्थस्याऽऽवश्यकत्वात् । बुद्धे शब्दाऽवाच्यत्वेनेति—स्वघटमभिव्याहृतपदार्थनिष्ठप्रतियोगिताकमेवाऽभाव नञ् बोधयति शब्दस्वाभाव्यात् । न हि घटोऽस्तीतिशब्दवाच्या घटविषयाऽस्तिबुद्धि । तस्मान्नञ् तद्बुद्धेरभाव बोधयितुमक्षम एव, घटसत्ताबुद्धिर्नेत्यनेनैव शब्देन तादृग्बुद्धेरभावस्य बोधयितु शक्यत्वात्, प्रसज्याऽयं क्रियागुणावित्यादिभाष्येण शब्दजन्य बुद्धिविषयीभूतयो क्रियागुणयोरेव नञा प्रतिषेधस्य बोधनादिति भाव । एतेन—

कुर्वन्त्वार्किकाः पराहता। घटो न पट इत्यत्र घटपदस्य घटप्रतियोगिक भेदाश्रये अप्रसिद्धा शक्तिरेव लक्षणा, नञ्पद तात्पर्यग्राहकम्। तात्पर्य ग्राहकत्व बोधकत्वमेवेत्युक्तम्। अत एवान्योन्याभावबोधे प्रतियोग्यनु योगिपदयो समानविभक्तिकत्वं नियामकमिति वृद्धोक्त सङ्गच्छते। यत्तु घटपद घटप्रतियोगिके लाक्षणिक नञ्पदन्तु भेदवति। अतो घ प्रतियोगिकभेदवान्पट इति बोध इति तार्किकैरुक्तम्। तन्न। भेदवति नञर्थे भेदस्यैकदेशत्वात् तत्र घटार्थानन्वयापत्तेः। 'पदार्थं पदार्थे नान्वेति न तु पदार्थैकदेशेन' इति न्यायात्। पदद्वये लक्षणास्वीकारेऽगौर वाच्च। भाष्यमते लक्षणाया निपातानां वाचकत्वस्य च स्वीकार भावादिति सक्षेप'।

बुद्धे शब्दाऽवाच्यत्वेन नभा तन्निषेधस्याऽयोगेन। कष्टकल्पनाम्=बुद्धेरेव निषेधरूपामनन्तरोक्ताम्। पराहता इति—यशश्चन्द्रादिपदानां भाक्षाऽयाऽभावेन प्रातिपदिकत्वाऽनापत्तेश्चेति निरूपितपूर्वम्।

घटो न पट इत्यत्रेति—प्राचीनशाब्दिकमतवासनयेदं वर्ण्यते। स्वमते तु समासविकल्पात् अपटो भवतीत्यर्थक सत्, पर्युदासनञा आरोपितपटत्ववान् घ इति शाब्दबोधात्। अत एव न स्वपूर्वमपदेन व्यायात्। तदभ्यनयन् वक्ष्यति—वृद्धोक्त सङ्गच्छत इति। अत एव=लक्षणया पर्युदासन्यायेन वा प्रतियोग्यनु योगिनो सामानाधिकरण्यस्योपपादनादेव। समानविभक्तिकत्वमिति—सप्तम्य स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वम्। विभक्तिश्च सुबेवात्र। सजातीयत्वञ्च विभक्तिविभाजकधर्मावच्छिन्नीयास्वादिना, न तु समानानुपूर्वीकत्वं सामान्यम्, धातुधातुजयो नेत्यादिभेदस्याऽपि दृष्टत्वात्। पदार्थः पदार्थेनेति—यत्किञ्चित्पद जन्यप्रतीतिविशेष्यन्वाश्रयनिष्ठप्रकारतानिरूपितविशेष्यतासंसर्गेण शाब्दबुद्धित्वाऽ यच्छब्दं प्रति विशेष्यतासंसर्गेण स्वेतरपदजन्योपस्थिते कारणत्वमिति कार्य कारणभावमूलकोऽयं न्याय। अयं न्यायो नञर्थाऽतिरिक्तविषय इति कल्पने तु गौरवम्। नन्नु नित्यसमासाङ्गीकारे नाऽय न्यायो व्यवस्थापक, अत एव श्वेतस्य गुरुकुलम् इत्यादावेकदेशेऽप्यन्वय इष्यते इत्यरुचितोपादाह—पदद्वय इत्यादि।

भाष्यमते लक्षणाया इत्यादि—"सर्वे सर्वार्थवाचका" इति भाष्येण सर्व

व्यवच्छेदरूपम् । विशेष्ये—पार्थ एव धनुर्धर[1] । पार्थवृत्ति यद्धनुर्धरत्व तादृशधनुर्धरत्ववान् पार्थ इति बोध इत्यन्यस्मिन्धनुर्धरत्वसम्बन्धव्यवच्छेद । विशेषणे—शङ्ख पाण्डुर एव । अयोग सम्बन्धाभाव तस्य व्यवच्छेदो निवृत्ति द्वाभ्या निपेधाभ्या प्रकृतार्थावधारणेन अन्यभिचरितपाण्डुरत्वगुणवान् शङ्ख इति बोध इत्ययोगव्यवच्छेद । न तु नील इति तु फलति । क्रियाया नील सरोज भवत्येव । अत्य तोऽतिशयितोऽयोग सम्बन्धाभावस्तस्य व्यवच्छेदोऽभाव । तथा च कदाचिन्नीलत्वगुणवदभिन्न यत्सरोज तत्कर्तृका सत्तेति बोध । कदाचिदन्यादृशगुणसयुक्तमित्यपि गम्यते इत्यत्यन्तायोगव्यवच्छेद ।

केचित्तु—पार्थेतरप्रतियोगिकतादात्म्यसम्बन्धाऽभाववान् धनुर्धर इत्येव शाब्दाऽऽकारः । विशिष्टाऽवसिद्धया अन्ययोगे व्यवच्छेदे च खण्डश शक्तिः । पार्थपदस्य च अन्यत्वाश्रयैकदेशेऽन्यत्वे स्वनिष्ठप्रतियोगितानिरूपकत्वसम्बन्धेनाऽन्वय । मूलोक्ताऽऽकारे तु पार्थपदस्य द्वि प्रवेशे गौरवम्, योगपद्यार्थं धनुर्धरत्वस्यैकदेश भूतधनुर्धरत्वस्यान्वयो दुरुपपाद्य । एव शङ्ख पाण्डुर एवेत्यत्र पाण्डुप्रतियोगिकतादात्म्यसम्बन्धाऽभावाऽभाववान् शङ्ख इति शाब्दाकार । नील सरोज भवत्येवेत्यत्र च नीलाऽभिन्नसरोजकर्तृका अतिशयितो य सम्बन्धाऽभावस्तदभाववती सत्तेति शाब्दाकार इत्याहु ।

परे तु एवद्योत्यमवधारण ज्ञानविशेष । स च एवसमभिव्याहृतपदार्थविषयण । अवधारणञ्च 'पार्थ एव धनुर्धर' इत्यादौ विशेष्यसंगतेऽवकारे स्वाऽतिरिक्ताऽवृत्तिसमभिव्याहृतपदार्थताऽवच्छेदकप्रकारकज्ञानम्—पार्थेतराऽवृत्तिधनुर्धरत्ववान्—इत्याकारम् । तथा विशेष्यतेन पार्थे विशेषणम् । अवधारणविरहे पार्थो धनुर्धर इति शाब्दबोध । अन्ययोगव्यवच्छेदेन धनुर्धरत्वज्ञानवन्तं प्रति तद्बुध्यनिषक्षापेक्ष प्रयोगादेवास्तदन्यो धनुर्धरो नेति फलति । शङ्ख पाण्डुर एवेत्यादौ विशेषणसंगते स्वाऽवच्छेदकाऽतिरिक्तधर्माऽनाभसमभिव्याहृतपदार्थविरहप्रकारकज्ञानरूपम्—अवधारणप्रकारीभूत पाण्डुपदाऽभिन्न शङ्ख इति शाब्दाकारः । क्रियासंगते चैत्रो दृश्यत्येवेत्यादौ स्वाऽतिरिक्तमुद्दिश्यविधेयाऽनाभसमभिव्याहृत

क्वचिदेवशब्द विनापि नियमप्रतीति । तदुक्त भाष्ये—अभक्ष्यो

पदार्थप्रकारकज्ञानरूप तत्, न रोदितीति प्रतिनिर्देशात् । चैत्रकर्तृकोऽवधारण विशेष्यो ह्यस इति शाब्द । एव नीलं सरोजं भवत्येवेत्यादौ नीलभवनाऽभावान-धिकरणसमभिव्याहृतपदार्थप्रकारकज्ञानरूप तत्, 'न भवतीति ने'ति प्रति निर्देशात्, नीलाऽभिन्नसरोजकर्तृकाऽवधारणविशेष्या सत्तेति शाब्द । 'पञ्च पञ्चनखा भक्ष्या' इत्यादौ अवधारणविषयबुद्धित्वशृत्तिपञ्चत्वसङ्ख्यावदर्थं पञ्च पदस्य लक्षणा । अवधारणविषयीभूता ये बुद्धित्व शशकयवकीगोधाखड्गकूर्मवृत्ति पञ्चत्वसङ्ख्यावन्तस्तत्रेत्यर्थ । अवधारणञ्चाऽत्र स्वगतसङ्ख्याऽतिरिक्तसङ्ख्याऽ धिकरणाऽसम्बन्धिसमभिव्याहृतपदार्थप्रकारकज्ञानरूपम्, स्यादयसम्बन्धिभक्ष्यत्व विशिष्टा पञ्च पञ्चनखा इत्याकारम् । अवधारणविशेष्या शशकादिवृत्तिपञ्चत्व-सङ्ख्यावन्त पञ्चनखा भक्ष्या इति बोध । अतोऽन्ये अभक्ष्या इति फलति । कदाचित् स्पष्टत्वार्थं फलितार्थकप्रयोगोऽपि—यथा 'त्वन्मुखं त्वन्मुखेनैव तुल्य नाऽन्येन केनचित्' इत्यत्र नाऽन्येन केनचिदिति । आर्थ्या वृत्त्या लुप्तस्य शब्देन प्रति-पादने पौनरुक्त्यमावस्यालङ्कारिकैरपि स्वीकारात् । सकलसाधारण्यमवधार णत्वमखण्डोपाधि । तेनैव रूपेण शक्ति शाब्दबोधश्च । अत एव च व्यवच्छे दस्य शाब्दत्वाऽभावात् नियमस्याणां विधिमुखेनैव प्रवृत्तिरित्युदघोषा भाष्य तत्त्वविदाम् ।

यत्तु एवकाराऽर्थोऽन्ययोगव्यवच्छेद इति । तन्न, पृथिव्यामेव गन्ध इत्यादौ पृथिवीपदार्थस्यैवकारार्थेऽन्यत्रे गन्धे चाऽन्वये पृथिव्याऽवृत्ति पृथिवीवृत्तिर्गन्ध इति बोधे पृथिव्यामितिसप्तमीविभक्त्यर्थरहितस्याऽपि पृथिवीपदार्थादेरन्वयस्य व्युत्पत्तिवैचित्र्यहेतुकत्वकल्पने गौरवात् । अनेकव्युत्पत्तिवैचित्र्यकल्पनस्याऽन्याय्य त्वाच्च । तादृशेऽर्थे विमक्ते साधुत्वमात्रार्थिकाया शाब्देनाऽनन्वाख्यानाच्च । तस्मा देतत्य मूल परमतवासनया, फलितार्थपरं वा नेयमितिदिक् इत्याहु ।

क्वचिद् = यत्र प्रमाणान्तरेण पाक्षिकप्राप्तिकस्याऽर्थस्य पाक्षिकाऽभावनिवृत्ति-फलक विधानम्, यत्र च प्रमाणान्तरेण सामान्ये (तत्र श्र यत्र च) प्राप्तस्यार्थस्य विशेषे पुनर्विधानम्, यत्र वा प्रमाणान्तरेण सामान्ये प्राप्तस्याऽर्थस्य विशेषांश निषेध-स्मृतिस्तत्रेत्यर्थः । एवशब्द विनाऽपि—एवशब्दस्य द्योतकत्वादिति भाव ।

नियमप्रतीति = नियमपरिसङ्ख्याऽन्यतरप्रतीतिरित्यर्थः । यद्यपि भट्टमाणरीत्या मीमांसका नियमपरिसङ्ख्ययोर्भेदमामनन्ति तथापि अन्यनिवृत्तिफलकत्वात् व्याकरणे परिसङ्ख्याया अपि नियमपदेन व्यवहारः, "भक्ष्यनियमेन' भक्ष्यप्रतिषेधो गम्यते—'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या इति" इत्यस्मिन्पस्पशाह्निके भाष्ये मीमांसकाऽभिमतपरिसङ्ख्याया भक्ष्यनियमेनेति नियमत्वेन व्यवहारात् वस्तुतस्तु इतरनिवृत्तिफलक उपदेश एव नियमादेनोच्यते, 'अन्यतरोपदेशेन कृत स्यात् तद्यथा भक्ष्यनियमेने'त्यादिभाष्यग्रन्थप्रवक्तॄणां प्रतीतेरिति प्रामाणिकाः । किञ्च "अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः" इति वार्तिकभाष्ये प्रतिषेधवाक्ये मीमांसकाऽभिमतनियम-परिसङ्ख्यापदार्थाऽसङ्गतिरेव, विधिवाक्य एव तेषां तत्स्वीकारादिति दिक् ।

तत्रैवशब्दं विनाऽपि नियमप्रतीतिरुक्तेषु त्रिषु स्थलेषु आद्य यथा—प्रोक्षणेन भक्षन्तीति । अत्र 'चरुनिमित्तं तण्डुला निष्पाद्याः' इति पुरोडाशविधिना यत्रेष्टं तण्डुलविदलनफलकाऽन्यतरेण प्रोक्षणप्राप्तौ पाक्षिकायां निस्तुषीकरणप्राप्तौ पाक्षिकायां तस्यैवाऽवहननस्य विधानेन व्यर्थीभूतेन सामर्थ्यात् (अवहन्त्येव) अवहन्त्यादेव न तु विदलेदिति' नियम्यते ।

यथा वा—समे यजेत इति । अत्र स्वर्गकामो यजेतेति यागविधिना यत्र समविषमदेशयोरन्यतरस्मिन् यागस्य प्राप्तौ समे देशेऽपि पाक्षिकप्राप्तिकस्यैव यागस्य विधानेन व्यर्थीभूय सम एव यजेतेति नियम्यते । अत्र पूर्वत्र च न युगपद्देशे प्राप्तिरस्तीत्वात्, किन्तु पाक्षिक्येव ।

द्वितीय यथा—पञ्च पञ्चनखा भक्ष्या इति । अत्र यागतो लौकिकप्राप्ता शशकादिमांसभक्षणस्य श्वादिमांसभक्षणस्य च युगपत्प्राप्तौ पञ्चनखसामान्ये प्राप्तस्यैव भक्षणस्य विशेषे पञ्चनख्यपक्षके व्यर्थीभूतेन पुनर्भक्षणविधानेन पञ्चनखेषु अभक्षणीयास्तर्हि शशकादय पञ्चेनेति परिसङ्ख्यापते तदुक्त पस्पशाह्निके— "भक्ष्यनियमेनाऽभक्ष्यप्रतिषेधो गम्यते । पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या इति ।" अत्र अभक्ष्यप्रतिषेध इत्यस्य अभक्ष्यभक्षणप्रतिषेध इत्यर्थः । एव भक्ष्यनियमेनेत्यस्य भक्ष्यभक्षणनियमेनेत्यप्य एवमेवेति । परेऽपि "अत्र सर्वेषा पञ्चनखाना भक्ष्ये प्राप्ते पञ्चैव पञ्चनखा भक्ष्या न सर्व

ग्राम्यकुक्कुट इत्युक्ते गम्यत एतत् आरण्यो भक्ष्य इति। 'सर्वं वाक्य सावधारणम्' इति न्यायात्। आलङ्कारिका अपि परिसङ्ख्यालङ्कारप्रकरणे प्रमाणान्तरेण प्राप्तस्यैव वस्तुन' पुन शब्देन प्रतिपादन प्रयोजनान्तरा भावात् स्वतुल्यान्यव्यवच्छेद गमयतीति। भागवतेऽपि—

लोके व्यवायामिषमद्यसेवा नित्यास्ति जन्तोर्नहि तत्र चोदना।

इति निगद्यते" इति तर्कप्रकाशसिद्धान्तच प्रादर्शयत्युक्तम्। अत्र द्वयोर्युगपदपि प्राप्तिरूपयोरपि मांसयोर्युगपद्भक्षणस्य समवादिति पूर्वतो भेद। यथा वा समासे वाक्ये च अर्थवत्सूत्रेण प्रातस्यैव प्रातिपदिकस्य पुनर्विधानात् समास-ग्रहणेन व्यर्थीभूय यत्र संघाते पूर्वो भाग पदं यस्य पदे भवति तर्हि समासस्यैवेति परिसङ्ख्यायते।

तृतीय यथा—अभक्ष्यो ग्राम्यकुक्कुट इति। अत्र रागतो ग्राम्यारण्यकक्कुक्कु टसामान्ये प्राप्तस्य भक्षणस्य विशेषांशे (ग्राम्यकुक्कुटे) निषेधस्मृत्या इतरांशे (आरण्यककुक्कुटे) भक्षणस्याऽभ्यनुज्ञारूपा नियम प्रतीयते—ग्राम्य एव कुक्कुटो न भक्षणीय, आरण्यकस्तु भक्षणीय इति। तदुक्त पस्पशाह्निके—"अभक्ष्यप्रतिषेधेन वा भक्ष्यनियम। तद्यथा—'अभक्ष्यो ग्राम्यकुक्कुट' 'अभक्ष्यो ग्राम्यसूकर' इत्युक्ते गम्यत एतदा'रण्यको भक्ष्य'इति।" अत्र प्रथमे नियमेन इतर प्रतिषेधस्य गति, द्वितीये परिसङ्ख्यया इतरप्रतिषेधस्य गति, तृतीये च इतरप्रति षेधेन प्रमाणान्तरप्राप्तेऽस्याभ्यनुज्ञाया प्रतीतिरिति विवेक।

अन्येषांस्तु विशेष—एवशब्देन नियमपरिसङ्ख्याऽभ्यनुज्ञानां स्फुटा प्रतीति, एवशब्द विना तु अस्फुटेति।

स्वोक्तेऽर्थे भाष्य प्रमाणत्वेन प्रदर्श्य न्यायमपि प्रमाणयति-सर्वं वाक्यमिति= व्याख्यातपूर्वोऽयम्। आलङ्कारिकानपि स्वोक्ते प्रमाणीकरोति-आलङ्कारिका अपी ति—मम्मटभट्टा इति भाव, काव्यप्रकाशे तथोक्ते। व्यवच्छेद गमयतीति—एतेन व्यवच्छेदस्य आर्थत्वमेवेति सूचितम्। प्रमाणान्तरेण प्राप्तस्य पुन प्रापणे नाऽत्र व्यवच्छेदप्रतीतिरिति भागवतेऽपि प्रमाणयति—भागवतेऽपीत्यादिना।

व्यवायामिषमद्यसेवेति—सर्वस्यैव विषयोपभोगस्योपलक्षणमिदम्। नित्या इत्यस्य विवरण रागत, प्राप्ता इति। स्वभावेन, प्रकृतिप्रेरणया वा प्राप्ता इति

व्यवस्थितविस्तेषु विवाहयज्ञसुरामदैरासु निवृत्तिरिष्टा ॥ इति ॥

व्यवायो मैथुनम्, आमिष मत्स्यादि, मद्यम्—एतेषा सेवा जन्तो प्राणिमात्रस्य नित्या रागतः प्राप्ता । अतस्तत्र चोदना विधिर्नास्ति । नन्व "ऋतौ भार्य्यामुपेयात्" "हुतशेषम्भक्षयेत्" "सौत्रामण्या सुरामद्यान

यावत् । जन्तो प्राणिमात्रस्य । चोदनेत्यस्य विवरणं विधिरिति । यथा आत्मः शिशु न हि कश्चित्प्रेरयति स्तनत्रया भवेति, यथा वा क्षुत्क्षामपुरीषादिपीडित न हि कश्चित्प्रेरयति भोजनपानोत्सर्गानाचरतेति, स्वभावात्ते प्रवर्तन्ते, तथैव व्यवाय दावपि प्रेरणाया नास्त्येवाऽवसर, स्वभावत एव प्रवृत्तिर्भवतीति तात्पर्यम् । श्रुतौ विवाहपदेन ऋतुकालिकमार्यागमनविधिरुपलक्ष्यते, यज्ञपदेन हुतशेषकर्मकभक्षण विधि, सुराग्रहपदेन च सौत्रामण्यधिकरणकसुराग्रहकर्मकग्रहणविधिरुपलक्ष्यते तैर्विधिवाक्यै तेषु व्यवायादिषु "यवस्थिति पुन प्रापण भवतीतिशेष" । ननु पुन प्रापणमिदानी किमर्थम् ? इत्यत आह—आसु निवृत्तिरिष्टेति एभ्योऽन्येषु इति स्व भावाहुतशेषसौत्रामण्यसम्बन्धिभ्योऽतिरिक्तेषु व्यवायादिषु शीघ्र निवृत्तिरिष्टस्य अन्यत्र निवृत्तिरेव पुन प्रापणस्य फलं, सामर्थ्यात् वक्ष्यमाणरीत्या प्रापकप्रमाणतो देश्यताऽवच्छेदकाऽवच्छिन्ने सकोचादिति भाव । तदाह—न चेयमित्यादिना ।

ऋतौ भार्यामिति—अस्य 'ऋतावेव', 'तत्र भार्यामेव', 'तत्र तामुपेयादेवे'ति नियमत्रये तात्पर्यम् । ऋतुस्तु नारीणा रजोदर्शनादनन्तरा षोडश निशा । तदतिरिक्तकाले भार्यागमननिवृत्तिर्यत्रनियमे फलति । अत एव यद्यस्याऽनृतौ अनुपगमने प्रत्यवायमुक्त स्मृतौ । द्वितीये भार्येतरस्त्रीगमननिवृत्तिः, तृतीये गमनाऽभावनिवृत्तिरिति तिस्रो निवृत्तय फलन्ति । अत एव अविधादितागमने क्रमो भार्यागमनाऽभावे च प्रायश्चित्त प्रोक्तं स्मृतिषु । 'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां पच्यते' इति दोषश्रवण तु मनसि कामे सत्यपि तस्यां दोषादिनाऽनुपगमने बोध्यम, कामाऽभावेतु अनुपगमने दोषो नास्ति, तृतीय नियमेनाऽभ्यनुज्ञाया अप्रतीघातादित्यपि वदन्ति ।

हुतशेषमिति—हुतशेषमेव मांस भक्षयेन्नत्वन्यदिति परिसङ्ख्यायते । सौत्रामण्यामिति—सौत्रामण्यामेव सुरामद्यान्गृह्णाति न त्वन्यत्रेति परिसङ्ख्यायते (यद्यपि गृह्णीयादित्यप)।

गृह्णाति" इत्येतेषा वैयर्थ्यम् । भार्य्यां विवाहिताम् । तत्राह क्रयवस्थितिरिति । तेषु पुन' प्रापणमित्यर्थे । नियमस्यान्यनिवृत्तिफलत्वादाह-आसु निवृत्तिरिष्टेति । अन्येष्वितिशेष' । तदुक्तम्—

विधिरत्यन्तमप्राप्तौ नियम पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते ॥ इति ।

तदुक्तम् इति—कुमारिलभट्टपादैरितिशेष । यथाह न्यायसिद्धान्तमञ्जर्या न्यायकोशे च-तदुक्त भट्टपादैरिति । विधिरित्रि-अथसग्रहे व्याख्यातमिद तद्यथा-"अस्यार्थ —प्रमाणाऽन्तरेणाऽप्राप्तस्य प्रापको विधिरपूर्वविधि । यथा 'यजेत स्वर्गकाम' इत्यादि, स्वर्गार्थकयागस्य प्रमाणान्तरेणाऽप्राप्तस्याऽनेन विधानात् । पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः । यथा 'व्रीहीनवहन्ती'त्यादि । कथमस्य पक्षेऽप्राप्तप्रापकत्वमितिचेदित्थम्—अनेन ह्यवघातस्य वैतुष्यार्थत्व न प्रतिपाद्यतेऽन्वयव्यतिरेकसिद्धत्वात् । किन्तु नियम । सचाऽप्राप्तांशपूरणम् । वैतुष्यस्य हि नानोपायसाध्यत्वाद् यदाऽवघात परित्यज्य उपायान्तर ग्रहीतुमारभते, तदाऽवघातस्याऽप्राप्तत्वेन तद्विधाननामकमप्राप्ताशपूरणमेवाऽनेन विधिना क्रियते । अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थ । पक्षेऽप्राप्ताऽवघातस्य विधानमिति यावत् ।

उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधि परिसङ्ख्याविधि । यथा 'पञ्च पञ्चनखा भक्ष्या' इति । इद हि वाक्य न पञ्चपञ्चनख भक्षणपर, तस्य रागत प्राप्तत्वात् । नाऽपि नियमपर, पञ्चपञ्चनखाऽपञ्चपञ्चनखभक्षणस्य युगपत्प्राप्ते पक्षेऽप्राप्त्यभावात् । अत इदमपञ्चपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसङ्ख्याविधि ।

सा च द्विविधा—श्रौती लाक्षणिकी चेति । तत्र 'अत्र ह्येवागायन्ती'ति श्रौती परिसङ्ख्या (पवमानस्तोत्रे एव गायन्तीति तदर्थ ।) एवकारेण पवमानातिरिक्तस्तोत्रागायनेरभिधानात् । 'पञ्च पञ्चनखा भक्ष्या' इति तु लाक्षणिकी, इतरनिवृत्तिवाचकपदाऽभावात् । अत एवैषा (लाक्षणिकी) त्रिदोषग्रस्ता । दोषत्रयञ्च—श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति । तदुक्तम्—

स्वर्गकामोऽश्वमेधेन यजेतेतिविधि.। द्युत्पत्तिविघातो यद्यपि शशकादि मांसै श्वादिमांसैश्च भवति तथापि शशकादिमांसैरेव कर्त्तव्य इति परिसङ्ख्यायते 'पञ्च पञ्चनखा भक्ष्या' इत्यनेन। नखविदलनावहन नाभ्या व्रीहेर्निस्तुषीकरण प्राप्तम्। तत्रावहननेन निस्तुषीकरण पुण्य जनकमिति व्रीहीनवहन्तीत्यनेन नियम्यते। यद्यपि परिसङ्ख्यया नियमे च स्वार्थहानि प्राप्तबाध परार्थकल्पना चेति दोषत्रय तथाप्य

श्रुताऽर्थस्य परित्यागादश्रुतार्थप्रकल्पनात्।
प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदूषणा॥ इति।

श्रुतस्य पञ्चनखभक्षणस्य हानात्, अश्रुताऽपञ्चपञ्चनखभक्षणनिषृत्ते कल्पनात्, प्राप्तस्य चाऽपञ्चपञ्चनखभक्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दाशद्य शब्दनिष्ठम्, प्राप्तबाधस्त्वर्थनिष्ठ इति दिक्।" इति। अत्राऽयं पाठभेदो भीमाचार्यप्रणीतन्यायकोशोदाहृते—"इदं हि यावयं पञ्चानां पञ्चनखानां सेधागोधादीनां च न भक्षणविधायकम्, तस्य रागत प्राप्तत्वात्। नाऽपि तेषां गवयनिषेधपरम्, तेषाञ्च तद्वितरपञ्चनखानाञ्च भक्षणस्य मुगपक्षेऽपि रागत प्राप्तत्वेन पक्षेऽप्राप्त्यभावात्। किन्तु लक्षणया पञ्चेतरपञ्चनखानां श्वाविधादीनां भक्षणं निषेधि परमिति भवति परिसङ्ख्या" इति। तथा—'भुतस्य पञ्चनखभक्षणस्य हानात्, अभुताया पञ्चेतरपञ्चनखभक्षणनिषृत्ते कल्पनात्, रागत प्राप्तस्य पञ्चेतरपञ्च नखभक्षणस्य बाधनाच्च" इति। तत्र पञ्च पञ्चनखाश्च—

पञ्च पञ्चनखा भक्ष्या भक्षयितेण राघव।
शशक शल्की गोधा खड्गी कूर्मोऽथ पञ्चम॥ इति।

तदीयां मीमांसार्यसंग्रहकौमुदीम्—

श्वाविधं शल्लकं गोधां खड्गकूर्मशशांस्तथा।
भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतो दत॥ इति। (मनुस्मृति ५।१८)

तदेतद् स्वग्रन्थे व्याचष्टे—स्वर्गकाम इत्यादिना।

यद्यपि परिसङ्ख्यायामिति—अर्थसंग्रहदीपिकायां खायदिकया मित्यादिरस्य। स्वार्थहानिरिति—पञ्चपञ्चनखानां भक्षण कार्यमिति स्वार्थस्य हानिः। एव व्रीहीणामवघात कुर्यादिति स्वार्थस्य हानि। प्राप्तबाध—

नन्यगत्या स्वीक्रियत इति युक्तम् । 'पञ्च पञ्चनखा' इत्यस्य नियमत्वेन भाष्ये व्यवहृतत्वात् । अन्यनिवृत्तिरूपफलैक्याच्च नियमपदेन परिसङ्ख्यापि व्याकरणे गृह्यत इति संक्षेप । इति निपातार्थविचार ।

रागत प्राप्तस्य पञ्चेतरपञ्चनखभक्षणस्य बाध । एव पुरोडाशविधिना प्राप्तस्य नखविदलनस्य बाध । परार्थकल्पना—पञ्चेतरपञ्चनखभक्षण न कार्यमिति लक्ष्यार्थस्य कल्पना । पञ्चपदस्य पञ्चेतर इत्यर्थे लक्षणया, भक्ष्या इत्यस्य च अभक्ष्या इत्यर्थे लक्षणयेति भाव । एवम् अत्रहन्तीत्यस्य अनघातेतरन्न कुर्यादित्यर्थे लक्षणया लक्ष्यार्थस्य कल्पना । अनन्यगत्या—प्राप्तस्य पुनर्विधानवैयर्थ्यापत्त्येत्यर्थ । पदद्वये लक्षणया नियमपरिसङ्ख्याशास्त्राणा निषेधमुखेन प्रवृत्तिरित्यभिप्रायेणेदम् । तदप्यनयन्नाह इति युक्तमा इति ।

परे तु—नञ्हितयोर्नियमपरिसङ्ख्ययोर्निषेधस्य गौणार्थत्वमेव न तु शाब्दत्वम् । अत एव "भक्ष्यनियमेनाऽभक्ष्यप्रतिषेधो गम्यते—पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतन्तोऽन्येऽभक्ष्या इति" इति दर्शितपस्पशाभाष्ये आर्थमतीतिबोधक 'गम्यते' इति प्रयुक्तम् । तेन निषेधस्य तद्वाक्यजन्यशाब्दबोधाऽविषयत्व स्पष्टमेवोक्तम् । अत एव च नियमस्थानां विधिमुखेनैव प्रवृत्तिरित्युद्घोषो भाष्यविदाम् । अत एव च स्वार्थहान्यादिदर्शितदोषसमुच्चयोऽपि नाऽत्र । विधिमुखेन शाब्दबोधेऽपि यद्यपि स्वार्थे तात्पर्याऽभावात्तात्पर्यत्याग । वक्ष्यमाणरीत्या सामान्यशास्त्रे सङ्कोचकल्पना, सकोचात्प्राप्तबाधश्चेति दूषणत्रयं वक्तु शक्यते, तथाऽपि निषेधपक्षेऽपि उदिते जुहोति अनुदिते जुहोतीतिवद् विकल्पापत्तिवारणाय प्रापक प्रमाणे सङ्कोचस्याऽऽवश्यकत्वेन निषेधमुखेन शाब्दबोधे पदद्वये (उद्देश्यवाचकपदस्य स्वार्थभिन्नं यन्नियम्य शास्त्रीयोद्देश्यताऽवच्छेदकव्याप्यं, नियामकशास्त्रीयोद्देश्यताऽवच्छेदकव्यापक रूप तत्र, विधेयवाचकपदस्य च नञर्थविशिष्टे 'भवति' इत्यादे नं भवतीत्येवमर्थे) लक्षणायां गौरवान्तरस्याऽऽधिक्यम्, साक्षाच्छास्त्रीय बाधकल्पना च माष्याऽसम्मतिश्चेति बोद्धव्यम् ।

एवञ्च—पञ्च पञ्चनखा भक्ष्या इत्यत्र पञ्चपदस्य अवधारणविषयबुद्धिस्थ शशकादिवृत्तिपञ्चत्वसङ्ख्यावत्यर्थे लक्षणया अवधारणविशेष्या शशकादिवृत्ति

स्वर्गकामोऽश्वमेधेन यजेतेतिविधिः। क्षुत्प्रतिघातो यद्यपि शशकादिमासै श्वादिमासैश्च भवति तथापि शशकादिमासैरेव कर्त्तव्य इति परिसङ्ख्यायते 'पञ्च पञ्चनखा भक्ष्या' इत्यनेन। नखविदलनावहन नाभ्या श्रीहेर्निस्तुषीकरण प्राप्तम्। तत्रावहननेन निस्तुषीकरण पुण्य जनकमिति श्रीहीनयहन्तीत्यनेन नियम्यते। यद्यपि परिसङ्ख्यायां नियमे च स्वार्थहानि प्राप्तबाध परार्थकल्पना चेति दोषत्रय तथाप्य

श्रुतार्थस्य परित्यागादश्रुतार्थप्रकल्पनात्।
प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदूषणा॥ इति।

श्रुतस्य पञ्चनखभक्षणस्य हानात्, अश्रुताऽपञ्चपञ्चनखभक्षणनियृत्ते कल्पनात्, प्राप्तस्य चाऽपञ्चपञ्चनखभक्षणस्य बाधनादिति। अस्मिंश्च दोषत्रये दोषद्वय शब्दनिष्ठम्, प्राप्तबाधस्त्वर्थनिष्ठ इति दिक्।" इति। अत्राऽय पाठभेदो मीमा चार्यप्रणीतन्यायकोशोदाहृते—"इद हि बाधय पञ्चानां पञ्चनखानां सेधागोधा दीनां च न भक्षणविधायकम्, तस्य रागत प्राप्तत्वात्। नाऽपि तेषां भक्षणनिषम परम्, तेषाञ्च तदितरपञ्चनखानाञ्च भक्षणस्य युगपदपि रागत' प्राप्तत्वया पक्षेऽ प्राप्त्यभावात्। किन्तु लक्षणया पञ्चेतरपञ्चनखानां श्वाविधादीनां भक्षणे निवृत्ति परमिति भवति परिसङ्ख्या" इति। तथा—'क्षुतस्य पञ्चनखभक्षणस्य हानाव, अश्रुतायाः पञ्चेतरपञ्चनखभक्षणनिवृत्ते कल्पनात्, रागव प्राप्तस्य पञ्चेतरपञ्च नखभक्षणस्य बाधनाच्च" इति। तत्र पञ्च पञ्चनखास्तु—

पञ्च पञ्चनखा भक्ष्या मनुष्येण राघव।
शशक शल्लकी गोधा खड्गी कूर्मोऽथ पञ्चम'॥ इति।

तट्टीकायां मीमांसार्थसग्रहकौमुद्याम्—

श्वाविधं शल्लकं गोधा खड्गकूर्मशशास्तथा।
भक्ष्यान्पञ्चनखेष्वाहुरनुष्ट्रांश्चैकतो दत॥ इति। (मनुस्मृति ५।१८)

तदेतद् स्वमते व्याचष्टे—स्वर्गकाम इत्यादिना।

यद्यपि परिसङ्ख्यायामिति—अर्थसंग्रहरीत्या एवशब्दरहितायां लाक्षणिक्या मित्यादित्स्य। स्वार्थहानिरिति—पञ्चपञ्चनखानां भक्षण कार्यमिति स्ववाच्यार्थस्य हानिः। एव मीहीणामभक्षात कुर्यादिति स्ववाच्यार्थस्य हानि। प्राप्तबाध—

नन्यगत्या स्वीक्रियत इति वृद्धा । 'पञ्च पञ्चनखा' इत्यस्य नियमत्वेन भाष्ये व्यवहृतत्वात् । अन्यनिवृत्तिरूपफलेनैक्याच्च नियमपदेन परिसङ्ख्यापि व्याकरणे गृह्यत इति सक्षेप । इति निपातार्थविचार ।

रागत प्राप्तस्य पञ्चेतरपञ्चनखभक्षणस्य बाध । एव पुरोडाशविधिना प्राप्तस्य नखविदलनस्य बाध । **परार्थकल्पना**—पञ्चेतरपञ्चनखभक्षण न कार्यमिति लक्ष्यार्थस्य कल्पना । पञ्चपदस्य पञ्चेतर इत्यर्थे लक्षणया, भक्ष्या इत्यस्य च अभक्ष्या इत्यर्थे लक्षणयेति भाव । एवम् अवहन्तीत्यस्य अवघातेतरन्न कुर्यादित्यर्थे लक्षणया लक्ष्यार्थस्य कल्पना । अनन्यगत्या—प्राप्तस्य पुनर्विधानवैयर्थ्यापत्त्येत्यर्थ । पदद्वये लक्षणया नियमपरिसङ्ख्याशास्त्राणां निषेधमुखेन प्रवृत्तिरित्यभिमानेनेदम् । तद्ध्वनयन्नाह इति वृद्धा इति ।

परे तु—नञ्रहितयोर्नियमपरिसङ्ख्ययोर्निषेधस्य शाब्दार्थत्वमेव न तु शाब्दत्वम् । अत एव "भक्ष्यनियमेनाऽभक्ष्यप्रतिषेधो गम्यते—पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतावतोऽन्येऽभक्ष्या इति" इति दर्शितपस्पशाभाष्ये आर्थप्रतीतिबोधक 'गम्यते' इति प्रयुक्तम् । तेन निषेधस्य तद्वाक्यजन्यशाब्दबोधाऽविषयत्व स्पष्टमेवोक्तम् । अत एव च नियमशास्त्राणां विधिमुखेनैव प्रवृत्तिरित्युद्घोषो भाष्यविदाम् । अत एव च स्वार्थहान्यादिदर्शितदोषसमुच्चयोऽपि नाऽत्र । विधिमुखेन शाब्दबोधेऽपि यद्यपि स्वार्थे तात्पर्याऽभावात्तात्पर्यत्याग । वक्ष्यमाणरीत्या सामान्यशास्त्रे सङ्कोचकल्पना, संकोचात्मातबाधश्चेति दूषणत्रयं वक्तु शक्यते, तथाऽपि निषेधपक्षेऽपि उदिते जुहोति अनुदिते जुहोतीतिवट निष्फलापत्तिवारणाय प्रापकप्रमाणेन सङ्कोचस्याऽऽवश्यकत्वेन निषेधमुखेन शाब्दबोधे पदद्वये (उद्देश्यवाचकपदस्य स्वाभिन्नं यन्नियम्य शास्त्रीयोद्देश्यताऽवच्छेदकव्याप्यं, नियामकशास्त्रीयोद्देश्यताऽवच्छेदकव्यापक रूप तत्र, विधेयवाचकपदस्य च नञर्थविशिष्टे 'भवति' इत्यादे र्न भवतीत्येवमर्थे) लक्षणायां गौरवान्तरस्याऽऽधिक्यम्, साक्षाच्छास्त्रीयबाधकल्पना च भाष्याऽसम्मतिश्चेति बोद्धव्यम् ।

एवञ्च—पञ्च पञ्चनखा भक्ष्या इत्यत्र पञ्चपदस्य अवधारणविषयमुद्दिश्य शशकादिवृत्तिपञ्चत्वसङ्ख्याबोध्यर्थे लक्षणया अवधारणविशिष्या शशकादिवृत्ति

पञ्चत्वसङ्ख्यावन्तः पञ्चनखा भक्ष्या इत्युक्तौ, विधिमुखेनैव शाब्दबोधः। अत्र धारणञ्चोक्तमेव।

एवं सत्यपि प्रमाणान्तरेण प्राप्तस्य पुनर्विधानवैयर्थ्यापत्त्या अवधारणस्वारस्या (स्वाभाव्या) च्च परिसङ्ख्यायकशास्त्रीयोद्देश्यताऽवच्छेदकव्यापक परिसङ्ख्येयशास्त्रीयोद्देश्यताऽवच्छेदकव्याप्यञ्च यद्रूपन्तद्रूपाऽवच्छिन्नातिरिक्तत्वेन परिसङ्ख्येयशास्त्रीयोद्देश्यताऽवच्छेदकाऽवच्छिन्ने सङ्कोच आवश्यक। तथाहि—परिसङ्ख्यास्थले षड् रूपाणि उपस्थितानि—परिसङ्ख्यायकशास्त्रीयोद्देश्यताऽवच्छेदम्, तद्व्यापकम्, तद्व्याप्यञ्च। एवम्—परिसंख्येयशास्त्रीयोद्देश्यताऽवच्छेदकं, तद्व्यापकं, तद्व्याप्यञ्चेति। तत्र परिसङ्ख्यायकशास्त्रीयोद्देश्यताऽवच्छेदरूपाऽवच्छिन्नाऽतिरिक्तत्वेन तद्व्याप्यरूपाऽवच्छिन्नाऽतिरिक्तत्वेन वा सङ्कोच कर्तुं न शक्यते, रनुपाश्वभून्यायप्रसङ्गात्। नाऽपि परिसंख्येयशास्त्रीयोद्देश्यताऽवच्छेदकरूपाऽवच्छिन्नाऽतिरिक्तत्वेन तद्व्यापकरूपाऽवच्छिन्नाऽतिरिक्तत्वेन वा सङ्कोच परिसङ्ख्येयशास्त्रस्य वैयर्थ्यापत्तेः। किन्तु परिसंख्यायकशास्त्रीयोद्देश्यताऽवच्छेदकव्यापक परिसंख्येयशास्त्रीयोद्देश्यताऽवच्छेदाऽवच्छिन्ने सङ्कोच एव कर्तुं शक्य।

तथा च प्रकृते प्रापकप्रमाणभूतपरिसङ्ख्येयशास्त्रस्य 'क्षुधातुर क्षुत्प्रतिघातक भक्षयेत्' इत्येवरूपेण कल्पितस्योद्देश्यताऽवच्छेदकाऽवच्छिन्ने तादृशपञ्चनखत्वरूपाऽवच्छिन्नाऽतिरिक्तत्वेन सङ्कोचे पञ्चनखातिरिक्त क्षुत्प्रतिघातक भक्षयेदिति संकुचितरागेण सकलपञ्चनखकमकभक्षणविषये तात्पर्येऽवलम्बिते सति परिसंख्यायकशास्त्रेण शशकादिपञ्चकभक्षणस्य विधानेऽपि शशकादिपञ्चकातिरिक्तश्वादि पञ्चनखभक्षणस्योक्तसङ्कुचितरागादिना केनाऽप्यविधानादभावः फलति। एतदेवलितमेवादाय परिसंख्याशास्त्रस्य नियमत्वव्यवहारो नाऽन्यथेति प्रतिनिर्देशात्।

एवम्—एवशब्दसमभिव्याहारेऽपि एवेनावधारणविषयत्वस्य द्योतनात्तादृश एव शाब्दबोधस्तादृशेव च सङ्कोच। यथा इष्टसङ्कोचस्य लाभाय, अनिष्टस्य पञ्चातिरिक्तत्वेन सङ्कोचस्य वारणाय तात्पर्याऽनुपपत्त्या पञ्चपदस्यावधारणविषयत्वे लक्षणाऽऽश्रियते, शिष्टाचारस्य च तात्पर्यग्राहकत्वम्, तथा "पतिः समास एव" इत्यादावेव शब्दाऽपि केवलं तादृशलक्षणायां तात्पर्यग्राहक एव, शिष्टाचारवत्।

लक्षणायामप्रसिद्धशक्त्या वा तात्पर्यग्राहकत्वमेव द्योतकत्वमित्युक्तत्वात् । इयानेव तु विशेष—एवेन स्फुटाऽवधारणविषयत्वस्य प्रतीतिरन्यथात्वस्फुरत्येति । इत्थम् एवशब्दसत्त्वे सदसत्त्वे वा शाब्दबोधादि सर्वं समानमेव, अन्यनिवृत्तिश्चोभयत्राऽप्यार्थ्येव । शाब्दी परिसङ्ख्या तु आलङ्कारिकै 'किं भूषण सुहृदमत्र यशो न रत्नम्' इत्यादौ यत्र नञ् प्रयोगस्तत्रैवोदाहृता ।

नियमे तु व्रीहीनवहन्तीत्यादौ पाक्षिकाऽप्राप्तिकांशस्य परिपूरणफलत्वेन वैयर्थ्याऽऽपत्तेरभावान्न नियम्ये तादृक्सङ्कोचकल्पनम्, किन्तु पाक्षिकाऽप्राप्त्यश-परिपूरणाय नियम्येन सहैकवाक्यतामात्रम् । तत्र आद्य यथा—व्रीहीनवहन्तीत्यस्य 'चरुनिमित्त तण्डुला निर्वाप्या' इति पुरोडाशविधिनैकवाक्यत्वम्—चरुनिमित्त 'व्रीहीणामवघातेन तण्डुला निर्वाप्या' इति । तेन न यथेच्छोपायैस्तण्डुलनिर्वा दनमिति नखविदलनादीनां निषेधः फलति । एव 'समे यजेत इत्यस्यापि 'यजेत स्वर्गकामः' इत्यनेनैकवाक्यत्वम् । यथा वा यत्र तु प्रमाणद्वय नियम्य स्या त्तत्र प्रमाणद्वयस्यैवोद्देश्यताऽवच्छेदकाऽवच्छिन्नयो स्त्रीयोद्देश्यताऽवच्छेदकरूपाऽ वच्छिन्नातिरिक्तत्वेन सङ्कोच कृत्वा नियमेन विधान भवति । यत्र वा विकल्प शास्त्र नियम्य स्यात् तत्रापि इदमर्थाच्च । यथा वा तिङादिसूत्रेण सह प्रथममध्य मोत्तमविधायक सूत्राणामेकवाक्यत्वम् । 'युष्मद्युपपदे मध्यम एव''अस्मद्युत्तम एव''शेषे प्रथम एवे' त्युपपदनियमाङ्गीकारे भाष्यसम्मते धातोर्युगपद्मध्यमाद्यनेकप्रत्ययाना 'परश्चे' त्यधिकारादप्राप्त्या पाक्षिकप्राप्तिकतया तेषामपि नियमविधित्वात् । यथा वा अनुदात्तङिदित्यात्मनेपदविधायकस्य तिङादिसूत्रेण सहैकवाक्यत्वम्—अनु-दात्तङित आत्मनेपदमेवेति प्रकृतिनियमे पूर्ववदेवाऽस्य पाक्षिकप्राप्त्या नियमत्वात् ।

द्वितीय यथा—तृजादिदृष्टान्तेन सकृद्गतिन्यायसाधनपरकभाष्यरीत्या पर्यायेण पूर्वपरशास्त्रयो प्राप्तौ पाक्षिकप्राप्तिकस्य परकार्यस्य विधानेन विप्रतिषेधसूत्रस्य नियमत्वात् पूर्वपरशास्त्रोयोद्देश्यताऽवच्छेदकाऽवच्छिन्नयोर्विप्रतिषेधविषयाऽति रिक्तत्वेन सङ्कोचात् विप्रतिषेधसूत्रेण परकार्यस्य विधानान्त्तिसृणामित्यस्य सिद्धि ।

तृतीय यथा—इन्द्रे चेत्यनेन अवदस्फोटायनस्येति विकल्पशास्त्रे सकोच ।

एवञ्च अस्मच्छास्त्रे प्रकृतिनियमपक्षे तद्विधायकशास्त्राणाम्, उपपद-नियमपक्षे च प्रथमादिविधायकशास्त्राणां च नियमत्वम् सकृद्गतिन्यायसाधन्

अथ दशलकारादेशार्थाः ॥ यद्यपि लकाराणामेवार्थनिरूपणं तार्किकैः कृतम् तथापि "उच्चारित एव शब्दोऽर्थप्रत्यायको नानुच्चारित" इति भाष्यालोके तथैवानुभवाच्चेति तदादेशविज्ञानमर्थो निरूप्यते। "वर्त्तमा

रीत्या विप्रतिषेधसूत्रस्य च तत्त्वम्। विकल्पे प्राप्ते नित्यार्थकस्य "इन्द्रेचे"त्या देश्चतत्त्वमायाति। "धातोस्तन्निमित्तस्यैव"—कृच्चिन्तसूत्रीयसमासग्रहणादीना तु परिसङ्ख्यात्वमेव। अन्यनिवृत्तिरूपफलसाम्येन तु नियमपदेनैव तस्या व्यवहारो भाष्ये—"भक्षयनियमेने"ति।

एवमेव 'पार्थ एव धनुर्धर' इत्यादावपि लोकत पाक्षिकयुगपदन्यतरप्राप्ति निर्णीय नियमपरिसङ्ख्याऽन्यतरत्व निश्चेतव्यम्। अत्र सर्वत्र अवधारणविषयत्वेनैव शाब्दबोध, अन्ययोगव्यवच्छेदत्वादिना बोधे तु द्योत्यताऽवच्छेदकबाहुल्यापत्ति, पृथिव्यामेव गन्ध इत्यत्र व्युत्पत्तिवैचित्र्यकल्पने गौरवञ्च। 'अन्ययोगव्यवच्छेद एवकारार्थ' इति तु सामान्यप्रमाणसङ्कोचफलितमर्थमादाय नेयम्।

यत्तु विधिमुखेन शाब्दबोधस्येष्टत्वे पञ्चपञ्चनखा भक्ष्या इत्यत्र विधिप्राप्त पञ्चकभक्षणस्याऽकरणे प्रत्यवायापत्तिरिति, तन्न काम्यविधेरकरणे काम्याऽनिष्पत्तावपि प्रत्यवायापत्तिविरहात्, अत्राऽपि भक्षणस्य काम्यविधित्वात् इत्यन्यत्र विस्तर इत्याहु। इति निपातार्थवाद।

लकारार्थविचार। व्याकरणशास्त्रस्य शब्दानुशासनत्वेन स्फोटात्मकानां शब्दानां प्रथमं भेदानुद्दिश्य तेषु बोधकताऽवच्छेदकीभूतानां वृत्तीनां निरूपणं कृत्वा वृत्त्याश्रयीभूतस्फोटस्य स्वरूपमभिधाय शाब्दबोधसहकारिकारणानां परम्परया बोधकताऽवच्छेदकीभूतानामाकाङ्क्षादीना प्रदर्शनं कृत्वा मुख्यस्फोटात्मकवाक्यजन्यबोधे धात्वर्थप्राधान्यस्य सिद्धान्तसिद्धत्वेनापसिद्धान्तनिराकरणपूर्वक धात्वर्थं प्रकृतीकृत्य निपातान्तर्गतप्राद्यर्थाना धात्वर्थ एवान्तर्भावव्यञ्जनाय निपातार्थं निर्धार्य धातुप्रकृतिकप्रत्ययार्थानामेव जिज्ञासिततया विशेषविचाराऽनर्हत्वेन कृदर्थमुपेक्ष्य विशेषविचाराय स्वदीभूतलादेशार्थनिरूपणमारभते—यद्यपीत्यादि। लकाराणामेवेति—लत्वस्य शक्तताऽवच्छेदकत्वे लाघवादित्यादि। इतिभाष्यात्—भक्षणकर्तृत्वस्यादित्यादि। तिङामर्थ इति—गौरवे सत्यपि न्याय्यत्वात्, न हि लाघवाय न्यायत्याग क्रियते शिष्टैरिति भाव। ननु तिङां बोधकत्वे शक्तिग्राहकव्याकरणानां का गतिरित्यत्र आह—

फलव्यापारौ तु धात्वर्थाविच्युक्तमेव, तत्र तिङ समभिव्याहारे तदर्थं सङ्ख्या तदर्थकारके विशेषणम् । कालस्तु व्यापारे । तदाह—

फलव्यापारयोर्धातुराश्रये तु तिङ स्मृता ।
फले प्रधान व्यापारस्तिङ्थस्तु विशेषणम् ॥ इति ।

तिङर्थं कर्ता व्यापारे, कर्म च फले विशेषणम् । "क्रियाप्रधानमाख्यातम्" इति यास्कोक्तौ क्रियापद करणव्युत्पत्त्या व्यापारपर कर्म

त्वात् । अबोधीत्यादावतिप्रसङ्गनिरासाय भावसाधारणेति । जग्मे इत्यत्र यगाद्य भावेऽपि तद्सत्त्वान्नाऽव्याप्तिः ।

तदर्थसङ्ख्या तदर्थकारक इति—समानप्रत्ययोपात्तत्वप्रत्यासत्त्येति भाव' कालस्तु व्यापार इति—"क्रियामेदाय कालस्तु" इति हर्युक्ते । समानाभिधानप्रत्यासत्त्या आश्रये तदन्वये तु अतीतभावनाके वर्तमाने कर्तरि पचतीत्यापत्ते, अपाक्षीदित्यनापत्तेश्च पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च । एवं कर्मप्रत्ययेऽपि । नाऽपि फले तदन्वय, फलाऽनुत्पाददशाया व्यापारसत्त्वे पचतीत्यनापत्ते, पक्ष्यतीत्यापत्तेश्चेति ध्येयम् ।

फलव्यापारयोरिति—अत्र धातुरित्यत्र स्मृता इत्यस्य 'स्मृत' इति वचनविपरिणामनाऽन्वय, अन्यथा स न स्यात्, विशेष्यवाचकपदोत्तरविभक्तिसात्पर्यविषयसङ्ख्याविरुद्धसङ्ख्याया अविवक्षायां विशेष्यविशेषणवाचकपदयो समानवचनकत्वनियमात् । अत एव 'नीला घटा' 'त्रि' नीला' इत्यादेर्न साधुत्वम् । तद्विवक्षायां तु 'वेदा प्रमाणम्' 'व्यक्त्याकृतिजातयस्तु पदार्थ' इत्यादौ विभिन्नवचनत्व भवत्येव । न च प्रकृते तद्विवक्षायां बीजमस्ति । फले प्रधान व्यापार इति—इदन्तु प्राचामनुरोधेन । तेषां मते हि आख्यातमात्रे व्यापारविशेष्यक एव बोध ।

नव्यास्तु—'सुप आत्मन क्यजि'ति सूत्रस्थभाष्यरीत्या कर्मण्याते फलविशेष्यक एव शाब्दबोधः । तथाहि तत्र भाष्ये—"अयेह क्यचा भवितव्यम्—'इष्ट पुत्र' 'इष्यते पुत्र' ? इत्याशङ्क्य समाहितम्—"इह भवन्तस्त्वाह 'न भवितव्यमिति । किं कारणम् ? इह समानार्थेन वाक्येन भवितव्यं प्रत्ययातेन च । यश्चेहार्थो वाक्येन गम्यते—'इष्टः पुत्र' 'इष्यते पुत्र' इति, नाऽसौ आत्म

व्युत्पत्त्या फलपरमिति बोध्यम् । तथा च ग्राम गच्छति चैत्र इत्य त्रैकत्वावच्छिन्नचैत्राभिन्नकर्तृको वर्तमानकालिको ग्रामाभिन्नकर्मनिष्ठो यस्सयोग तदनुकूलो व्यापारः, ग्रामो गम्यते मैत्रेणेत्यत्र तु मैत्रकर्तृकयत्व-मानकालिकव्यापारजन्यः ग्रामाभिन्नकर्मनिष्ठ सयोग इति च बोध' । वर्तमानकालत्व च प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम् । लिट्तिङस्तु

» क्तिप्रत्ययान्तेन गम्यते ।" इति । 'यदा क्रियाफलस्य प्राधान्य प्रतिपिपादयिषित तदा वाक्यमेव—पुत्र इष्ट इत्यादि, न तु क्वयजन्त , तस्याऽकर्मकत्वात्कर्मणि प्रत्य-यानुत्पादात्' इति कैयटश्च । वाक्ये फल विशेष्यं, धातौ व्यापार इति भिन्नार्थत्वा-त्क्वयजन्तेति तदाशय । यदि 'इष्यते पुत्र' इत्यनेनाऽपि पुत्रीयतीतीव एकाश्रयक-पुत्रविषयकेच्छानुकूलव्यापार इत्येव बोधस्तर्हि कुतो न समानार्थत्वम् ? कमाख्याते फलविशेष्यकबोधाऽभ्युपगमे तु एकाऽऽश्रयकव्यापारजन्या पुत्राऽभिन्नैकाश्रयविषयि णीच्छेति बोधे, पुत्रीयतीत्यनेन तु एकाश्रयकपुत्रविषयकेच्छाऽनुकूलव्यापार इति बोधे भिन्नार्थत्व स्पष्टमेव । क्वयजन्तात्कर्मणि प्रत्ययस्तु दुर्लभ एव, धात्वर्थगृहीत कर्मतयेनाऽकर्मकत्वात् । कर्मकर्तरि पक्वस्तण्डुल इत्यादौ फलस्य व्यापार प्रति प्राधान्यस्य इष्टत्वेन कर्माख्यातेऽपि फलस्य विशेष्यताया एवौचित्याच्च । यद्यपि कर्मप्रत्यये भावनाया प्राधान्येऽपि तदर्थसङ्ख्याया कर्मणि विशेषणत्वम्, कर्तृ-प्रत्यये कर्तरि, तावता भिन्नार्थत्वापत्ति । एवमाश्रयान्वयमादायाऽपि तदुपपत्ति कथयितु शक्यते, तथाऽपि स्त्रीयेच्छापदनिर्दिष्टक्यजर्थांश इच्छानुकूलव्यापारा-त्मकांशे वृत्तिवाक्ययोर्भिन्नार्थत्वविरह तादृशभिन्नार्थकत्वस्याऽकिञ्चित्करत्वम्, भिन्नविशेष्यकबोधजनकत्वरूपभिन्नार्थत्वस्याऽभावात् इत्याहु । त मते कारि काया पक्वे प्रधान व्यापार इत्यनन्तरं कर्तृभावप्रत्ययसमभिव्याहार इति शेषो बोध्य ।

वर्तमानकालत्वञ्च प्रारब्धेति—प्रारब्धाऽपरिसमाप्तक्रियोपलक्षितकालत्व-मित्यर्थ । नन्वेष पूपऽद्य एकवादनादारभ्य द्विवादनपर्यन्त य पाक कृताऽभूत्, तस्य मध्याह्नबोधाय अद्याऽपि पचतीति प्रयोगाऽऽपत्ति, पूर्वदिनापराह्णैकवादन कालस्य प्रारब्धाऽपरिसमाप्तक्रियापलक्षितकालत्वेन तत्कालभवत्पाकमध्यांशस्य बोधाय अद्य पचतीत्युच्चारणे बाधकाऽभावात् । न च प्रारब्धाऽपरिसमाप्तक्रियो-पलक्षितोच्चारणाऽधिकरणीभूतकालस्यैव तत्त्वान्न दोष, पूर्वदिनापराह्णैकवादन

भूतानद्यतनकाल परोक्षत्व चाधिकोऽर्थ । शेष लङ्वत् । परोक्षत्व च

कालस्यैतद्दिवसीयोच्चारणाऽनधिकरणत्वात् इति वाच्यम्, कालस्याऽस्वरूपतया पूर्वदिनीयसार्धवादनकालस्याऽपि एतद्दिनीयपचतीत्युच्चारणाधिकरणत्वस्य सत्त्वात्-इतिचेत्, शृणु—एतत्प्रयोगविशिष्टकालत्वमेव वर्तमानकालत्वम् । वै०—सो-च्चारणाधिकरणत्व-स्वजन्यबोधविषयत्वेन तात्पर्यविषयीभूतयावद् व्यापारनिरूपि त्वाभयसम्बन्धेन । सम्बन्धघटक वै०—स्वप्रतियोगिकध्वंसाऽनधिकरणत्व-स्वप्रति योगिकप्रागभावानधिकरणत्वाभयसम्बन्धेन । एवञ्च पूर्वदिनीयपाकक्रियामप्यारु बोधकैतद्दिवसीयप्रयोगकाले तादृशयावद्व्यापारप्रतियोगिकध्वंसस्यैव सत्त्वात् न पूर्व दिवसीयपाकक्रियामध्यांशबोधाऽभिप्रायेण अत्र पचतीति प्रयोगापत्तिः । एवञ्चोच्चा रणाधिकरणकालात् पूर्वं यत्र काले पाक कृतस्तस्मात्कालादारभ्योच्चारणकालपर्यन्त मेकमखण्डं कालमादाय पचतीतिप्रयोगनिर्वाहार्थमपि ध्वंसाऽनधिकरणघटितविशेष णम् । एव यत्राऽऽगामिनि काले पक्ष्यति तत्पर्यन्तमुच्चारणकालात्परमेकमखण्ड कालमादायाऽपि नातिप्रसङ्गः, प्रागभावानधिकरणत्वघटितसम्बन्धदानात् । पूर्व प्रदर्शितपूर्वदिवसीयसार्धैकवादनकालिकक्रियामध्यांशोपलक्षितकालस्याऽपि यत्किञ्चित् प्रयोगविशिष्टत्वसम्भवात् तद्दोषवारण्यवारणाय प्रयोगविशिष्टत्वे एतत्त्व निवे शितमिति सर्वमवदातम् ।

लिट्तिङस्तु भूतेति—भूतकालत्वञ्च—वर्तमानध्वंसप्रतियोगिक्रियोपलक्षित कालत्वम् ।

परोक्षत्वञ्च कारके विशेषणम् इति—अत एव लिट्सूत्रे महाभाष्ये—"कस्मिन् पुन परोक्षे (लिङ्गवति) ? इत्याशङ्क्य कालाऽधिकाराऽभावेन परोक्ष इत्यस्य कालान्वयं परिहृत्य धातोरधिकारसूत्येन शब्देऽसम्भवेनार्थे कायस्य विज्ञाना दरे परोक्षे धात्वर्थे इत्येवमन्वयसम्भवेऽपि धात्वर्थभूताया क्रियाया अतीन्द्रियत्वेन परोक्षत्वस्याऽन्यभिचारद्विशेषणाऽनर्थक्येन क्रियाऽन्वयमपि दूषयित्वा ततः सिद्धान्ति तम्—"एव तर्हि साधनेषु परोक्षेषु" इत्युक्तम् । अत्र सूत्रे धातोरधिकारात् धात्वर्थभूताया क्रियाया प्रकृतत्वेन तस्या स्वतः परोक्षस्याऽन्यभिचारेण तद्वि शेषणाऽनर्थक्येऽपि धात्वर्थेन धात्वर्थाऽनुकूलसाधनानामध्याहारे साधनद्वारा तस्या परोक्षस्य सम्भवेऽन्यभिचारस्यां तद्विशेषणस्य सार्थक्यमिति भाष्यतात्पर्यं

कारके विशेषण नतु क्रियायाम् , तस्या अतीन्द्रियत्वेन लिट्सूत्रे भाष्ये प्रति

बलात् साधनपदस्वारस्यात् प्रत्यासत्तेश्च क्रियावेशकालिकमेव साधनपारोक्ष्य ग्राह्यम् । न तु धक्तृप्रयोगादिकालिकमपीति 'श्रय पपाचे'त्यपि भवति, प्रयोगकाले साधनस्य प्रत्यक्षत्वेऽपि पाकक्रियावेशकाले तस्य परोक्षत्वात् । अत एव भाष्ये 'साधनेषु परोक्षेषु' इति सिद्धान्तयित्वाऽपि क्रियावेशकालिकसाधनपारोक्ष्यद्वारा क्रियाया एव पारोक्ष्यविवक्षणार्थमग्रे—"अथ ये क्रियाकृता विशेषा सोत्कारा फूत्काराश्चेति तेषु परोक्षेषु !" इत्यनेन साधनस्य तात्स्थ्येऽपि क्रियाकृतविशेष-भूतसोत्कारादिद्वाराऽपि क्रियाया परोक्षत्वतद्व्यभिचारसम्भवेन पारोक्ष्यविशेषण-सार्थक्यस्य सत्त्वेन सोत्कारादिपारोक्ष्यस्याऽपि ग्रहणे बाधकाऽभावेन सोत्कारादि पारोक्ष्यस्थलेऽपि 'पपाचे'तिप्रयोगाऽतिप्रसङ्ग इत्याशङ्क्य—"एवमपि पपाचेति भवितव्यमि"तीष्टापत्त्या समाहितम् । आभ्यां शङ्कासमाधानाभ्यां यत्किञ्चिदितरद्वारा क्रियाया एव पारोक्ष्ये भाष्यतात्पर्यमिति स्पष्टं भवति, सच क्रियावेशकालिकस्यैव साधनपारोक्ष्यस्य ग्रहणे उपपद्यते, अन्यकालिकस्याऽपि तस्य ग्रहणे तु अन्यकालिक-साधनद्वारा क्रियाया पारोक्ष्यतद्व्यभिचारौ कथं सम्भवत ? इति पारोक्ष्यविशेषणाऽ नर्थक्यमेवापद्यति । अत एव च भाष्ये तदग्रे—"सुप्तोऽहं किल विललाप, मत्तोऽहं किल विललापे"त्यत्र क्वचिज्जागरेऽमत्तत्वेऽपि मनसोऽसान्निध्यादुत्तमे लिट्प्रयोग साधित —"अथवा भवति कश्चिज्जाग्रदपि वर्तमानकाल नोपलभते । तद्यथा— वैयाकरणान्त शाकट्यायनो रथमार्गं आसान शकटसार्थं यान्त नोपलेभे । किं पुन कारण जाग्रदपि वर्तमानकाल नोपलभते ? मनसा संयुक्तानीन्द्रियाणि उपलब्धौ कारणानि भवन्ति, मनसोऽसान्निध्यात्" इत्यन्तेन । क्रियानावेशकालिकस्याऽपि साधनपारोक्ष्यस्य ग्रहणे तु प्रयोगकाले धक्तु स्वस्य प्रत्यक्षत्वेन तत्रोत्तमे लिट् प्रयोगोऽसङ्गत एव स्यात्, प्रयोगकालेऽपि मनसोऽसान्निध्यमिति न वाच्यम्, स्वकृतविलापस्य परं प्रति बोधनाय तादृक्प्रयोगस्यैवाऽकरणापत्ते । तस्मात् भाष्येऽ-त्र मूले च साधनपदं कारकपदं च व्यापारावेशकालिकसाधनक्रियाकृतविशेषोभयोप लक्षणमिति सर्वमनवद्यम् ।

तस्या अतीन्द्रियत्वेन लिट्सूत्रे भाष्ये इति—तत्र हि—'परोक्षे' इत्यस्य क्रियान्वये क्रियाया परोक्षत्वस्य अव्यभिचारविशेषणानर्थक्य स्यादित्या

शयेन—"क्रिया नामेयमत्यन्ताऽपरदृष्टाऽनुमानगम्या न शक्या पिण्डीभूता निदर्शयितुम्" इत्युक्तम्। भाष्ये अपरदृष्टेति—परेण प्रधानेन प्रत्यक्षात्मकप्रमाणेन अत्यन्तम् अवयवशः समूहशश्च अदृष्टेत्यर्थः अवयवस्याऽतिसूक्ष्मत्वादप्रत्यक्षम्, समुदायस्य च क्षणिकाऽवयवानां मेलनाऽसंभवेन समुदायस्यैवाऽसम्भवादप्रत्यक्षमिति भावः। अत्यन्तपदस्वारस्यादत्र भाष्ये—पिण्डीभूतेत्यनन्तरमपीतिशेषः। पिण्डीभूताऽपि प्रत्यक्षेण निदर्शयितुमशक्या, किं पुनरवयवशः इति तात्पर्यम्।

अन्ये तु—क्रियाया नातीन्द्रियत्वम्, अवयवानामाशुविनाशिनां मेलनाऽसमवेन अवयवसमूहस्याऽनिष्पादेन परोक्षत्वेऽपि एकैकस्याऽवयवस्य प्रत्यक्षत्वसम्भवात्। अत एव पिण्डीभूता निदर्शयितुमशक्येत्येवोक्तं भाष्ये। तेन पिण्डीभूताया उच्चरीत्या निदर्शयितुमशक्यत्वेऽपि अवयशो निदर्शयितुं शक्यत्वमेव तस्या इति प्रतीयते। अत एव 'अधिश्रयणं साक्षात्करोमि' 'अस्य मन्दगतिं साक्षात्करोमी'त्यादि सार्वजनीनाऽनुभवः। अनुभवस्य (प्रतीतेः) पदार्थाऽसाधकत्वे व्यवहारभङ्गप्रसङ्गे दापत्तिः। अत एव 'पश्य मृगो धावती'त्यनेन धावनस्य चाक्षुषप्रत्यक्षविषयत्वं प्रतिपाद्यते इत्याहुः।

परे तु—भाष्येऽत्यन्ताऽपरदृष्टेति—अवयवरूपेण समुदायरूपेण चाऽप्रत्यक्षेत्यर्थः। पश्य मृगो धावतीत्यादिप्रयोगस्तत्तत्क्रियासंयोगदर्शनाऽभिप्रायेण, इत्येवं ज्ञानसामान्ये लक्षणा। अत एव भाष्येऽनुमानगम्यतिपदमुपात्तम्। अत एव "वर्तमाने लटि"तिसूत्रे भाष्ये—"सूक्ष्मो हि भावोऽनुमितेन गम्य" इत्युक्तम्। अधिश्रयण साक्षात्करोमीत्यादिप्रतीतिश्च अधिश्रयणादिसाधनीभूतद्रव्यतत्संयोगादिप्रत्यक्षनिमित्ता भ्रमरूपैवेति न पदार्थसाधिका। अत एव "वर्तमाने लटि"ति सूत्रे कैयट-'तत्र द्रव्यप्रत्यक्षे लोकस्य क्रियाप्रत्यक्षत्वाऽभिमानः' इति, 'क्रियाङ्गविशेष (सीत्कारफूत्कारादि) प्रत्यक्षत्वेऽपि लोकस्य क्रियाप्रत्यक्षत्वाऽभिमान' इति च प्रोक्तवान्। अवयवस्य प्रत्यक्षत्वे तु एकैकस्याऽवयवे समुदायरूपाऽऽरोपेण 'प्रकृतः कृम्' इत्यत्र निष्ठासूत्रे भाष्ये "व्याप्या स्वाश्रयगात्" इत्यादिना क्रियाया यत्किञ्चिदवयवातीतत्वमादाय भूतकालिकत्वप्रतिपादनवत् अत्राऽपि समुदायस्य तादृशप्रत्यक्षत्वस्य संभवेन तद्व्यावृत्त्यर्थं 'परोक्ष' इति विशेषणस्योपपत्तौ साधनादिप्रत्यक्षद्वारेण तत्प्रत्यक्षत्वोपपादनं भाष्योक्तमसङ्गतमेव स्यात्।

पादनात् व्यभिचाराभावात्। कृञ्चाद्यनुप्रयोगस्थले कृञ्चसा क्रियासा मान्यमर्थ । आम्प्रकृतेस्तु तत्तत्क्रियाविशेष । सामान्यविशेषयोरभेदा न्वय । अकर्मकप्रकृतिकामान्तानुप्रयुक्तकृञ्चसामकर्मिकैव क्रिया। वस्तु तस्तु अनुप्रयुक्ताना कृञ्चसा फलशून्यक्रियासामान्यवाचकत्वमेवसकर्मका कमकत्वव्यवहारस्तु आम्प्रकृतिभूतधातोरेवे तिनिष्कष । एव च एधाञ्चक्रे चैत्र इत्यत्र एकत्वावच्छिन्नपरोक्षत्वावच्छिन्नचैत्रकृका भूतानद्यतनका लाधिकरणिका वृद्धयभिन्ना क्रियेति बोध । परोक्षत्व च साक्षात्कृत-

---

अत एव 'अत्यन्ताऽपरदृष्ट'ति 'अत्यन्त' पद चरितार्थम्। नन्वयवस्य पर माणोरपि सौक्ष्म्यादप्रत्यक्षत्वेऽपि परमाणुपुञ्जस्येव तत्समूहस्य प्रत्यक्षत्व स्यादत आह भाष्ये—अशक्या पिण्डीभूतेति। पिण्डीभूताऽपि निदर्शयितुमशक्या, अव यवानां क्षणिकत्वेन पिण्डीभावस्यैवाऽभावादिति भाव । अत्यन्तपदस्वारस्यात् भाष्ये पिण्डीभूतेत्यनन्तरमपीतिशेषो बोध्यः। एवञ्च पिण्डीभूतेति विशेषण भाष्ये 'अतिसूक्ष्मत्वेनाऽप्रत्यक्षाणामप्यवयवानां समूहस्य स्थूलतया प्रत्यक्षत्वसभव' इत्याशङ्कानिराकरणद्वारा पूर्वोक्तस्याऽत्यन्ताऽपरदृष्टत्वस्यैव दृढीकरणार्थम्, न तु तद्बलेनाऽवयवस्यैकैकस्य प्रत्यक्षत्वसाधन स्यात्। पिण्डीभूताया निदर्शनाऽभाव इवाऽवयवस्याऽपि निदर्शनाऽभावे हेतुस्तु भाष्ये नोक्त एव, तथाऽपि, एकत्र अतिसूक्ष्मत्वादिति अपरत्र च 'आशुविनाशिनो मेलनाऽसंभवादिति हेतुरुन्नेय एवेति प्राहु ।

व्यभिचाराऽभावादिति—"संभवव्यभिचाराभ्यो स्यादिशेषणमर्थवत्" इति हर्युक्तन्यायेन विशेषणानर्थक्यापत्तिरिति भाव ।

वृद्ध्यनुकूलव्यापाराऽभिन्नफलाऽनुकूलव्यापार इत्यर्थ गौरवादाह—वस्तुतस्तु इति—वृद्ध्यनुकूलव्यापाराऽभिन्नो व्यापार इति बोधे हि लाघवमितिभाव । परो क्षत्वञ्च साक्षात्कृतमिति—अत्र 'कृतमिति भूतकालो न विवक्षित, साक्षात्का रात्मक (इन्द्रियजन्य) ज्ञानाऽविषयत्वमित्येव विवक्षितोऽर्थ, अन्यथा 'इदानी परोक्षो मे घट' 'परोक्षो मे घटो भविष्यता'त्यादि प्रयोगच्छापत्ते । अत्र तु भूत कालिकपरोक्षत्वप्रकरणात् भूतकालिकपरोक्षत्वस्यैव लक्षणार्थं क्तप्रत्ययो दत्त इति वाऽभिप्राय । यत्तु 'सुप्तोऽहं किल विललापे'त्यादौ स्वकृतविलापस्य तत्काले

मित्येतादृशविषयताशालिज्ञानाविषयत्वम् । भूतानद्यतनत्वं च अद्यतनाष्टप्रहरीन्यतिरिक्तत्वे सति भूतत्वम् । लुङादेशस्य तु भविष्यदनद्यतनार्थोऽधिक्रः । शेष लङ्वत् । भविष्यत्त्वं च वर्तमानप्रागभावप्रतियोगित्वं पर्यवसितत्वम् । लृट्लिङस्तु भविष्यत्सामान्यमर्थः । लेट्विधातु विध्यादिरर्थः । "छन्दसि लिङर्थे लेट्" इतिसूत्रात् । लेट्प्रक्रियास्तु लेटोऽडाटावित्यविशेषः । भवाति भवतीतिप्रयोगदर्शनात् । लोटस्तिङस्तु विध्यादिरर्थः ।

साक्षात्करोमीत्येव साक्षिभास्यत्वेन स्वप्नत्वेऽपि निद्रादिदोषाच्चर्क्षे संस्काराज्जुदयेन प्रयागकालिकसाक्षात्कृतमित्येतादृशविषयताशालिज्ञानाऽभावविषया परोक्षबोधनाय साक्षात्करोमीति त्यक्त्वा साक्षात्कृतमित्युपात्तमिति केनाऽपि भणितं तद्वक्तं वच, उक्तयुक्तेः । तत्राऽपि मनसोऽसान्निध्यात् विलापस्य साक्षिभास्यत्वाऽभावाच्च । स्वापादिदोषेण मनसोऽसान्निध्यादेव संस्काराऽनुदयस्याऽपि सत्त्वमन्वादिति सुधियो विभावयन्तु ।

भूताऽनद्यतनत्वञ्च—अद्यतनाष्टप्रहरीति—अत्र "लुङ्" सूत्रे कैयट:—'एकस्या रात्रेश्चतुर्यो यामो, दिवसश्च सर्वो, द्वितीयायाश्च रात्रे प्रथमो (यामो)ऽद्यतन इत्याहु" इत्युक्तवान् । रामाश्रमाचार्यस्तु—"अतीताया रात्रेर्यामद्वयादारभ्यागामिन्या प्रथम यामद्वय दिवस सकल सोऽद्यतन" इत्यवोचत् । भूषणसारदर्पणे च—"अतीताऽव्यवहितरात्रिपश्चाद्विशिष्टागामिरात्रिपूर्वार्द्धोपेतं दिनमद्यतनम्, एतद्दिनकालत्वमनद्यतनत्वमिति वृत्तिकारादय" इत्यभिहितम् । कालोपसर्जनेतिसूत्रे दीक्षितोऽपि—'अतीताया रात्रे पश्चार्द्धेन आगामिन्या पूर्वार्द्धेन च सहितो दिवसाऽद्यतन' इत्याह्वत् । रामाश्रमाचार्यास्तत्त्वदीपिकायान्तु—केचित्तु अरुणादयमारभ्य अरुणादयपर्यंत काल इत्याहुः, अन्ये तु सूर्योदयादारभ्य सूर्योदयपर्यन्तमित्याहुः' इत्युक्तम् ।

भाष्यवार्तिकपर्यालोचनया तु उक्त कैयटीय मतमेव युक्तमाभाति । तथाहि—"लुङ्"सूत्रे भाष्ये—'वसेलुङ् रात्रियोग । वसेलुङ् रात्रियोगे वक्तव्यः । भाष्ये प्रत्युत्थाने प्रत्युत्थितं कश्चित् कञ्चित्पृच्छति—'क भवानुषित' इति । स आह—'अमुष्माऽवात्सम्' इति । 'अमुष्माऽयसम्' इति प्राप्नोति ।" इत्युक्तम् । भाष्ये—प्रत्युत्थानं जागरणम्, तत्समये प्रत्युत्थित प्रबुद्धमित्यर्थः । भाष्य प्रत्युत्थान

तत्राधीष्ट सत्कारपूर्वको व्यापार । आगच्छतु भवान् जल गृह्णातु । सम्प्र श्नोऽनुमति । गच्छति चैत्रो भवान् गच्छतु इत्यादौ । लकादेशस्य तु भूतान द्यतनमधिकोऽर्थ शेष लङ्वत् । लिङादेशस्य तु विध्यादिरर्थ । तत्र विध्यादिचतुष्टयानुस्यूतप्रवर्त्तनात्वेन चतुर्णा साध्यता लाघवात् । तदुक्त-हरिणा—

> समयश्च—रात्रेश्चतुर्थ एव याम , स्मृत्या तत्रैव प्रबोधोक्ते , चतुर्थयामस्यैव रात्रि शेषत्वमपि वार्तिकोक्तम् । एवञ्च रात्रेश्चतुर्थयामे प्रबुद्धो यदा वाक्य प्रयुङ्क्ते, अमुष्याऽवात्समिति तदाऽष्टाऽतिक्रान्तरात्रिप्रहरत्रयवसनमनद्यतनमिति लङ प्रसङ्गे लुङ वक्तव्य इति भाष्यवार्तिकाशय । तथा च अतिक्रान्तरात्रे प्रहरत्रय याव-दनद्यतनकाल मन्वानेन भाष्यकृता वार्तिककृता च रात्रे 'शेषभूताच्चतुर्थयामादारभ्य आगामिरात्रे प्रथम याम यावद् योऽयं जागरणकाल सोऽद्यतन' इति न्याय्यमस्तु त्थानरात्रिशेषादि शब्द प्रयुञ्जानेन स्पष्टमेवोक्तजागरणकालस्य अद्यतनत्व सूचि तम् । अत एव "कालोपसर्जने'तिसूत्रे शेषरेऽपि—"अतीतरात्रेरन्त्ययामेन आगा-मिरात्रेराद्ययामेन च सहितो दिवसोऽद्यतन इति "लुङ्" सूत्रे भाष्यकैयटयो" इत्युक्तमिति सुधियो विभावयन्तु ।

तत्राधीष्ट सत्कारपूर्वक इति-अत एव भाष्ये" अधीष्ट नाम सत्कारपूर्विका व्यापारणा"इत्युक्तम् । सम्प्रश्नोऽनुमतिरिति—शब्देन्दुशेखरे तु—"सम्प्रश्न सम्प्रधारणम्, विचार 'तद्वा कर्त्तव्यमिद वे'त्यादिरूप " इत्युक्तम् ।

विध्यादिचतुष्टयानुस्यूतेति—अत्र भाष्ये "विधिर्नाम प्रेषणम् (प्रेषणम्-भृत्यादे कस्याश्चित् क्रियायां नियोजनमिति कैयटः । नियोग प्रवर्तना, प्रवर्तक निष्ठ प्रवृत्यनुकूलो व्यापार इत्युद्योत) । अधीष्ट नाम सत्कारपूर्विका व्यापारणा (व्यापारणा = प्रवर्तनेत्यर्थ इत्युद्योत) । यन्नियोगतः कर्तव्य तन्निमन्त्रणम् (निमन्त्रणविषयत्वात्तदेव निमन्त्रणमिति कैयट) । किम्पुनस्तत् ? इद कर्म वा । ब्राह्मणेन 'सिद्ध भुज्यताम्"त्युक्तेऽधर्म प्रत्याख्यातु । (इद्य कर्म्य वेति—अवश्यकर्तव्य नित्य नैमित्तिकञ्चेति कैयट) । आमन्त्रणे कामचार (काम्यकर्मणि कामनया प्रवृत्तिर्नाऽन्ययेति कैयट । अत्र भोजनाद्यननुष्ठानेऽपि न प्रत्यवायस्त द्विषया प्रवर्तना आमन्त्रणमिति तात्पर्यमित्युद्योत)।" इत्युक्तम् । एवञ्च विधि

अस्तिप्रवर्त्तनारूपमनुस्यूत चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्य किं भेदस्य विवक्षया ॥ इति ।
प्रवर्त्तनात्व च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्व तथेष्टसाधनत्वमेव

निमन्त्रणामन्त्रणाऽधीष्टेषु चतुष्वपि प्रवर्तनात्व साध्वनुस्यूतमस्ति । विधित्वादीनां चतुर्णा शक्यताऽवच्छेदकत्वे गौरवाल्लाघवादेक प्रवर्तनात्वमेव शक्यताऽवच्छेदकं युक्तमिति भाव । प्रवर्तनात्वञ्च—प्रेरणात्वाऽपरपर्यायमखण्डोपाधिरेवेत्यधिकमग्रे स्फुटीभविष्यति ।

किं भेदस्य विवक्षयेति—नन्वेव "विधिनिमन्त्रणे"तिसूत्रे तेषा ग्रहणं व्यर्थम् इतिचेत् ? न, प्रवर्तनापदार्थस्य शक्तिग्रहार्थं, शक्तिग्रहस्य लोकत एव सिद्धत्वेऽपि प्रवर्तनाया अवान्तरभेदबोधनार्थं तदुपादानस्य सार्थक्यमित्याशयात् । अत एव हरिरप्याह—

न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथाऽपि वा ।
विध्यादीनामुपादानं चतुर्णामादित कृतम् ॥ इति ।

न्याय = शक्ति, तदव्युत्पादनं तद्ग्रह इत्यर्थ । सम्प्रश्नस्तु सम्प्रधारणम्, तद्वा कृतव्यमिद वेत्यादिरूपो विचार । स च न प्रवर्तना, प्रवर्तना हि प्रवृत्त्यनुकूलो व्यापार । प्रार्थना च स्वाऽभिलषितवस्तुदानादौ स्वीयेच्छाबोधनमिति साऽपि न प्रवृत्त्यनुकूलो व्यापार, अन्यथासिद्धत्वात् इत्याशयेनाह—चतुष्टयेति । कारिकायां चतुर्णामित्यप्येवमेव । एवञ्च—"प्रवर्तनासम्प्रश्नप्रार्थनेषु लिङ्" इत्या कारक सूत्र सुवचमिति तत्त्वम् ।

वस्तुतस्तु—प्रार्थना स्वाऽभिलषितवस्तुदानादौ दैन्यनिवेदनपूर्विका प्रवर्तनैवेति मूले कारिकायाञ्च चतुर्ग्रहण पञ्चोपलक्षणम् । तथा च—"प्रवर्तनासम्प्रश्नया" इति सूत्रमेव सुवचमिति परमतत्त्वम् ।

अत्रेद बोध्यम्—विधिरेव लोके 'आज्ञा' इति 'उपदेश' इति च गीयते । अधीष्टेऽभ्यर्थनेति, आमन्त्रणमनुज्ञेति चेति मञ्जूषाकृत ।

दर्शनान्तरीयसंस्कारेण निरूपयति—प्रवर्तनात्वञ्च प्रवृत्तिजनकेति । प्रवृत्तिजनकज्ञानम्—इद मदिष्टसाधनमित्याकारकम्, तद्विषयता दृष्टान्ताऽवच्छिन्ना

तदेव निष्कर्षं । न तु कृतिसाध्यत्वं तस्य यागादौ लोकत एव लाभादित्यन्य लभ्यत्वात् । न च बलवदनिष्टाननुबन्धित्व, द्वेषाभावेनान्यथासिद्धत्वात्,

---

विशेष्यताख्या, तदवच्छेदकत्व तन्निरूपकत्वमिष्टसाधनत्वे इति समन्वय । प्रवृत्ति-जनकज्ञानीयविशेष्यतानिरूपितप्रकारतावत्त्वमिति निष्कर्ष । तद्विषयता इष्टसाधन पदार्थनिष्ठा प्रकारताख्या, तन्त्वच्छेदकत्वमिष्टसाधनत्वे इत्यपि केचित् । लोकत एव-लाभादिति—यागो मत्कृतिसाध्य, मत्कृतिसाध्यत्वनिरोधिधर्माऽनधिकरणत्वादि त्याद्यनुमानतो लाभादित्यर्थ ।

यद्यपि कृतिसाध्यत्वज्ञानस्याऽपि सुमेरुशृङ्गाहरणादावप्रवृत्त्या प्रवृत्तिप्रयोज-कत्वेन कृतिसाध्यत्वेऽपि प्रयत्नालक्षणसमन्वयस्तथाऽपि लिङ्स्तदंशे शक्तिर्नाऽस्ति, तस्यांशस्य लोकत एव लब्धत्वात् 'अनन्यलभ्यो हि शब्दार्थ' इति न्यायादिति भाव । वस्तुतस्तु अतिप्रसङ्गवारणाय वृत्तिप्रयोज्यस्यैवार्थस्य शाब्दबोधविषयत्वेने ष्टतया प्रमाणान्तरलभ्यस्यार्थस्य शाब्दत्वाऽभावापत्या सर्वस्यैवार्थस्य अनुमानादि यत्किञ्चित्प्रमाणान्तरलभ्यत्वेन शाब्दत्वोच्छेदापत्त्या च पदान्तरलभ्यस्यैवार्थस्य तेन न्यायेन शब्दार्थत्वनिरासात् उक्तविधप्रवर्तनात्वस्वीकारबलादेव कृतिसाध्यत्वां शेऽपि लिङ शक्तेरङ्गीकरणापत्तिरिति केचित् ।

ननु मधुविषसम्पृक्तान्नभक्षणादौ प्रवृत्तिवारणाय बलवदनिष्टाऽजनकत्वज्ञान-स्याऽपि प्रवृत्तिहेतुत्वकल्पनात्, बलवदनिष्टाऽजनकत्वमपि लिङर्थ स्यादितिचेन्नि राकरोति—न चेति । द्वेषाऽभावेनाऽन्यथासिद्धत्वादिति—द्विष्टविषये प्रवृत्ति वारणाय तद्विषयकप्रवृत्ति प्रति तद्विषयकद्वेषस्य बलवत्प्रतिबन्धकताकत्वेन प्रति बन्धकाऽभावविधया अवश्यबलवत्सनियतपूर्ववर्तिताकद्वेषाऽभावेनैवोपपत्तौ बलवद् निष्टाऽननुबन्धित्वज्ञानस्य न प्रवृत्ति प्रति हेतुत्वम् 'अतिरिक्तमथाऽपि यद्यमेन्नि यतावश्यकपूर्वभाविनः' इत्युक्तदिशा रासभादेरिव पञ्चमान्यथासिद्धिप्रसक्तत्वादिति भावः । इदमुपलक्षणम्—आस्तिक्यकामुकस्य नरकसाधनताज्ञानदशायामपि उत्क टेच्छया द्वेषाऽभावदशाया परदारादौ प्रवृत्तेर्व्यभिचाराच्चेति ।

परे तु—"विधिर्नाम प्रेषणम्, अधीष्ट नाम सत्कारपूर्विका व्यापारणा" इत्याद्युक्तभाष्यात्, हेतुमति चेति सूत्रस्थभाष्याच्च, निमन्त्रणादिशब्दानां प्रयोजक-निष्ठव्यापारवाचकत्वस्य सर्वसम्मततया च, लिङादिश्रवणे 'अय मां प्रेरयती'ति

नियमेन प्रतीतेश्च प्रेरणाप्रवर्तनाऽपरपर्याय प्रयोजकनिष्ठो व्यापार एव लिङर्थः, नत्विष्टसाधनत्वम्। स चाऽत्र प्रयुज्यमानलिङ्क्तिवाक्यरूप एव व्यापारान्तरस्याऽननुभवात्। अत एव "हेतुमति चे"ति सूत्रे भाष्ये—लिङादिशब्दप्रयोगरूपप्रयोजकव्यापारस्य सत्वादित्याशयेन—"इह कश्चित् कञ्चिदाह—'पचतु मो भवान्', 'अनुयुङ्क्तां मा भवान्' इति, अत्र णिच् कस्मान्न भवति!' इति प्रश्ने,—"अकर्तृत्वात्। नह्यसौ सम्प्रति प्रच्छति, न च प्रदूषयति, (लोडन्तप्रयोगकृतप्रेरणाविनेत्यर्थः इत्युद्योत), तूष्णीमास्ते।" इत्युत्तरमुक्तम्। सकियप्रेरणायां णिच्, निष्क्रियप्रेरणायां लोडादि, "तत्प्रयोजक" इत्यनेन व्यापारविष्ट कर्तोच्यते इति तदाशय। तदुक्त हरिणा—

"द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड् विधीयते।
सक्रियस्य प्रयोगस्तु यदा स विषयो णिच॥" इति।

प्रयोग प्रैष। ननु विधीयमानकर्तृत्वविशिष्टस्याऽपि यदि हेतुसंज्ञासूत्रे ग्रहणम् इत्याशयेन—"अथाऽपि कथञ्चित्कर्ता स्यादेवमपि न दोषः, लोकोक्तत्वात् प्रैषस्य णिजू न भविष्यति" इत्युक्तम्। अत्र लोडन्तशब्दप्रयोगरूपप्रयोजकव्यापारस्य लाडवाच्यत्वमित्यभिमानेन शङ्का, स प्रेरणात्वेन लोड्वाच्य एवेत्याशयेन च 'लोकोक्तत्वादि'त्युत्तरम्। अत्र 'लोकोक्तत्वात् प्रैषस्ये'ति समाधानेन आख्यातेन प्रेरणाया लिङ्वाच्यत्वमुक्त भवति। इष्टसाधनत्वस्य लिङ्वाच्यत्वे तु तस्य लोकोक्तत्वेऽपि णिजर्थप्रेरणाया अनुक्तत्वात्समाधानमसङ्गतमेव स्यात्, नहीष्टसाधनत्वं णिजर्थोऽपीति कश्चिदभ्युपैति। 'इह कश्चित् कञ्चिदाहे'त्यनेन लोडन्तशब्दप्रयोग एव प्रैषोऽत्रेति स्फुटमेव लभ्यते।

अदिष्टेन आप्तोक्तेन च लिङन्तशब्दरूपव्यापारेण प्रयोज्यस्य तद्विषये इष्ट साधनत्वाऽनुमानम्, ततश्च प्रवृत्ति। शब्दात्तादृशात् 'गच्छे'त्यादिक प्रवृत्ति वारणाय आप्तोक्तेति। आप्तोक्तादपि तादृशात् प्रवृत्तेरदर्शनात् अदिष्टेति। एवञ्च इष्टसाधनत्वाऽनुमापनद्वारा प्रयुज्यमानलिङन्तशब्द सुतरां प्रवृत्त्यनुकूलो व्यापारः।

स च प्रेरणात्वेन लिङ्शक्य। शक्यतावच्छेदकञ्च प्रेर्यादिधात्वर्थताऽवच्छेदकतया सिद्ध प्रेरणात्वमखण्डोपाधि न तु प्रवृत्तिजनकज्ञानीयविषयताऽवच्छेदकत्वरूपम्, उक्तयुक्ते। एकस्यैव रूपभेदेन वाच्यत्वाऽवाच्यत्वे उपपद्येते। ध प

इत्यन्यत्र विस्तरः । लुङादेशस्य तु भूतसामान्यमर्थः । भूतत्वं च वर्तमानध्वंसप्रतियोगिक्रियोपलक्षितत्वम् । लृङादेशस्य तु क्रियातिपत्तौ गम्यमानाया हेतुहेतुमद्भावे च गम्यमाने भूतत्व भविष्यत्त्वञ्चार्थः । आपादना तु गम्यमाना । भूते, एधश्चेदलप्स्यत ओदनमपक्ष्यत् । भविष्यति, सुवृष्टिश्चेद्भविष्यत्सुभिक्षमभविष्यदिति सक्षेपः ।

अथ नैयायिकाना मते संक्षेपाल्लकाराणामर्थो निरूप्यते । तत्र लडादि लृङन्ता दश लकाराः । तत्र लकारस्य कर्त्ता काल सङ्ख्या चेति त्रयोऽर्थाः । तत्र कर्त्तेति गतञ्चैत्र । 'ल कर्म्मणि च' इति सूत्रे चकारेण कर्तुः परामर्शात् । कर्तृस्थाने व्यापार इति भाट्टाः । यत्न इति नैयायिकाः ।

व्यापारो लोके) अवच्छेदकतासम्बन्धेन पुरुषनिष्ठ, वेदे ईश्वरनिष्ठ । वेदस्य अकर्तृकत्ववादिनां मते तु व्यपदेशिवद्भावेन स्वनिष्ठ एव , शब्दनिष्ठ एव) । शब्दरूपत्वाच्च 'शाब्दो भावो'ति मीमांसकैर्यंवह्रियते । तस्या विषयतया धात्वर्थेऽन्वय ततश्च—'यजेत' इत्यनेन 'प्रेरणाविषयो याग' इति बोध । तस्मान्नेष्ट साधनत्वादि लिङर्थः ।

किञ्च साध्येष्टकर्तृत्वज्ञानादपि प्रवृत्त्या तव मते तस्याऽपि लिङर्थत्वाऽऽपत्ति विनिगमनाविरहात् । किञ्च 'इद ते इष्टसाधनं, तस्मात्त्व कुरु' इति स्वाभिप्रव्यवहारादपि न तस्य लिङर्थत्व पौनरुक्त्यापत्ते , पौनरुक्त्यस्य तद्बोधदार्ढ्यकरणतात्पर्यकत्वेऽपि 'तस्मात्' इत्यनेनाऽन्वयापत्ते , श्रमेदे हेतुहेतुमद्भावस्याऽसिद्धे । स्पष्टञ्चेद भाष्यप्रदीपोद्योतमञ्जूषादौ । मूलन्तु दशनान्तरीयसंस्कारेण । अत एवोक्तं मूले—इत्यन्यत्र विस्तर इति—भाष्यप्रदीपोद्योतमञ्जूषास्थित्यर्थं ।

आपादना तु गम्यमानेति—आपादना=तर्क , स च मानसत्वव्याप्यो जातिविशेष । व्याप्यारोपेण व्यापकारोपस्तक इति केचित् , यथा—यदि पर्वते वह्न्यभाव स्यात्तर्हि धूमाभावोऽपि स्यादिति । आरोपश्च आहार्यज्ञानमुक्तस्वरूपम् । प्रकृते एधा लाभाऽभावश्चेत् ओदनपाकाऽभाव स्यादित्येवरूप । अतिपत्तिपदेन च सूत्रोक्तेन अस्या (आपादनाया) लाभ ।

व्यापार इति भाट्टा , यत्न इति नैयायिका इति—"ल कर्मणी"ति सूत्रे

युक्त चैतत्। व्यापारत्वाद्यपेक्षया लाघवेन यत्नत्वस्यैव शक्यतावच्छेदकत्वात्। शक्तितावच्छेदक च लकारसाधारण लत्वमेव। भवतीत्यादौ चादेशेनादेशिनो लस्यैव स्मरणादन्वयधी। आदेशेषु बहुषु शक्तिकल्पने गौरवात्तदस्मरणे च शक्तिभ्रमादेवान्वयधी। 'चैत्रो गत्वा गतो ग्राम' इत्यादौ सामानाधिकरण्यानुरोधेन यथायथ कर्तृकर्मणी कृद्वाच्ये। नचैव "लट शतृशानचौ" इत्यनेन शतृशानचोरादेशत्वात्कथ कर्तरि शक्ति। आदेशिशक्त्या निर्वाह एवादेशशक्त्यकल्पनात्। चैत्र पचन्नित्यादौ सामानाधिकरण्यानुरोधादादेशिशक्त्याऽनिर्वाहादाादेशेऽपि शक्ति।

इयांस्तु विशेष-लत्वेन यत्ने शक्ति, आत्मनेपदत्वेन फले। मैत्रेण गम्यते ग्राम इत्यादौ मैत्रवृत्तिकृतिजन्यगमनजन्यफलशाली ग्राम इत्यन्वयबोधात्। कृतिश्चात्र तृतीयार्थ। जन्यत्व ससर्ग। मैत्रः कृतौ विशेषणम्, सा च गमने, तच्च फले तच्च ग्रामे। 'ग्राम गच्छति मैत्र' इत्यत्र तु ग्रामवृत्तिफलजनकगमनानुकूलकृतिमा मैत्र इति बोध। फल च द्वितीयार्थ। जनकत्व ससर्ग। ग्रामश्चात्र फले विशेषणम्, तद्गमने, तच्च कृतौ, सा मैत्रे इति च विशेष्यविशेषणभावभेदेनैव कर्मकर्तृस्थलीयबोधयोर्विशेष। तावत्त पदार्थात्तूभयत्रैव तुल्या।

कर्तृपद भाववाचकमित्यभिमानात्। व्यापारत्वाद्यपेक्षया लाघवेनेति—व्यापारत्वस्य तज्जन्यत्वविशिष्टतज्जन्यजनकत्वरूपत्वमित्यभिमाननेदम्। वस्तुतस्तु कृतित्वमिव तदप्यखण्डोपाधिरेव। स्मरणादन्वयधीरिति—अत्राऽऽदेयाकरणत्याऽनुभवविरोधो द्रष्टव्यः। शक्तिभ्रमादेवेति—इदमपि चिन्त्यम्, बाधकं विना नि सन्देहप्रत्ययस्य भ्रमत्वाऽयोगात्। यत्तु कर्मणी कृद्वाच्ये इति—अत्राऽपि तीयन्यायापत्ति। आदेशेऽपि शक्तिरिति—अत्राऽप्यधजरतीयम्। आत्मनेपदत्वेन फल इति—यत्नफले प्रत्ययार्थे, व्यापारमात्र धात्वर्थ इति आयाति तदयुक्तम्, परस्मैपदत्वेन फलबोधाऽप्रसक्ते। अग्रिमविषयरोधाऽपि—कर्तृप्रत्यये कृतिः प्रत्ययार्थ, फलं द्वितीयाऽर्थ, व्यापारो धात्वर्थ इति निष्कर्षादिते। कर्मप्रत्यये च फलं प्रत्ययार्थ, कृतिस्तृतीयाऽर्थ, व्यापारो धात्वर्थ इति। यदि मनोरमं न, लत्वेन कृतौ आत्मनेपदत्वेन फल इति प्रतिज्ञाविरोधापत्तेः, लत्वस्योभयसाधारण्य

मैत्रेण ज्ञायते इष्यते क्रियते घट इत्यादौ वृत्तित्वतृतीयाया, विषयता त्वाख्यातस्यार्थ । मैत्रवृत्तिज्ञानविषयो घट इति बोध । घटं जानाति मैत्र इत्यादौ तु विषयता द्वितीयाया आश्रयत्व चाख्यातस्यार्थः । घट विषयकज्ञानाश्रयो मैत्र इति बोध ।

कालश्चातीतवर्त्तमानानागतात्मा यथायथ लडादेरर्थ । लटो भवती त्यादौ वर्त्तमानत्व लडलुङ्लिटाम् अभवत् अभूत् बभूवेत्यादौ भूत काल । लुट्लृटोर्भविता भविष्यतीत्यादौ भविष्यत्कालः । लिङ्लो ङ्लेटा भवेत् भवतु आग्नेयोऽष्टाकपालो भवतीत्यादौ विधि । सङ्कल्या च केवलार्थ । लेटस्तु छन्दस्येव प्रयोग । तत्र दीघरत्नमपि विकल्पेन भवति, भवातीतिदर्शनात् । तत्र व्यापारादिबोधकेन लटा वर्त्तमानत्व व्यापारादावेव बोध्यते । पचतीत्यादितो वर्तमानपाकानुकूलव्यापारवानिति बोधात् । एवमन्यत्रापि । व्यापारबोधकाख्यातजन्यवर्त्तमानत्वप्रकारकबोधे आख्यातजन्यव्यापारोपस्थितेर्हेतुत्वकल्पनान्ना तिप्रसङ्ग । व्यापारबोधकज्ञाधात्वादिममभिव्याहृताख्यातजन्यवर्त्तमानत्वप्रकारकबोधे तु तादृशधातुजन्योपस्थितिर्हेतु । कार्यकारणताया च्छेदिका च प्रत्यासत्या विषयतैवेति नातिप्रसङ्ग । जानाति इच्छति यतते इत्यादौ वर्त्तमानस्वाश्रयज्ञानाश्रयत्वादिबोधस्यैवानुभविकत्वात् ।

तत्र लटा शक्त्या वर्त्तमानत्व लक्षणयाऽऽश्रयत्व बोध्यत इति विशेष । लटा स्वाधिकरणकालोपाधिस्पन्द एव वर्तमान प्रत्याय्यते । वर्त्तमानसामीप्ये विहितेन तु स्वानधिकरणसमीपवर्त्ती तादृशकाल । तत्रापि शक्तिर्लक्षणा वेत्यन्यदेतत् ।

त्वात्, आत्मनेपदत्वस्याऽपि एधते इत्यादावतिप्रसक्तत्वात् । घट जानातीत्यादौ

आश्रयत्वस्येति—अत्राऽप्यर्धजरतीयं द्रष्टव्यम् । व्यापारादिबोधकेनेति—यत्नबोधकेनेत्यर्थः । व्यापारादावेवेति—यत्न एवेत्यर्थ । नाऽतिप्रसङ्ग इति—धात्वर्थव्यापारे न कालाऽन्वयापत्तिरित्यर्थ, व्यापाराऽबोधकज्ञाधात्विति—अत्राऽप्यर्धजरतीयम् प्रत्ययस्यार्थांशे कालस्यान्वयांशे चेति । प्रत्यासत्त्या विषय तैवेति—कालिकादेर्ग्रहणे तु श्रयस्याऽप्युपस्थितौ श्रयस्याऽपि बोधापत्तिरतदाह—

न चैकपदोपस्थितयो कृतिवर्त्तमानत्वयो कथं मिथोऽन्वय । तत्पदजन्यशाब्दबोधे पदान्तरजन्योपस्थितेर्हेतुत्वात् । कार्यतावच्छेदिका च प्रत्यासत्ति प्रकारता । कारणतावच्छेदिका च विशेष्यतेति । अन्यथा हि दण्डिपदार्थयोर्दण्डेनेत्यादौ च करणत्वैकत्वयोर्मिथोऽन्वयापत्ते । मैवम् , तत्तत्पदान्यत्वस्योक्तव्युत्पत्तावप्रवेशात्कथमन्यथैवकारार्थयोरन्य योगव्यवच्छेदयोर्मिथोऽन्वय ।

घटो नश्यतीत्यादौ वर्तमानोत्पत्तिकत्व प्रतियोगित्व च लडर्थौ । आद्य नाशे प्रकार , द्वितीय घटे प्रकार । वर्तमानोत्पत्तिकनाशप्रतियोगी घट इति बोधस्यानुभविकत्वात् । अत्र च वृत्तिद्वयस्य युगपद्बोधकत्वं सर्वैरेपितव्यम । तादृशोत्पत्तिकत्वप्रतियोगित्वयोरर्थयोर्युगपदेव बोधात् । न च तादृशोत्पत्ति कत्वमेवार्थोऽस्तु । धात्वर्थस्य नाशस्य घटे प्रातिपदिकार्थे साक्षादन्वया सम्भवात् । न च प्रतियोगित्वमेवार्थोऽस्त्विति वाच्यम । चिरनष्टेऽपि नश्यतीति प्रसङ्गात् । एतेनात्र वर्तमानत्वमेवार्थो नोत्पत्तिरित्यपास्तम् ।

केचित्तु लत्वमेवात्र प्रतियोगित्वस्य वृत्त्यवच्छेदक लट्स्त्वन्तु तादृशो त्पत्तिकत्वस्य । एकधर्मावच्छिन्नवृत्तिद्वयस्यैव न युगपद्बोधकत्वम् । अन्यथा दण्डेनेत्यादौ करणत्वैकत्वयोर्बोधो न स्यात् इत्याहुः । अन्ये तु नश्यतीत्यादौ लटा नाशसामग्रयेव बोध्यते । तेन न चिरनष्टे नश्यतीति प्रसङ्ग । अत एव विनश्यतौ विनाशसामग्रीसान्निध्यमित्याहुः प्रामाणिका ।

आख्यातात्किंयाविशेष्यको बोध इति वैयाकरणा भाट्टाश्च । आद्यनये धात्वर्थः क्रिया । चैत्रस्तण्डुल पचति इत्यादितश्चैत्रकर्तृक तण्डुलकर्मकपाक इति धी । अन्त्यनये भावना क्रिया प्रत्ययार्थ ।

नातिप्रसङ्ग इति । तत्पदजन्यशाब्दबोध इति—तत्पदार्थनिष्ठविशेष्यता निरूपितप्रकारतासम्बन्धेन शाब्दबुद्धित्वाऽवच्छिन्न प्रति विशेष्यतासम्बन्धेन पदान्तरजन्योपस्थिति कारणम् इति कार्यकारणभावादितिभाव । तत्तत्पदान्य त्वस्येति—यत्र यत्रैकपदोपस्थितयोर्मिथोऽन्वयोऽभीष्टस्तत्तत्पदान्यत्वविशिष्टपदार्थ रेति विवक्षत इति भाव । अन्ययोगव्यवच्छेदयोरिति—इदमपि सम्मत एव । अस्माकं मते तु अवधारणमेव तदर्थ । अत्र युगपद्वृत्तिद्वयस्येति—गङ्गायां मीन

चैत्रीयपाककरणिका तण्डुलकर्मिका भावनेतिबोध । प्रथमान्तार्थविशेष्यक एव बोध । ओदनकर्मकपाळानुकूलकृतिमान्चैत्र इति बोध इति नैयायिकाः । द्वितीयाद्यर्थकर्म्मकरणत्वादे क्रियायामेव सर्व्वमतेऽन्वय ।

घोषावित्यत्र दृष्टत्वादिति भावः । चैत्रापाककरणिका तण्डुलकर्मिका भाव नेति बोध इति

भाट्टा —कुमारिलभट्टस्य शिष्या मीमांसका इत्यर्थ । अन्त्यनये=मीमांसकनय इत्यय । चैत्रीयपाककरणिका तण्डुलकर्मिकेति बोध इति—अत्र मीमांसका —प्रत्ययार्थो भावना । सा च द्विधा, शाब्दी आर्थी चेति । यत्र लिङ् घटिते पद तत्र सा द्विधाऽपि, लिङ्त्वेन शाब्दी आख्यातत्वेन चार्थी । शाब्दी च प्रवर्तना प्रेरणाऽपरपर्यायो लिङ्घटितपदरूप प्रवृत्त्यनुकूलो व्यापार लिङ्भवणे आचार्या मां प्रेरयतातिनियमेन प्रतीते । शब्दरूपत्वात् सा शाब्दीति कथ्यते । आर्थीभावना च धात्वर्थफलाऽनुकूलो व्यापार आख्यातमात्रवाच्य । लिङोऽन्यत्र आख्याते तु केवला आर्थीभावनैव, लिङि तु शाब्द्या सहितैवार्थी । सा द्विधाऽपि भावना, त्र्यंशा भाव्यकरणेतिकर्तव्यताभि । सा च भावना अंशत्रयमपेक्षते—साध्यं, साधनम्, इतिकर्तव्यताञ्च—किं भावयेत्, केन भावयेत्, कथ भावयदिति तावत् । तत्र शाब्द्या भावनाया साध्याकाङ्क्षायामंशत्रयविशिष्टाऽर्थीभावना साध्यत्वेनाऽन्वेति, एकप्रत्ययगम्यत्वेन समानाऽभिधानभूते । संख्यादीना तथात्वेऽपि असाधत्वान्न साध्यत्वेनाऽन्वय । एव तस्या साध्यत्वऽवगत फलति साधनाकाङ्क्षाया प्रवृत्त्यनुकूलव्यापारसाधकत्वेन शातलिडादिज्ञान करणत्वमाऽवात । करणत्वञ्च तस्य भावनाभाव्यनिर्वर्तकत्वमेव कुठारादेरपि, पुरुषव्यापारनिर्वर्त्यच्छेदनिर्वर्तकत्वात् । तत्र कष्ट कर्मेति न्यायादुपाये दृष्ट आलस्यादिना षाऽप्रवर्तमान पुरुष प्रति प्रशस्तफलवत्ताज्ञापनेन ईप्सितसाधनत्वज्ञापनद्वारा अयवादवाक्यशाप्यप्राशस्त्यघटिता रूपा स्तुति सहकारिकारणमितीतिकर्तव्यताऽऽकाङ्क्षाया सादश्य सहकारिकारणमेवेतिकर्तव्यतात्वेनाऽन्वेति । सहकारिकारणमेवेतिकर्तव्यतोच्यते कथ भावयेदित्यनेन च तस्या आकाङ्क्षा बोध्यते । ननु शब्दानुपस्थितकरणादे कथमन्वय इतिचेन्न, शब्दोपस्थितप्रवर्तनाया उक्तरूपाकाङ्क्षाया शब्दानुपस्थितैस्तत्सहकारिण मनसोपस्थितैश्च पदार्थैस्तद्विषयकमानसबोधस्य तात्पर्यवशेनाङ्गीकारात् । तथादि

लिङादेः आश्रयेणोपस्थितिः, तस्य भावनाबोधकत्वेन शाब्दत्वमपि मनसोपस्थितम्। एवमर्थवादानामुपस्थितिः आश्रयेण, प्राशस्त्यस्य तु तैर्लक्षणया, ज्ञातायास्तु मनसा। एवञ्च—अर्थवादे प्रशस्तत्वेन ज्ञात्वा आर्थी भावना प्रवर्तनाबोधकतया शाब्द लिङादिशब्देन भावयेदिति बोधो यजेदित्यादौ लिङ्लक्षणा। प्राशस्त्यञ्च—यौगिकद्रव्यत्वरूपम्। एवम्—आरभ्यातङ्गनाख्यातवाच्या आर्थीभावनाऽपि क्रयेति निगदितम्। यथा यजेतेत्यत्र यजि देवपूजायामित्युक्तेर्देवपूजायजेरर्थः। देवपूजा च मन्त्रकरणका देवोद्देश्यका हविष्पत्यागः अयमेव च यागः। स च करणत्वेन आख्याताऽर्थभावनायामन्वेति। भाव्यस्तु सन्निहितस्वर्गकामादिपदोपस्थाप्यस्वर्गो यतो लभ्यते। यद्यपि यागोऽपि वस्तुगत्या भाव्य एव तथाऽपि तस्य करणत्वेनोपस्थित्याऽप्रधानरूपत्वेनाऽपुरुषार्थतया च नाऽत्र भाव्यत्वेनाऽन्वेति। अतो बहिर्भूत स्वर्गादेरेव भाव्यत्वेनाऽन्वयः। अत एव ज्योतिष्टोमेनेति तृतीया, करणभूते यागेऽभेदेनान्वयात्। सहकारिकारणकाद्द्रव्यरूपकर्थमावाकाद्द्रव्यायां तु सन्निधिपठित प्रयाजाद्यङ्गजातमितिकर्तव्यतात्वेनाऽन्वेति। प्रयाजाद्यङ्गजातेन (सहकारिकारणेन) यागेन (करणेन) स्वर्गं भावयेत् स्वर्गकाम इति बोधः। तथा च मिश्रा—'स्वर्गकामो यजेत' इत्यनेन स्वर्गकामकर्तृका स्वर्गसाध्यिका प्रयाजाद्यङ्गजातवति कर्तव्यताका यागकरणिका लिङ्ज्ञानकरणकार्थवादगम्यप्राशस्त्यज्ञानसहकृतयाऽन्द भावनाविषयाभूताऽऽर्थभावनेति बोधः।

पचतादयादौ सकर्मकस्थले तु तण्डुलादिरूपकर्माकाङ्क्षाऽपि अधिका। सहकारिकारणाकाङ्क्षाऽत्र बहिर्भूतकाष्ठादिपदैरपि नियतत। धात्वर्थपाठेन च। बालद्र लाकाङ्क्षाया 'तृप्तये' इत्यादि प्रयुज्यते। कर्मभावाकाङ्क्षायां च फूत्कारादनि रित्यभ्याहियते। एवञ्च—तृप्तिसाध्यिका, तण्डुलकर्मिका काष्ठाद्यपरकरणिका पाक करणिका फूत्कारादसहकृता चैत्रकर्तृका भावनेति यागः इत्यन्यत्र विस्तरः इत्यादुः।

परे तु—यागानुकूलो व्यापार एव यजेरर्थः। पत्यादेरिव यागे एव तत्र भाव्य स्वर्गस्तु पुरुषव्यापाररूपभावनाऽव्यवहितोत्तरवर्तित्वाऽभावान्न तद्भाव्यः। याग द्वारा तु संसाध्यः। एवञ्च 'स्वर्गाय'त्यभ्याहृत्य स्वर्गाय यागं भावयेत्स्वर्गकाम इति बोधः। यागे भावनाभाव्यस्वरूपसाध्यत्वस्य स्वर्गसाधनत्वेन विरोधाऽभावात्। कर णाकाङ्क्षा वाग्नेयादिभिर्निवर्तते। यत्तु धात्वर्थपक्षस्य त्यागरूपस्य भावना प्रति

लङस्तु शक्यो ह्यनद्यतनकाल । लुङस्तु भूतसामान्य, भूतत्व च वर्त्तमानध्वसप्रतियोग्युत्पत्तिकत्व न तु तादृशप्रतियोगित्वमेव । चिरोत्पन्नेऽपि पूर्वद्युरभवत् इति प्रत्ययापत्ते । नष्ट इत्यादौ नाशे तदन्वयासम्भवाच्च । उत्पत्तेस्तु देशकालादावन्वयान्नदोषः । अभवदित्यादौ तु धातुनोत्पत्ति प्रत्याय्यते, नष्ट इत्यादौ तादृशोत्पत्तिकत्व प्रत्यये नेति विशेष । लिटस्तु भूतकाल इव परोक्षत्वमप्यर्थ । अहं चकारेत्यादिप्रयोगादर्शनात् । न चैव 'णलुत्तमोवा'वि ज्ञापकात् उत्तमपुरुषस्तत्र स्यात् इति वाच्यम् । 'सुप्तोह किल विललाप' 'मत्तोह किल विचचार' इत्यादौ चित्तविक्षेपादिना पारोक्ष्यमुपपाद्य तत्र सूत्रसार्थक्यसम्भवात् । तत्र च

करणत्वमुक्त तन्न, कारकाधिकारे "साधकतम करणमि"तिसूत्रस्य क्रियाजनकेषु क्रियाया प्रकृष्टं जनक करणसंज्ञकमित्यर्थो भाष्यसम्मत । अत एव वृत्तिकृदादिभि क्रियाजनक कारकं करणमित्युक्तम् । हरिरप्याह-"क्रियाया परिनिष्पत्तिर्यद् व्यापारादनन्तरम् । विवक्ष्यते यदा यत्र करण तत्तदा स्मृतमिति ।" अत एव करणस्य व्यापार "कारक" इति सूत्र भाष्य दर्शित । तद्व्यापारस्य धात्वर्थत्वे करणस्य कर्तृत्वञ्च तत्र भाष्य उक्तम् । त्यागश्च न भावनाजनको नाऽपि व्यापारवान् इति तस्य करणत्वस्य दुरुपपादत्वात् । 'भावनामान्यानवर्तकत्व करणत्वम् इत्ययस्य सूत्रभाष्यादिताऽलाभात् । किञ्च 'स ब्रह्महत्या तरति याऽश्वमेधेन यजते' इत्यादौ यच्छब्दयागादनुवादक वाक्य तृतीयाऽनापत्ति, न हि तत्र यजत इत्यस्य यागेन भावयतीत्यय, माख्याऽनुपस्थित्या साकाङ्क्षत्वा । स ब्रह्महत्यामात वाक्यान्तरेण हि ब्रह्महत्यातरणरूपभाव्यापस्थात । तस्याऽनुवादकवाक्य भाव्यत्वनाऽन्वयस्तु न युक्त, तच्छब्दयागन तस्य विधेयसमपकत्वात् । किन्तु वाक्यद्वयसमाधात्तरमे तत्कामाऽश्वमधेन यजेतति विधि कल्प्यत इत्यव वृद्धमर्यादा । ज्यातिष्टामेनत्यादौ तृतीया तु ज्यातिष्टामेनेत्यादे पदपरत्वन यागनामधेयवाचितया स्वर्गानद्वारा भावनाया करणत्वनाऽन्वयात् । तस्याऽपि सकल्पद्वारा यागभावनाकरणत्वात् । स्पष्टञ्चेद "धर्म जैमनि' रित्यधिकरणे भाष्य भामत्यारित्याहुरित्यलन्न विस्तर ।

भूतत्वञ्च वर्तमानध्वसेति—वर्तमानो यो ध्वसस्तस्य प्रतियोगिनो उत्पत्ति र्यस्य स वर्तमानध्वसप्रतियोग्युत्पत्तिकः, तस्य भाव इत्यर्थ । एवमेवाग्रे भविष्यत्व•

परोक्षत्वेन पारोक्ष्यसाहश्ये तात्पर्यम्। 'चक्रे सुबन्धु' इति तु न लिट्प्र योगोऽपि तु तिङन्तप्रतिरूपको निपात ।

लुट्लृटोस्तु भविष्यत्कालः। भविष्यत्त्वं तु वर्त्तमानप्रागभावप्रतियोग्यु त्पत्तिकत्वम्। उत्पत्तौ च देशविशेष कालविशेषश्चाधिकरणत्वेनान्वेति। गृहे घटो भविता अद्य घटो भविष्यतीत्यादौ धातुनोत्पत्ति प्रत्याय्यते, वर्तमा नप्रागभावप्रतियोगित्वमाश्रयत्व च प्रत्ययेन। गृहाधिकरणकवर्तमानप्राग भावप्रतियोग्युत्पत्त्याश्रयो घट, अद्यतनप्रागभावप्रतियोग्युत्पत्त्याश्रयो घट इत्यन्वयबोधात्। वर्तमानप्रागभावप्रतियोगित्वमाश्रित्य लृडाद्यर्थत्वे श्वो गृहे समुत्पद्य परश्व प्राङ्गणे गमिष्यति मैत्रे प्राङ्गणे मैत्रो भविष्यतीति प्रसङ्ग। केचित्तु देशविशेष कालविशेषश्च प्रागभावे प्रतियोगिनि चान्वेति। परश्व प्राङ्गणे मत्रो भविष्यतीत्यस्य परश्वो वृत्ति प्राङ्गणवृत्तिर्यः प्रागभावस्त त्प्रतियोग्युत्पत्त्याश्रय परश्वोवृत्ति प्राङ्गणवृत्तिर्मैत्र इति बोध। तेन नोक्तादि प्रसङ्ग। एवन श्वो भाविनि घटे अद्य भविष्यतीति प्रसङ्गो निरस्त इत्याहु ।

नङ्क्ष्यतीत्यादौ वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्व प्रति योगित्व च प्रत्ययार्थ। श्वो घटो नङ्क्ष्यतीत्यादौ श्वोवृत्तिर्वर्त्तमान प्रागभावप्रतियोगिनो यादृत्पत्तिस्तदाश्रयनाशप्रतियोगी घट इत्यन्वयबोध। यत्त्वत्र वर्त्तमानप्रागभावप्रतियोगित्वमेव प्रत्ययार्थ। तन्न। श्वोभा विनाशके घटे अद्य नङ्क्ष्यतीति प्रसङ्गात्। पक्ष्यतीत्यादौ श्वोभावपाकव्य

क्षणेऽपि। श्वोभाविनाशक इति—श्वोभावो नाशो यस्य तस्मिन्नित्यर्थ। आद्यपाकव्यक्तादि—विक्लित्त्यनुकूल फूत्कारादिश्च भयणान्तानेकगुणभूताऽवय घक्रियाकलापो हि पचेर्धात्वर्थव्यापारः पाकशब्दवाच्य। यदुक्तम्—

"गुणभूतैरवयवै समूह समजन्मनाम्।
बुद्धया प्रकल्पिताऽभेद क्रियते व्यपदिश्यते ॥ इति।
यावत्सिद्धमसिद्धं वा साध्यत्वनाऽभिधीयते।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥ इति च।

क्तिप्रागभावगर्भमेव भविष्यत्त्वम् पक्ष्यवानित्यादौ चरमपाकव्यक्तिध्वस गर्भमेवभूतत्व भासते। तत्तत्समभिव्याहारस्य तादृशबोधे हेतुत्वात्। तेन पाकमध्ये कस्याश्चित्पाकव्यक्तेरनुत्पादेऽपि कस्याश्चिदतीतत्वेऽपि न पक्ष्यति पक्ष्यवानित्यादिप्रयोग ।

लिङो विधिराशीश्चार्थ । यजेतेत्यादौ विधि' आशीस्तु भूयादित्यादौ। सा च शुभाशसन तदिच्छेति यावत्। लोटस्तु विधिरनुमतिर्वा। *गच्छत्वित्यत्रानुमतिविषयगमनानुकूलकृतिमानिति बोधस्यानुभविक त्वात्। विधि प्रवर्त्तनेति भाट्टा । लिङ्निष्ठो व्यापार' पदार्थान्तर लिङ्पदज्ञानमेव वा। तस्य प्रवर्तनात्वेन ज्ञान शब्दाधीनप्रवृत्ती कार णम्। लिङ्श्रवणे आचार्यो मा प्रवर्तयतीति ज्ञानाद्यजनादौ

एवञ्चाद्यपाकपदेन फूत्कारस्य चरमपाकपदेन च अत्र अर्थस्य ग्रहण कर्त्तव्यम्।

प्रवर्तनेति भाट्टा'—भाट्टा = कुमारिलभट्टस्य शिष्या मीमासकविशेषा इत्यर्थ अस्य आहुरित्यग्रिमेणान्वय । ननु केय प्रवर्त्तना ? इत्यत आह—लिङ्निष्ठो व्यापार इति। तेषां मते वेदाऽपौरुषेयत्वेन तत्र आचार्याऽ भावात् शब्दनिष्ठैव प्रवर्तना। ननु शब्दनिष्ठ प्रवर्तनाऽरूपपाय कोऽर्थ व्यापारः ? इत्यत आह पदार्थान्तरमिति—आख्यातभावनारूपप्रसिद्धव्यापारविलक्षण इत्यर्थ, तैलक्षण्यञ्च शब्दनिष्ठत्वात्। ननु विलक्षणव्यापारस्याऽप्रसिद्धस्य कल्पने गौरवम्, लोके आचार्यनिष्ठाप्रवर्तनेत्यननुगमश्च। अत आह—लिङ्पदज्ञान मेव वेति। ननु लिङ्पदस्य केन रूपेण ज्ञान प्रवर्तना ? इत्यत आह—तस्य प्रवर्तनात्वेनेति। तस्य = लिङ्पदस्य। प्रवर्तनात्वेन = प्रवृत्तिहेतुत्वेन। ननु तादृग्ज्ञान किमाकारकम् ? इत्यत आह—लिङ्श्रवणे—आचार्यो मा प्रवर्तय र्तीति ज्ञानादिति। लिङ्श्रवणोत्तरकालिकम् आचार्यो मां प्रवर्तयतीतिज्ञानमेव तादृशमिति भाव। आचार्यपदस्याचार्यत्वादापलक्षणतयेदलौकिकवेदोभयसाधारण्यम्। लोके तु अन्याऽपि प्रवर्तना स्यात् आचार्यनिष्ठा, लिङ्श्रुतिवाक्यमयी तूनिष्ठति यावत्। ननु आचार्यनिष्ठा केय प्रवर्तना ? इत्यत आह—आचार्यानुष्ठेत्यादि। आचार्यस्य प्रयोज्यप्रवृत्त्यनुकूल आत्मव्यापार इत्यर्थ। सा प्रवर्तना द्विधा,

प्रवृत्तौ । आधार्यनिष्ठप्रवर्त्तनात्वभिप्रायविषय एवेत्याहु । तन्न । स्तनपानादिप्रवृत्ताविष्टसाधनताज्ञानस्य हेतुतायाः आवश्यकत्वात् तत एवोपपत्तौ प्रवर्त्तनाज्ञानहेतुत्वे मानाभावात् । स्वर्गकामो यजेतेत्यादौ प्रवर्तनाविषया यागकारणिका स्वर्गकर्मिका भावनेति बोधस्य परैरभ्युपगमात् । प्रवर्तनाविषयत्वमात्रज्ञानात् प्रवृत्त्यनुपपत्तेः आवश्यकस्वर्गसाधनत्वादिज्ञानादेव तत्र प्रवृत्तेः ।

कार्यं विधिरिति प्राभाकराः । स्वर्गकामो यजेतेत्यादौ स्वर्गः

लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः वैदिकवाक्ये तु पुरुषाऽभावाल्लिङादिशब्दनिष्ठ एव । अथवा लोकवेदोभयसाधारणं लिङ्पदस्योक्तरूपं ज्ञानमेवेह प्रवर्तनेति तत्त्वम् ।

कार्यं विधिरिति प्राभाकराः इति—कार्यं कृतिसाध्यम् । प्राभाकराः प्रभाकरनामाचार्यशिष्या मीमांसकविशेषा इत्यर्थः । अत्राऽयं परिष्कारः प्रतिभाति—शाब्दबुद्धौ योग्यताज्ञानस्य हेतुत्वेन अन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वेन 'घटेन जलमाहरे'त्यत्र घटे जलाहरणकरणत्वाऽन्वयाय सच्छिद्रेतरत्वरूपयोग्यतायामिव 'स्वर्गकामो यजेते'त्यत्राऽपि यजधातूत्तरतव्यप्रत्ययवाच्य—यागकरणकभावनायां प्राभाकरैरनुभवसिद्धस्य लिङ्वाच्यकृतिनिष्ठाधेयत्वकार्याऽभेदान्वयस्य 'यागभावना कार्या' इत्याकारकस्य सिद्धये यागभावनायां नियोज्याऽन्वयरूपाया योग्यतायाः शाब्दबोधे भानमावश्यकम् । भावनायां नियोज्याऽन्वयश्च अन्वयप्रकारमते—'स्वर्गकामनियोज्यिका यागभावना' इत्यय रूपः—स्वर्गकामनिष्ठनियोज्यत्वनिरूपितनियोज्यकृत्यन्वयतो यागभावनेति यावत् । स्वर्गकामे नियोज्यत्वञ्च—नियोज्यनिष्ठकाम्यसाधनताज्ञानाधीनप्रवृत्तिकार्यत्वप्रकारकज्ञानत्वम्, तच्च स्वर्गकामपुरुषे उक्तरूपान्वयरूपयागभावनीययोग्यतायाः अवच्छेदकम्, तेनाधिकरणेऽपि तादृशं सम्बन्धं विशेषेण भावनानिष्ठत्वसिद्धे । भावनायां नियोज्यकत्वञ्च—स्वनिष्ठकाम्यसाधनताज्ञानजन्यप्रवृत्तिकार्यत्वं (स्वर्गकामकार्यत्वम्)—प्रकारकज्ञानविशेष्यत्वम् । जगदीशमते भावनायां नियोज्यान्वयश्च—'स्वर्गकामनियोज्यतायिका यागभावना' 'नियोज्यतासम्बन्धेन स्वर्गकामविधिष्टा वा यागभावना' इत्यर्थरूप—'स्वर्गकामसमवेतत्वं साधनताधीनजन्यकार्यत्वप्रकारकज्ञानीयविशेष्यतावती यागभावना' इत्याकारक इति

कामनियोज्यक यागविषयक कार्यमिति प्राथमिको बोधः। सनियोज्यक स्थायिस्वर्गसाधन यागविषयक कार्यमिति द्वितीय । स्वर्गकामनियोज्यको याग स्वर्गकामकार्य्य इति तृतीय । स्वर्गकामो यागकर्तेति चतुथ । अह स्वर्गकामाऽतो यागो मत्कृतिसाध्य इति पञ्चम । न च प्रथमत पञ्च स्वर्गकामकार्यो याग इति बोधोऽस्तु, तथा च कायत्वे एव शक्तिर्न कार्य इति वाच्यम्। यागादिक्रियाया नियोज्यान्वय विना कायत्वान्वया
५ नुपपत्ते । नियोज्यत्व हि क्रियानिष्ठकायसाधनताज्ञानाधीन मत्कार्य मिति बोधजनकत्वम्। तच्च स्वर्गकामत्वाविशिष्टे योग्यतावच्छेदकतया भासते। घटेन जलमाहरेत्यत्र घटे छिद्रेतरत्ववत्। न च यागे स्वर्ग साधनत्वज्ञान विनेदृश नियोज्यत्वं भातुमर्हति, न वा यागे स्वर्गसाधनत्व प्रथममेव शक्य ज्ञातु, तद्धि साक्षात्परम्परया वा। नाद्य । आशुविना शिनो यागस्य कालान्तरभाविस्वर्गरूपफले साक्षादहेतुत्वात्। नान्त्य ।

यावत्। नियोज्यत्वञ्च तन्मते—स्वर्गकामनिष्ठस्य स्वर्गसाधनताधीजन्यकार्यत्व प्रकारकज्ञानस्य विशेष्यत्वम्। नियाजकत्वस्य चोपयोग एव नास्ति एतन्मते ।
१ उक्तरूपस्य भावनानुयागिकनियोज्याऽन्वयस्य लिङ्यकार्याऽन्वयप्रयोजकरूपवत्त्वरूपयो ग्यतात्वञ्च—'प्रवृत्तिमात्र प्रति मदिष्टसाधनताज्ञानजन्यमत्कार्यत्वप्रकारकज्ञान चिकी-र्षोत्पादनद्वारा लाघवात्कारणम्' इति प्राभाकराऽनुभवसिद्धव्युत्पत्तिमूलकम्। इष्टसा धनत्वादज्ञानानां (नैयायिकोक्तानां) त्रयाणां कारणत्वकल्पनाऽपेक्षया एकस्यैव ताद गज्ञानस्य कारणत्वकल्पने हि लाघवम्। इष्टसाधनताज्ञानजन्यकार्यत्वप्रकारकज्ञाने सति जलताडनसुमेरुशिखराऽऽहरणमधुविषसम्पृक्तान्नभक्षणेषु प्रवृत्तेरदृष्टत्वात्।

एवञ्च नियोज्यान्वयमानस्याऽऽवश्यकत्वे घटकतया कारणीभूतत्वेन भावनायां स्वर्गसाधनत्वज्ञानमावश्यकम्। भावनायां स्वर्गसाधनत्वज्ञानार्थञ्च कार्यत्वेन रूपेण अपूर्वनामकस्य पदार्थविशेषस्य लिङा भानमावश्यकम्। अन्यथा तृतीयक्षणवृत्ति ध्वंसप्रतियोगिन्या यागभावनाया बहुकालान्तर (मरणानन्तर) भाविस्वर्गम्प्रति साक्षात्साधनत्वस्याऽऽपत्तेः (साक्षादजनकत्वापत्तेः)। कार्याऽव्यवहितप्राक्क्षणाऽ-वच्छेदेन कार्यव्यापकत्वरूपस्य कारणत्वस्य तत्राऽभावात्। 'याग भावनाविषयक-मपूर्वात्मक काय'मितिरूपेण अपूर्वस्योपस्थितौ तु तस्य स्वर्गाधिकरण्यात्'

परम्पराघटकापूर्वानुपस्थितेः । अतो यागविषयक कार्यमिति प्रथमबोधादपूर्वोपस्थितौ तद्द्वारा यागे स्वर्गसाधनत्वमहात्मकात्प्रथमबोधात् कार्यत्वयोग इत्युक्तम्। नियोज्यत्व च पदानुपस्थितमपि योग्यतया शाब्दबोधे भासते द्वारमित्यत्र पिधेहीतिवत् ।

प्रवर्तकज्ञानविषयो विधिरितिनैयायिका । प्रवर्तकत्वं च कृतिसाध्यत्वेष्टसाधनत्वयत्नदनिष्टाननुबन्धित्वानां ज्ञानम् । गतस्तेषु लिङ् शक्तिश्रय सुमेरुश्रृङ्गाहरणनिष्फलाचारणमधुत्रिपसपूरकाम्रभोजनेषु प्रवृत्तिचारणाय यथासङ्ख्यं त्रयाणामेव ज्ञान प्रयतकम् । यत्तु सप्तम्यिर्थे शक्तिरेकैवेति । तन्न । विशेष्यविशेषणभावे विनिगमकाभावेन त्रिष्वेव पर्यवसानात् । एवञ्च स्वर्गकामो यजेतेत्यादौ स्वर्गकामीयो याग. कृतिसाध्य , इष्टसाधन बलवदनिष्टाननुबन्धी चेति बोध इत्येके ।

भवति तद्द्वारा (परम्परया,—यागभावनाया अपूर्वस्थिति , अपूर्वाय स्वर्गोत्पत्ति रिति रीत्या) भावनायां स्वर्गसाधनत्वज्ञानम् । भावनाविषयकत्वञ्च अपूर्वस्य, भावनाविषयकृतिसाध्यत्वमेव । तस्मात्काय एव लिङ शक्तिर्वाच्या, कामश्च इति साध्यम् । मुख्यस्य तृतीयबोधस्य लिङर्थ का 'रूपेणैवरूपेण वाच्यताऽऽवश्यकी, तेन रूपेणाऽपूर्वस्याऽनुपस्थिति , तस्याऽपि कृतिसाध्यताऽऽवश्यकात् ।

तथा च—'स्वर्गकामकर्तृकयागकरणकभावनाविषयकं कार्यरूपमपूर्वम्—इति प्रथमो बोध, । अत्र बोध कार्यात्मकतयाऽपूर्वारूपित्वथमेव च कार्यत्वं विधाय कार्ये लिङ शक्तिरुदीरितेतिध्येयम् । ततश्च—'स्वर्गकामकर्तृकयागभावनाविषयक स्यादि रूपेण स्वर्गसाधन कार्यरूपमपूर्वम्' इति द्वितीया बोध । ततश्च-'स्वर्गकामनिष्ठाभिन्ना यागभावना स्वर्गकामकार्या' इति तृतीया बोध । प्रथमबोधादपूर्वोपस्थित्या यागभावनायां स्वर्गसाधनत्वमहात्मके द्वितीया बोध । द्वितीयबोधाच्च स्वर्गसाधनत्वमहात्मकस्य कार्यत्वस्य प्रकारकज्ञानात् शाब्दबोधहेतुभूतयोग्यताया नियोज्याकाङ्क्षाया अन्वयेन यागभावनायां स्वर्गसाधनकार्यत्वस्य महात्मक प्रकृत्यौपयिकतृतीयः शाब्दबोधः ।

अयमेव च मुख्य शाब्दबोध प्रकृत्यौपयिकत्वात् । अत्र पदनिष्ठतया अनुपस्थितमपि नियोज्यत्व यावत्पदार्थोपस्थाप्यते, द्वारमित्युक्ते पिधेहीति यथा । अत्र च आकाङ्क्षामात्रेण 'शाब्दबोध चैकनार्थे' इत्यादि गदाधरोक्ते ।

वस्तुतो नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयस्यान्युत्पन्नतया तादृशयागानुकूलकृतिमान् स्वर्गकाम इत्येव बोध । कृतिसाध्यत्व च प्रवृत्तिसाध्यत्वमतानुसारेण समुद्रतरणादौ प्रवृत्ति । इष्टसाधनत्व चेष्टनिष्ठसाध्यतानिरूपकत्वमतानुसारेण तृप्तस्य भोजने प्रवृत्ति । बलवदनिष्टाननुबन्धित्व तु स्वजन्येष्टोत्पत्तिनान्तरीयकत्वम् । न हि सुख दुःखैर्विना लभ्यत इति न्यायेन नान्तरीयक किञ्चिद्दुःखमिष्टोत्पत्तौ अवश्यभावि तदतिरिक्तदुःखराहित्यमेव तत्त्वम् । ब्राह्मणो न हन्तव्य इत्यादौ नञ कृतिसाध्यत्वेष्टसाधनत्वनिषेधे शाब्दयाभावात्तेन बलवदनिष्टाननुबन्धित्वनिषेधाद् ब्राह्मणवधो बलवदनिष्टजनक इत्यर्थ पर्य्यवस्यति एतेन समुदिते लिङशक्तिरूहनमपास्तम् । यद्यपि प्रकृत्यर्थान्वितस्यार्थबोधकत्व प्रत्ययस्येति व्युत्पत्त्या नञर्थ बलवदनिष्टानुबन्धित्वान्वयोऽस्त्येवेति तथाप्यन्यथानुपपत्त्या एतदतिरिक्तस्थले एव सा व्युत्पत्ति । अत एव नातिरात्रे षोडशिन गृह्णातीत्यादौ षोडशिग्रहणाभाव इष्टसाधनमिति बोध इति दीधितिकृत । न हन्तव्य इत्यादौ हननाभावविषयक कार्यमिति बोध इति गुरव । ननु पचतीत्यादौ लडाद्यर्थवर्त्तमानस्यादे यत्ने एवा

अत्र कृतिसाध्यत्वविशिष्टात्मकलिङ्वाच्यकायघटककृतेराश्रयाकाङ्क्षापूरणार्थमपरोऽपि चतुर्थो बोध —'स्वर्गकामो यागभावनाविषयकृत्याश्रय' इत्याकारक । सर्वेषामेषा निष्कर्षमूलाऽपराऽपि पञ्चमो बोध —'अहं स्वर्गकाम, अतो यागभावना मत्कृतिसाध्या (मदीयपत्नाह्या)' इत्यात्मक ।

इमे पञ्चाऽपि बोधा स्वव्युत्पत्त्यनुरोधात्प्राभाकरैरभ्युपेयन्ते । तत्र तृतीय एव मुख्य शाब्दो बोध, तन्त्रादिना प्रथमोऽपि शाब्द इति कथयितु शक्यते । द्वितीय चतुर्थौ तु मानसावार्यावेवेति निश्चीयते । लोके तु 'तृप्तिकाम पचेत्' इत्यादौ प्रथम द्वितीययोर्नावश्यकता (द्वि) बोधयो, लोकप्रमाणादेव पाकभावनायां तृप्तिसाधनत्वस्य ग्रहात् । तृतीयसदृश एव बोधः शाब्द । जगदीशभट्टाचार्येण तु वेदेऽपि ह्यावेष प्रथमतृतीयाकारौ बोधौ प्राभाकरीयत्वेन दर्शितावित्यलम् ।

नातिरात्र इति—अतिरात्रो यागविशेष, षोडशी सोमग्रस्थापनार्थं पात्रविशेष । गृह्णाति—ग्रहीयादित्यर्थ ।

न्वयान्न सा व्युत्पत्ति । नैवम् । यत्र प्रत्ययार्थं तत्र प्रकृत्यर्थोचितस्वार्थे बोधकत्वमिति व्याप्ते यः प्रत्ययार्थं स प्रकृत्यर्थस्य विशेष्यतया भासते इति व्याप्तेश्च ।

लेटस्तु यच्छब्दासमभिव्याहृतस्यैव विधिरर्थः । समिधो यजतीत्यादौ विधिप्रत्ययात् देवाश्च यामिर्यजते ददाति च । य एव विद्वान् मावास्यायां यजते इत्यादौ तदप्रत्ययादिति ।

लृङस्तु भूतत्व क्रियातिपत्तिश्चार्थः । अतिपत्तिरनिष्पत्तिरापादना रूपा । सा च शक्या । सा चापादना तर्कः । तत्कर्म्यं च मानसत्वक्रयाप्यो जातिविशेषः । एधाश्चेदलप्स्यत ओदनमपक्ष्यत् इत्यादौ एधकर्मको भूतत्वेनापादनाविषयो लाभस्तदनुकूलकृतिमान् ओदनकर्मको भूतत्वेनापादनाविषयो यः पाकस्तदनुकूलकृतिमाश्चेति बोधः । भविष्यति क्रियातिपतनेऽपि लृङ् । यदि सुवृष्टिरभविष्यत् तदा सुभिक्षमभविष्यत् इति प्रयोगदर्शनाद्भूतत्वमविष्यत्त्वयोर्बोधनियमस्वात्पर्यात् । यदि स्यादित्यादौ लिङोप्यापादनाया शक्तिः । यदि निर्गच्छेत् स्यात्तर्हि निधूमः स्यादित्यादौ तस्या एव प्रतीतेः । लाघवेन स्थानिना बाधकत्वात् सकृल्यापि लकारार्थः ॥ इति लकारार्थनिर्णयः ॥

इति लादेशार्थवाद इति-अन्येभ्यपि शातव्यम्-न वास्तवमनद्यतनत्वादिकं लडादिनियामकम्, किन्तु वैवक्षिकमेव । अत एव "लुट्" सूत्रे भाष्ये-"लुट्सूत्रे रपवादप्रसङ्गो भूतभविष्यतोरविशेषवचनात्" इत्येन "अगमाम घोषान्', "गमिष्यामो घोषान्" इत्यादौ विशेषविहिताभ्यां लङ्लुट्भ्यां सामान्यविहितपर्युदस्तो लृटोपि प्राप्नोतीत्याक्षिप्य—"न घाऽनद्यतनादस्य निमित्ताऽभावात्" इत्युत्तरम्य व्याख्याने "न चाप्यनद्यतनकालो विशङ्कितः । किं तर्हि ? भूतकालसामान्यम्, भविष्यत्कालसामान्यञ्च । कथ पुन सतो नामाऽविवक्षा स्यात् ? सतोऽप्यविवक्षा भवति । तद्यथा—अलोमिका एडका, अनुदर कन्येति । असतश्च विवक्षा भवति । तद्यथा—समुद्रः गृष्टिकया, पिप्पलो पथिसक्थमित ।" इत्युक्तम् । तत्पर्यायस्य लिङ्विषये पागेवेदमतिदेश्यमिति शम् । इतिलादेशार्थवादः ।

अथ कारकाणि निरूप्यन्ते ।

कर्ता कर्म च करण सम्प्रदान तथैव च ।
अपादानाधिकरणमित्याहु कारकाणि षट् ॥

तत्र क्रियानिष्पादकत्व कारकत्वम् । तच्च कर्त्रादीना षण्णामपि ।

मूलजालधरोड्यानपक्षजिह्वात्रिरन्धने ,
स्वरूपेऽनस्थित सिद्धयै कञ्चिदीशं श्रयामहे ॥ १ ॥
चन्द्रवन्त ललाटावच्छेदेन मधुरेक्षणम् ,
शब्दाऽनुशासनार्थाय कञ्चिदीशं प्रशास्महे ॥ २ ॥

अवसरसङ्गत्या लादेशार्थनिरूपणानन्तर सुबर्थरूपाणि कारकाणि निरूपयितु प्रतिजानीते—अथेति—अथ शब्द श्रुत्या शङ्कादिनमङ्गलार्थ, तदुक्तम्—

"ओङ्कारश्चाऽथशब्दश्च द्वावेतौ ब्रह्मण पुरा,
कण्ठं भित्वा निर्यातौ तस्मान्माङ्गलिकावुभौ" इति ।

अथशब्दो श्रुत्या चानन्तर्यार्थं आनन्तर्यञ्च स्वोत्तरकालिकत्वरूप स्वध्वसाधिकरणकालवृत्तित्वम् । स्वपदञ्चात्र लादेशार्थनिरूपणपरामर्शकम् । लादेशार्थनिरूपणस्य आनन्तर्यपदार्थैकदेशे ध्वसे स्वप्रतियोगिकत्व (प्रतियोग्यनुयोगिभाव) सम्बन्धेनाऽन्वय । एवञ्च अथेत्यस्य—लादेशार्थनिरूपणप्रतियोगिकध्वसाधिकरणकालवृत्तित्वमित्यर्थं पर्यवसित । अन्वयश्चाऽस्य 'निरूप्यन्ते इत्येतद्घटकनिपूर्वकणयन्तरूपधात्वर्था ज्ञान व्यापारश्च । तत्र व्यापारे स्वरूपसम्बन्धेन व्यापारस्य जन्यत्वेन ज्ञाने । 'अन्ते' इति कर्मप्रत्ययार्थं कर्मत्वशक्तिमान्, तत्र कारकाणीति प्रथमान्तपदार्थस्याऽभेदेनाऽन्वय । कर्मणश्च विषयतानिरूपकत्वेन ज्ञानेऽन्वय वर्तमानकालश्च प्रत्ययार्थस्तस्य वृत्तित्वसम्बन्धेन धात्वर्थव्यापारेऽन्वय । मयेत्यध्याहार्यम्, अस्मच्छब्दार्थं श्रीनागेश, तस्य तृतीयार्थकर्तरि अभेदेनाऽन्वय, तृतीयार्थस्य च क्रियाकारकभावसम्बन्धेन धात्वर्थव्यापारेऽन्वय । तथा च—लादेशार्थशापनोत्तरकालिक वर्तमानकालिक श्रीनागेशकर्तृक-व्यापारजन्य-कारककर्मक ज्ञानमिति बोध । निरूप्यन्त इति—सामान्यतो विशेषतश्चेतिशेष ।

कारकविशेषानाह—कर्ता कर्मेति । कारकसामान्यमाह—तनेति—

वन्नेति निर्धारणसप्तम्या तेषाम्मध्य इत्यर्थः। क्रियानिष्पादकत्वमिति—क्रिय निर्वर्तकत्वम्, क्रियाजनकत्वम्, क्रियोत्पादकत्वमितिवाऽर्थः। अत्र लघौ सूत्रे "कारके" इति सूत्रस्थं भाष्यम्। तत्र हि—"कारक इति सञ्ज्ञानिर्देशश्चेत् सोऽपि निर्देश कर्तव्य —साधक निर्वर्तकं कारकमङ्गं भवतीति यत्तव्यम्। (इत रथा) कर्मसञ्ज्ञामसङ्ख्याऽऽक्थितस्य—ब्राह्मणस्य पुत्रं पचानं प्रच्छतीति। नैष दोष, कारक इति महती सञ्ज्ञा क्रियते, सञ्ज्ञा च नाम यता न लघीय कुत एतत्? लघ्वर्थं हि सञ्ज्ञाकरणम्। तत्र महत्या सञ्ज्ञाया करणे एतत्प्रयोजनम्—अयं सञ्ज्ञा यथा विज्ञायेत—'करोतीति कारकमिति" इत्युक्त्वा तदग्रे च 'ननु करोतीति व्युत्पत्त्या कर्तृरयुलन्त'कारक'शब्दस्य धातुवाच्यप्रधानव्यापाराश्रयस्वतन्त्र एव वृत्तौ प्रधानेन कर्त्रा व्यवाये स्यात्प्रादीनां धातुवाच्यप्रधानव्यापाराऽऽश्रयत्वेन विवक्षितत्वेऽपि प्रधानेन समवाये तथा विवक्षितुमशक्यत्वेन युगपद् 'अधिकरण' मिति कारक'मिति च स्यात्या व्यपदेशो नस्यादि'त्याशयेन—'ननु च भो प्रधा नेनाऽपि समवाये स्यात्या अनेनार्थी'ऽधिकरण' 'कारकमि'ति?" इत्याशङ्क्य— "एव तर्हि सामान्यभूता क्रिया वर्तते, तस्या निर्वर्तकं कारकमिति" इति समा हितम्। सर्वेषां च कारकाणां साध्यभूता क्रिया फलाऽनुकूलव्यापाररूपा सती, तस्या उत्पत्त्यनुकूलव्यापाराऽऽश्रयरूप सामान्यमेशऽत्र 'कारक'शब्देन विवक्षितं न तु क्रियोत्पत्त्यनुकूलव्यापाराश्रयविशेषो धातुवाच्यप्रधान'व्यापाराश्रयरूप' सर्वत्र एव, कारकाधिकारे करणादिसंज्ञानां विधानसामर्थ्यादिति च तदाशय कैयटे स्पा ख्यात। अत्राऽयं परिष्कार—'क्रियानिर्वर्तकं कारकम्' इति भाष्यस्य क्रियोत्पादकं कारकमित्यर्थं। क्रियोत्पादकत्वञ्च क्रियोत्पत्त्यनुकूलव्यापाराऽऽश्रयत्वम्। क्रिया च व्यापार, 'क्रियते' इति योगात्क्वचित् क्रियाशब्देन फलार्थस्य प्रहणाऽप्यस्ति रूढा व्यापारस्यैव ग्रहणात्, अनयोश्च प्रवृत्तत्वेन बलवत्त्वात्—क्रियोद्देश्यकानुकूलव्यापारत्वं, व्यापात्, कारकाणां भावनाऽभिधव्यापाराऽऽश्रयस्य भूयसाराऽसत्वादौ फलस्य तस्याऽनुरोधेन व्यापारजनकत्वस्यैवौचित्याच्च। व्यापारश्च धातुवाच्य एव फल भूतः। एवञ्च धातुवाच्यव्यापारोत्पत्त्यनुकूलव्यापाराश्रयत्वं कारकत्वमिति निष्कर्षः। यथा—प्रधानेन कर्त्रा समवाये पच्यात्ययव्यापार'—अभिधेयोऽकालेचनवपुरसा धनैवोऽरूपंणाधवपवफलाप', सदुत्पत्त्यनुकूलो व्यापार'नैमादिके कर्त्तरि मनो

कृतधातुवाच्यव्यापाराभयत्व कर्तृत्वम्।

धातुनोक्तक्रिये नित्य कारके कर्तृतेष्यते ॥ इति हर्य्युक्ते।

यापारो यत्नरूप, तदाभयत्वात्कर्तुः कारकत्वम्। एवम् अधिश्रयणाद्युत्पत्त्यनुकूलो-यापार कर्मणि तण्डुलादौ विक्लित्तिधारणम्, करणे काष्ठादौ ज्वलनम्, अधि रणे स्थाल्यादौ च धारणमिति तत्तदाश्रयत्वात्तेषा कारकत्वम्। अधिश्रयणादीना ोक्यद्योतनार्थमविवक्षायां प्रधानकर्तृव्यत्राये तु स्थालीस्थव्यापारस्य पञ्चाद् ाव्यत्वविवक्षायां 'स्थाली पचती'त्यत्र पञ्चार्थो धारणरूपो व्यापार, तदुत्पत्त्यनु ूलो यत्नरूपो मनोव्यापार स्थाल्यामारोपित तदाश्रयत्वात्स्थाल्यो कारकत्वम्। स्थालीपचती'त्यत्रारोपितचैत्र यस्य भानात्। एतन्मन्यत्राप्यूह्यम्। 'विप्राय ददाती'-यादावसन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वाऽवश्यकतया स्वबुद्धिपूर्वकालकत्वेन-बुद्धिविषयीभवनव्यापारेण क्रियोत्पादकत्वम्, अपादानस्याऽपि अवधिभवन-यापारेण क्रियोत्पत्त्यनुकूल-यापारवत्त्व बोध्यम्—तदाह—तच्च कर्म्मादीना षण्णामपीति-मूले। 'ब्राह्मणस्य पुत्रं पश्यान पृच्छती'त्यत्र तु ब्राह्मणस्य न कारकत्वम्, 'पुत्रेणाऽ यथासिद्धया क्रियोत्पादकत्वाऽभावादित्यलम्।

कारकनिशेषलक्षणानि क्रमेण निरूपय-नाह—तत्रेति—तेषा षण्णा मध्य त्यर्थ। प्रकृतधातुवाच्येति—अत्र च मूल "कारके" इति सूत्रस्थम्—"एव" तर्हि स्थालीस्थे यत्ने (पचिना) कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा" इति भाष्यमेवेतिबोध्यम्। स्थालीस्थव्यापारस्य धातुवाच्यत्वविवक्षाया स्थाल्या स्वातन्त्र्येण कर्तृसज्ञायां 'स्थाल्लीपचती'ति, चैत्रादिस्थव्यापारस्य धातुवाच्य त्वविवक्षायान्तु'चैत्र स्थाल्या पचती'ति प्रयोग इति तद्भाष्याशय। स्थाल्यादीना प्रधानकर्तुश्च व्यापार "कारके" इति सूत्रे भाष्ये स्पष्ट। तत्र हि—"अधि-श्रयणोदकासेचनतण्डुलावपनैधोऽपकर्षणक्रिया प्रधानस्य कर्तुः पाकं। द्रोण पचत्यादक पचतीति सम्भवनक्रिया धारणक्रिया चाऽधिकरणस्य पाक। एधा दयन्त्यानिक्लित्तैर्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाक। पर्याप्त करणाधि करणयो कर्तृत्व (कारकत्व) निदर्शितमवादानादीना कर्तृत्वनिदर्शनाय, पर्याप्तो श्चैक पुलाक स्थाल्या निदर्शनाये"त्युक्तम्। अत्रेद तु चिन्त्यते—'कर्तुः पाक' 'अधिकरणस्य पाक' 'करणस्य पाक' इति भाष्ये 'पाक' इत्यशेन सर्वेषामेव कार-

कारणा व्यापारस्य धात्वाख्यत्व प्रतीयते। "स्याल्लीरये यत्ने कथ्यमाने स्वतन्त्रा, कर्तृरये यत्ने कथ्यमाने परतन्त्रा" इति भाष्येण च एकदा एकस्यापि व्यापारस्यैव धात्वाख्यत्व बोध्यते, विवक्षया च पर्यायेण प्रत्येकव्यापारस्य धात्वाख्यत्व बोध्यते। ततश्चाऽत्र निष्कर्ष प्रतिभाति—पचि धातौ नानाप्रकार, अधिश्रयणादिप्रधानकर्तृस्थव्यापारनिरूपिता प्रसिद्धैका, स्थाल्यादिस्थसम्बन्ध धारणक्रियानिरूपिताऽन्या, काष्ठादिस्थज्वलनक्रियानिरूपिताऽपरा, तण्डुलादिनिष्ठ विक्लित्तिधारणक्रियानिरूपिता चेतरेति। तत्र प्रधानकर्तृस्थव्यापारनिरूपितैवाश्रयेणा ननुसन्धानेन मुख्या, इतरस्तु कारकलक्षणपरिष्कारोक्तरीत्याऽऽश्रयाऽनुसन्धानाद् मुख्या इति विवेक। विवक्षया चाऽर्थाऽनुसारेण तस्यास्तस्याः शक्तेरनवेक्षणम्, प्रकरणादीनां शक्तिपरिच्छेदकत्वात्। स्याल्लीरये यत्ने कथ्यमाने 'स्याली स्वतन्त्रा' इति भाष्येण यस्य कारकस्य स्वातन्त्र्यविवक्षा तदीयकारकव्यापारस्यैव धात्वाख्यत्व मेकदेति नियमः, अपरकारकव्यापारस्य तु न तदा धात्वाख्यत्वमिति तदा तस्य शाब्दत्व न, किन्तु विवक्षया कर्मादीनां शाब्दत्वे तद्वृत्तिव्यापारस्याऽर्थत्वमेव मवतीतिसुधियो विभावयन्तु।

इदञ्चाऽप्यवधेयम्—अत्र प्रकृतधात्वाख्यव्यापाराश्रयत्वरूपे कर्तृत्वघटके प्रकृत धात्वाख्यो व्यापार प्रधानाऽप्रधानन्यायेन प्रधानीभूत एव गृह्यते, तेन 'अग्नेर्माण वक पाचयती'त्यादौ संयोगाऽनुकूलव्यापाराऽभावाऽनुकूलव्यापारार्थकयाचिधात्वर्थभूत संयोगाऽनुकूलव्यापारस्याऽऽश्रयत्वेऽपि माणवकादेर्न कर्तृत्वम्, अन्यथा तृतीयापत्ते, तदीप्सिततमत्वात्। अग्नावपि कर्मत्वप्राप्त्या निरवकाशत्वात् "पाचयतेर्माणवकेनाग्निः" इति माणवकेऽपि पञ्चम्यापत्तेश्च। यत्तु 'देवदत्तेन पाचयती'त्यादौ तु णिचो याचक त्वेन एयन्ताऽप्यन्तधात्वर्थीयप्रधानव्यापाराश्रयत्वेन प्रयोज्यप्रयोजकयोर्द्वयोरपि कर्तृत्वम्। व्यापारे प्राधान्यञ्च न शाब्दबोधीयमुख्यविशेष्यताऽऽश्रयत्वरूप, कर्मत्वत्वे फलस्य प्राधान्येनाऽन्वये अपि तु अनुकूलत्वसम्बन्धाऽवच्छिन्नप्रकारताऽ नाश्रयत्वे सति प्रतियोगित्वसम्बन्धाऽवच्छिन्नप्रकारताऽनाश्रयत्वम्, अन्वयेना प्रतीयमानत्वे सति अभावाऽप्रतियोगित्वमिति यावत्। अनुकूलत्वसम्बन्धाऽवच्छि न्नत्वनिवेशात्—कर्मत्वत्वे व्यापारस्य प्रकारत्वेऽपि नाप्राप्ति प्रयोज्यत्वसम्बन्धाऽ वच्छिन्नप्रकारताश्रयत्वेऽपि अनुकूलत्वसम्बन्धाऽवच्छिन्नप्रकारताऽनाश्रयत्वात्।

अन्यकारकनिष्ठो व्यापारस्तु न प्रकृतधातुवाच्य । यथा वह्निना पचतीत्यत्र वह्निनिष्ठ प्रज्वलनादि । अन्यकारकनिष्ठव्यापाराश्रयस्य

वाहराप्रकारताऽनाश्रयत्वनिवेशात् 'गां दोग्धि पय' इत्यादौ दुहादे पयोनिष्ठ-विभागाऽनुकूलगोनिष्ठ-व्यापाराऽनुकूलव्यापारार्थकत्वपक्षे प्रथमव्यापाराश्रयस्य गवा-देर्न कर्तृत्वाऽतिप्रसङ्ग । प्रतियोगित्वसम्बन्धाऽवच्छिन्नप्रकारताऽनाश्रयत्वनिवे शात्—'अग्नेर्माणवक वारयती'त्यादौ माणवके नातिव्याप्ति, माणवकव्यापारस्य अभावनिष्ठविशेष्यतानिरूपितप्रतियोगित्वसम्बन्धाऽवच्छिन्नप्रकारताश्रयत्वात् । तथा च—प्रकृतधातुविशिष्टव्यापाराश्रयत्व कर्तृत्वम् । वैशिष्ट्यञ्च—स्ववाच्यत्व स्ववाच्यनिरूपितजन्यत्वेनाऽप्रतीयमानत्व—स्ववाच्याऽभावाऽप्रतियोगित्वमितिसम्ब -न्धेनेति लक्षण पर्यवसितम् । यद्यपि यथाश्रुतमूलोक्तलक्षणे प्रधानपदाऽघटितेऽ पि 'अग्नेर्माणवक वारयती'त्यत्र माणवकस्य कर्तृत्वप्रसावपि वारिघात्वर्थव्यापार-प्रयोज्यफलाऽऽश्रयत्वेन कर्मत्वस्याऽपि प्राप्त्या शाब्दबोधीयमुख्यविशेष्यताऽऽश्रयत्व रूपस्य शाब्दप्राधान्यस्य अन्याऽनधीनत्वलक्षणार्थप्राधान्यस्य च वारकनिष्ठव्यापार एव सत्वेन तदनुरोधिकर्मत्वस्य कर्तृत्वाऽपेक्षया बलवत्त्वेन कर्तृसंज्ञाया बाधान्नाति प्रसङ्ग, कर्मसंज्ञासूत्रे च कारकाधिकारेणैव लाभसंभवे कर्तृग्रहणात्प्रधानीभूत-व्यापाराश्रयस्य कर्तृग्रहणादुक्तदोषान्तरापत्तिश्च न । प्रधानानुरोधिकार्यस्य सर्वतो बलवत्त्वादेव च गत्यादिसूत्रस्थ "हेतुमति चे"तिसूत्रस्थभाष्योक्त तत्सूत्रस्थशेख रोक्तश्च नियामकत्व सगच्छते । 'एव गां दोग्धी'त्यादावपीति लक्षणे प्रधानपदा-वेशो नावश्यकस्तथापि अनेकक्लिष्टकल्पनाऽपेक्षया लक्षणे प्रधानपदावेश एव लाघवमिति द्रष्टव्यम् ।

अन्यकारकनिष्ठेति—स्पष्टञ्चेद् "कारके" इति सूत्रे भाष्ये—"स्थालीस्थे यत्ने (पचिना) कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने कथ्यमाने परतन्त्रे"त्यनेन ।

अत्रेदमवधेयम्—"कारके" इतिसूत्रस्थभाष्यात्—कारकत्वप्रयोजकत्व कर्तृ-त्वम्' इत्यपि कर्तृलक्षणान्तरमायाति । तत्र हि—"कथं पुनर्ज्ञायते कर्ता प्रधान-मिति ? यत्सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवती"त्युक्तम् । 'स्थाली पचती'त्यादौ तु कारकान्तरप्रवर्तकत्वस्यारोपान्निर्वाह इति तद्भाष्योद्योते स्पष्टम् ।

कारणं व्यापारस्य धात्ववाच्यत्व प्रतीयते। "स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा" इति भाष्येण च एकदा एकस्यापारस्यैव धात्ववाच्यत्व बोध्यते, विवक्षया च पर्यायेण प्रत्येकव्यापारस्य धात्ववाच्यत्व बोध्यते। ततश्चाऽय निष्कर्ष प्रतिभाति—पचू धातौ नानाश्रयक, अधिश्रयणादिप्रधानकर्तृस्थव्यापारनिरूपिता प्रसिद्धैका, स्थाल्यादिस्थसम्भवन धारणक्रियानिरूपिताऽन्या, काष्ठादिस्थज्वलनक्रियानिरूपिताऽपर, तण्डुलादिनिष्ठ विक्लित्तिधारणक्रियानिरूपिता चेतरेति। तत्र प्रधानकर्तृस्थव्यापारनिरूपितैवारोपाऽनुसन्धानेन मुख्या, इतरास्तु कारकलक्षणपरिष्कारोक्तयेत्याऽऽरोपाऽनुसन्धानाद मुख्या इति विवेक। विवक्षया चाऽर्थाऽनुसारेण तस्यास्तस्याः शक्तेरुपयोग, प्रकरणादीनां शक्तिपरिच्छेदकत्वात्। स्थालीस्थे यत्ने कथ्यमाने 'स्थाली स्वतन्त्रा' इति भाष्येण यस्य कारकस्य स्वातन्त्र्यविवक्षा तदीयकारकव्यापारस्यैव धात्ववाच्यत्व मेकदेति नियम, अपरकारकव्यापारस्य तु न तदा धात्ववाच्यत्वमिति तदा तस्य शाब्दत्व न, किन्तु विवक्षया कर्मादीनां शाब्दत्वे तदवृत्तिव्यापारस्याऽऽर्थत्वमेव भवतीतिसुधियो विभावयन्तु।

इदञ्चाऽप्यवधेयम्—अत्र प्रकृतधात्ववाच्यव्यापाराश्रयत्वरूपे कर्तृलक्षणे प्रकृत धात्ववाच्यो व्यापार प्रधानाऽप्रधानन्यायेन प्रधानीभूत एव गृह्यते, तेन 'अग्नेर्माणवकं धारयती'त्यादौ संयोगाऽनुकूलव्यापाराऽभावाऽनुकूलव्यापारार्थकधारिधात्वर्थभूत संयोगाऽनुकूलव्यापारस्याऽऽश्रयत्वेऽपि माणवकादेर्न कर्तृत्वम्, अन्यथा तृतीयापत्ते, तदीप्सिततमत्वात्। अग्नावपि कर्मत्वप्राप्त्या निरवकाशत्वात् "धारणार्थानामि"ति माणवकेऽपि पञ्चम्यापत्तेश्च। णयन्ते 'देवदत्तेन पाचयती'त्यादौ तु णिचो वाचकत्वेन णयन्ताऽश्रयन्तधात्वुद्बोधीयप्रधानव्यापाराश्रयत्वेन प्रयोज्यप्रयोजकयोर्द्वयोरपि कर्तृत्वम्। व्यापारे प्राधान्यञ्च न शाब्दबोधीयमुख्यविशेष्यताऽऽश्रयत्वरूप, कर्मप्रत्यये फलस्य प्राधान्येनाऽन्वये अपि तु अनुकूलत्वसम्बन्धाऽवच्छिन्नप्रकारताऽनाश्रयत्वे सति प्रतियोगित्वसम्बन्धाऽवच्छिन्नप्रकारताऽनाश्रयत्वम्, अन्यत्वेनाऽप्रतीयमानत्वे सति अभावाऽप्रतियोगित्वमिति यावत्। अनुकूलत्वसम्बन्धाऽवच्छिन्नत्वनिवेशात्—कर्मप्रत्यये व्यापारस्य प्रकारत्वेऽपि नाव्याप्ति प्रयोज्यत्वसम्बन्धाऽवच्छिन्नप्रकारताश्रयत्वेऽपि अनुकूलत्वसम्बन्धाऽवच्छिन्नप्रकारताऽनाश्रयत्वात्।

अन्यकारकनिष्ठो व्यापारस्तु न प्रकृतधातुवाच्य' । यथा वह्निना पचतीत्यत्र वह्निनिष्ठ' प्रज्वलनादि । अन्यकारकनिष्ठव्यापाराश्रयस्य

तादृशप्रकारताऽनाश्रयत्वनिवेशात् 'गां दोग्धि पय' इत्यादौ दुहादेः पयोनिष्ठविभागाऽनुकूलगोनिष्ठ-व्यापाराऽनुकूलव्यापारार्थकत्वपक्षे प्रथमव्यापाराश्रयस्य गवादेर्न कर्तृत्वाऽतिप्रसङ्ग । प्रतियोगित्वसम्बन्धाऽवच्छिन्नप्रकारताऽनाश्रयत्वनिवेशात्—'अग्नेर्माणवक वारयती'त्यादौ माणवके नातिव्याप्ति, माणवकव्यापारस्य अभावनिष्ठविशेष्यतानिरूपितप्रतियोगित्वसम्बन्धाऽवच्छिन्नप्रकारताश्रयत्वात् । तथा च—प्रकृतधातुविशिष्टव्यापाराश्रयत्व कर्तृत्वम् । वैशिष्ट्यञ्च—स्ववाच्यत्व स्ववाच्यनिरूपितजन्यत्वेनाऽप्रतीयमानत्व—स्ववाच्याऽभावाऽप्रतियोगित्वमितिसम्बन्धत्रयेणेति लक्षणं पर्यवसितम् । यद्यपि यथाश्रुतमूलोक्तलक्षणे प्रधानपदाऽघटितेऽपि 'अग्नेर्माणवक वारयती'त्यत्र माणवकस्य कर्तृत्वप्राप्तावपि वारिधात्वर्थव्यापारप्रयोज्यफलाऽऽश्रयत्वेन कर्मत्वस्याऽपि प्राप्त्या शाब्दबोधीयमुख्यविशेष्यताऽऽश्रयत्वरूपस्य शाब्दप्राधान्यस्य अन्याऽनधीनत्वलक्षणार्थप्राधान्यस्य च वारकनिष्ठव्यापारएव सत्त्वेन तदनुरोधिकर्मत्वस्य कर्तृत्वाऽपेक्षया बलवत्त्वेन कर्तृसंज्ञाया बाधान्नातिप्रसङ्ग, कर्मसंज्ञासूत्रे च कारकाधिकारेणैव लाभसंभवे कर्तृग्रहणात्प्रधानीभूतव्यापाराश्रयस्य कर्तृग्रहणादुक्तदोषान्तरापत्तिश्च न । प्रधानानुरोधिकार्यस्य सर्वतो बलवत्त्वादेव च गत्यादिसूत्रस्थ "हेतुमति चे"तिसूत्रस्थभाष्योक्त तत्सूत्रस्थशेखरोक्तञ्च नियामकत्व संगच्छते । 'एव गा दोग्धी'त्यादावपीति लक्षणे प्रधानपदावेशो नावश्यकस्तथापि अनेकक्लिष्टकल्पनाऽपेक्षया लक्षणे प्रधानपदावेश एव लाघवमिति द्रष्टव्यम् ।

अन्यकारकनिष्ठेति—स्पष्टञ्चेदं "कारके" इति सूत्रे भाष्ये—"स्थाल्यां स्थे पचतीत्यत्र स्थाल्यां स्थे पचिना) कथ्यमाने स्थाली स्वतन्त्रा, कर्तृस्थे यत्ने कथ्यमाने परतन्त्रे"त्यनेन ।

अत्रेदमवधेयम्—"कारके" इतिसूत्रस्थभाष्यात्—कारकत्वप्रयोजकत्व कर्तृत्वम्' इत्यपि कर्तुर्लक्षणान्तरमायाति । तत्र हि—"कर्ता पुनर्ज्ञायते कर्ता प्रधानमिति ? यत्सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवती"त्युक्तम् । 'स्थाली पचती'त्यादौ तु कारकान्तरप्रवर्तकत्वस्यारोपान्निर्वाह इति तद्भाष्योद्योते स्पष्टम् ।

कर्तृत्वकारणाय धातुवाच्येति । तत्रोक्ते तु कारकमात्रे प्रथमैव तिङ्स-मानाधिकरणे प्रथमा अभिहिते प्रथमेति वार्तिकद्वयात् । 'सूत्रमत' तु कर्तृकर्माद्यथकप्रत्ययेन कथादुक्तत्वात् प्रथमायाः प्रातिपदि कार्थ एवार्थ । तस्य चाख्यातार्थकर्त्रादिनाऽभेदान्वयेन प्रथमार्थस्य कारकत्वम् । अत एवाख्यातार्थद्वारकक्रियान्वयात् तदर्थस्य क्रिया

तत्र—तेषु कारकार्थेषु मध्य इत्यर्थ । ज्ञापकवार्तिकद्वयेति—इद वार्तिकद्व-यं प्रातिपदिकार्थसूत्रे भाष्ये व्याख्यातम् । सूत्रमत इति—"प्रातिपदिकार्थलिङ्ग" इत्यादिसूत्रे हि प्रथमाविधायके कारकवाचकपदाऽभावात्प्रातिपदिकार्थ एव प्रथमार्थ वार्तिकद्वये उक्ते तु 'तिङ्समानाधिकरणे' इति, 'अभिहिते' इति च कारकवाचक प्रथमाद्यर्थबोधकरूपोपादानादुक्तकारकमात्र प्रथमार्थ इति निश्चीयत इति भाव । ननु तर्हि सूत्रमते प्रथमान्तघटितप्रयोगे कथ कर्तृत्वादेर्भानमित्यत आह—कर्तृ कर्माद्यर्थकेति—तत्तदर्थकतिङ्कृद्भ्यो कर्तृत्वादीना भानमिति भाव । ननु तर्हि सूत्रमते प्रथमाऽर्थस्य कथ कारकत्वम् ? वार्तिकमतेऽपि तिङर्थ एव प्रथमार्थस्याऽन्व याक्रियायामन्वयाऽभावेन क्रियाजनकत्वाऽनुपपत्त्या कथ तस्य कारकत्वम् ? इत्यत आह-तस्य चाख्यातार्थकर्त्रादीति—कारकेण सह अभेदान्वयात् तस्य कारकत्व मित्यभिप्राय । नन्वेवमपि प्रथमान्तार्थस्य क्रियायामन्वयाऽभावेन क्रियाजनकत्वाऽनु पपत्त्या क्रियाजनकत्वरूप कारकत्व कथ तस्य स्यात्, क्रियान्वयिन एव क्रियाज-नकत्वादित्यत आह—आख्यातार्थद्वारकक्रियान्वयादिति—आख्यातार्थस्य क्रिया जनकत्वात् क्रियाजनकस्य क्रियायामन्वयौचित्येन क्रियान्वयित्वाच्च कारकत्वे सति तद भेदेन प्रथमान्तार्थस्याऽपि क्रियाजनकत्वात् आख्यातार्थाऽभेदद्वारकक्रियान्वयित्वाच्च तस्याऽपि कारकत्व निर्बाधमितिभाव । एवम्—अधिकरणकारकस्याऽपि कर्तृकर्माऽन्वयद्वारकमेव क्रियान्वयित्वम् । ननु क्रियाजनकस्य क्रियायां साक्षात्सम्बन्ध आवश्यक, परम्परासम्बन्धे कथ तस्य क्रियाजनकत्वम्, 'ब्राह्मणस्य पुत्र पचानं पृच्छती'त्यादौ ब्राह्मणस्येवाऽन्यथासिद्धिमत्त्वात्, साक्षादन्वयौचित्ये सति परम्परान्वये तस्य साधुत्वे मानाभावाच्चेदिचेत्—न, कर्मसम्बन्धिन विना पृच्छादिक्रियाया कर्ममात्रेण सम्भवेन कर्मसम्बन्धिनो ब्राह्मणादेरन्यथा सिद्धत्वेऽपि 'कटे शेते' 'स्थाल्यां पचती'त्यादौ कर्तृकर्माऽधिकरणे विना शयनपाक-

जनकत्वादभ्या कारकधिमक्तित्वेन भाग्ये व्यवहार । चैत्रो भवतीत्यत्र

क्रियारसभवनाऽधिकरणस्याऽप्यथासिद्धिप्रसक्तेऽभावात्, 'चैत्र पचता'त्यादौ चैत्रादेरपि आख्याताथाऽभिन्नत्वेनाऽप्यथासिद्धयप्रसक्तात्, परम्पराऽन्वयेऽपि साधुत्वे 'तिङ्समानाधिकरणे' इति 'आधाराऽधिकरणम्' इति शास्त्रयोरेव मानत्वाच्च। अन्यथा क्रियायां तिङ्यस्यैव साक्षादन्वयेन प्रथमार्थस्य साक्षादनन्वयेन कारकत्वाऽभावापत्तौ प्रथमायन्तिङ्वाच्यमाचकत्वरूपतिङ्समानाधिकरण्य दुरुपपादत्वात्, "आधारोऽधिकरणम्' इत्यत्राऽपि कारकाधिकारेण क्रियाया लाभाकिंपाश्रयत्वैवाधिकरणसन्निधानेन साक्षात्क्रियाऽऽश्रयाया कर्तृकर्मसंज्ञाभ्यां परम्परया क्रियाधारयोरेवाऽधिकरणसंज्ञाया उपपत्ते । क्रियाशब्देनाऽत्र फलस्याऽपि ग्रहणात् फलाऽऽश्रयकर्माश्रयस्य, व्यापाराश्रयकर्त्राश्रयस्य चाधिकरणसंज्ञाया सिद्धे । एवञ्च—कारकाणां मानान्वयव्युत्पत्ति साक्षात्, कारकत्वं व्याप्यकर्तृकर्माऽधिकरणत्वं सम्बन्धेतरसम्बन्धेनाऽन्वयित्वं परम्परयेति निष्कर्षः । 'चैत्र स्वर्योदनं भुङ्क्ते' इत्यत्र स्वर्गादेर्यद्यपि चैत्रकर्तृकत्वेन भुक्तिक्रियाजनकत्वेऽपि शाब्दबोधे शाब्दसिद्धिसम्बन्धेनैवाऽन्वयस्वीकारात् चैत्रकर्तृत्वस्य क्रियाजनकत्वेन विवक्षितत्वेऽपि स्वर्गादेर्यागसम्बन्धेनैव विवक्षितया क्रियाजनकत्वेनाऽविवक्षितया क्रियाया कारकत्वव्याप्यकर्तृत्वादिप्रयोजकसम्बन्धेतरस्वस्वामिभावसम्बन्धघटितपरम्परयाऽन्वयस्यैव सम्भवेन कारकत्वम्। 'ब्राह्मणस्य पुत्र पृच्छता' इत्यादौ च क्रियाजनकत्वाऽभावादेव न कारकत्वमित्युक्तम्, तादृशपरम्परयाऽनन्वयाच्च। 'चैत्र पचती'त्यादौ अभेदस्य सम्बन्धत्वाऽभावात्कर्तृत्वादिसम्बन्धेतरसम्बन्धाऽन्वितपरम्परयैवान्वय इति नाव्याप्तिसिद्धि । सुन्दरश्चैत्र पचतीत्यादावपि तथैव । एतेन—परम्परासम्बन्धेनाऽन्वयस्वीकारे प्रथमार्थेऽव्याप्तिवारणेऽपि राज्ञः पुरुष' इत्यादौ चैत्र स्वर्योदनं भुङ्क्ते' इत्यादौ च राजपदार्थस्वपदार्थयोः कारकत्वाऽव्याप्तिवारणाय 'सुन्दरश्चैत्र' इत्यादौ सुन्दरपदार्थेऽव्याप्तिवारणाय च—क्रियानिष्ठविशेष्यतानिरूपितकर्मत्वादिप्रकृतसम्बन्धघटितसम्बन्धाऽनवच्छिन्नप्रकारताऽऽश्रयत्व कारकत्वनिर्वचनं परास्तम्, निष्फलत्वात्, क्रियाजनकत्व तत्त्वमिति भाष्यलक्षणादेव सामञ्जस्यात्। किन्तु—क्रियानिष्ठविशेष्यतानिरूपितकर्मत्वादिप्रकृतेतरसम्बन्धघटितसम्बन्धाऽनवच्छिन्नप्रकारतानिरूपकत्वमिति कारकत्वमित्यर्थः

एकत्वावच्छिन्नचैत्राभिन्नकर्तृक भवनमिति बोध । आख्यातछद्वादिना कर्त्रादेराभिधानेऽपि प्रथमयाऽनुद्भूतकर्तृत्वादिशक्ति प्रतिपाद्यते इति तात्पर्यम् । कर्माख्याते तु चैत्रेण ग्रामो गम्यते इत्यत्र चैत्रकर्तृकव्यापार जन्य एकत्वावच्छिन्नग्रामाभिन्नकर्मनिष्ठः सयोग इति बोध । सम्बो धनप्रथमार्थस्यापि अनुवाद्यत्वेनोद्देश्यतया युष्मदर्थाभेदेन विधेयक्रिया

कारकविभक्तेर्लक्षण वाच्यमित्यलम् । भाष्ये व्यवहार इति—"सहयुक्ते" इति सूत्रे भाष्ये—अप्रधानग्रहणाऽभावे 'पुत्रेण सहागतो देवदत्त' इत्यादौ देवदत्तादि पदादपि तृतीयापत्तिं मनस्याधाङ्क्योपपदविभक्तिन्यायेन समाहितम्—"सहयुक्तेऽ प्रधानवचनमनर्थकम् । किं कारणम् ? उपपदविभक्ते कारकविभक्तिर्बलीय स्त्वात् । उपपदविभक्ते कारकविभक्तिर्बलीयसीति प्रथमा भविष्यती"ति हि तत्रोक्तम् । इति तात्पर्यमिति—"तिङ्समानाधिकरणे"ऽभिहिते इति वार्ति कयोस्तात्पर्यमित्यर्थ । कर्मनिष्ठा सयोग इति—चैत्रकर्तृकग्रामकर्मकव्यापारजन्या सयाग इत्येव शाब्दबोधाकार, कारकाणां भावनाऽन्वयव्युत्पत्तेः । कर्मत्वस्य ग्राम निष्ठत्वेऽनगते तत्समानाधिकरणफलस्याऽपि कर्मनिष्ठत्वप्रतीतिरार्षेति, तन्मूलकमे वोक्तं मूले 'कर्मनिष्ठ संयोग इति' । अत एव 'हरिं भजती त्यत्र हरिकर्मक भजन मितिबोध इत्युक्तं शेखरे इतिदिक् ।

सम्बोधनप्रथमार्थस्याऽप्यनुवाद्यत्वेनेति—अत्रायं सार —सम्बोधनं अभि मुखीभाव —प्रयोक्तृवचनार्थग्रहणे सादरीभवनम् । तद्गमकञ्च मुखपरावृत्त्यादि । तत्तत् सम्बोध्यस्य प्रवृत्तिर्निवृत्तिर्वा । तस्मात्सम्बोधनविभक्तिरनुवाद्यविषयैव, सम्बो ध्यताऽवच्छेदकरूपेण सम्बोध्यस्य सिद्धिं विना तस्याऽभिमुखीभावाऽसभवात् । अत एव 'राजन्युध्यस्वे'त्यस्य कुमाराऽवस्थायां, 'राजा भव युध्यस्वे'त्यस्य राजावस्थायां न प्रयोग । एवञ्च सम्बोधनविभक्तेरनुवाद्यविषयतयाऽनुवाद्यस्य च विधेय एवा ऽन्वयेन विधेयतायाश्च क्रियानिष्ठत्वेन तस्यामेव (विधेयभूतक्रियायामेव) सम्बोधन विभक्त्यन्तार्थस्याऽन्वय इति युक्तम् । सदुक्तं हरिणा—

"सिद्धस्याऽभिमुखीभावमात्रं सम्बोधनं विदु ।
साताऽभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते ॥" इति ।
"सम्बोधनं न वाक्यार्थ इति वृद्धेभ्य आगम" । इति च ।

यामन्वयात् क्रियाजनकत्वरूपकारकत्वम् । देवदत्त त्व गच्छेत्यादौ अभिमुखीभवद्देवदत्ताभिन्नयुष्मदर्थादेश्यप्रवर्त्तनादिविषयो गमनमिति बोध ।

एवञ्च क्रियासु विनियोगफलकोऽभिमुखीभाव सम्बोधनमिति फलितम् । अत्र 'सिद्धस्ये'त्यनेन तस्याऽनुवाद्यत्व, विनियुज्यते' इत्यनेन प्रवर्तनाविषयक्रियायां तस्याऽन्वय इति बोधितम् । तथा च सम्बोधनस्य सद्ब्याया इव प्रकृत्यर्थे यमा-
* द्यावाश्रयत्वसम्बन्धेनाऽन्वय । प्रकृत्यर्थस्य च स्वोद्देश्यकत्वसम्बन्धेन साक्षाद्विध्यर्थं प्रवर्तनायामेवाऽन्वय तद्द्वारैव तद्विषयीभूतक्रियायामन्वयाङ्गीकारात् । परम्परयाऽ-न्वयस्वीकारादेव नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयोऽव्युत्पन्न' इति व्युत्पत्तेरपि न विरोध । तादृशप्रवर्तनायाश्च विषयत्वसम्बन्धेन रक्षणादिक्रियायामन्वयः । एवञ्च 'राम मा पाही'त्यादौ 'अभिमुखीभवद्रामाद्युद्देश्यकप्रवर्तनाविषयो मत्कर्मक त्वत्कर्तृक रक्षणमि'तिबोध । 'अजानि देवदत्ते'त्यादावपि 'जानीही'त्यस्याऽध्याहारो वाक्यैकदेशन्यायाद्बोध्यः । तत्र ज्ञाने अजनस्य कर्मत्वात् देवदत्तस्योद्देश्यत्वात् 'अभिमुखीभवद्देवदत्तोद्देश्यकप्रवर्तनाविषया मत्कर्तृकप्राप्तकालिकगमनकर्मक ज्ञानमिति बोधे उभयो पदयो समानवाक्यस्थत्वान्निपातसिद्धि । 'नद्यास्तिष्ठति
† कूले' इत्याद्यनुरोधेन "आरब्धार्थं—सविशेषणं वाक्यम्" इति समर्थसूत्रस्थभाष्यो क्तलक्षणस्य साक्षात्परम्परासाधारण्यादाद्यार्थनिष्ठविषयतानिरूपितत्ववद्विषयतायो जकत्वमेकवाक्यत्वमित्यत्रैव तात्पर्यात् । अस्ति च देवदत्तपदस्य अजानीत्याख्यातार्थ अजननिष्ठविषयतानिरूपितज्ञाननिष्ठविषयतानिरूपितप्रवर्तनानिष्ठविषयतानिरूपितदेव-दत्तनिष्ठविषयतायोजकत्वमिति निपातसिद्धिः । अजानीत्यत्र प्राप्तकाले स्वोट् । वाक्यैकदेशन्यायेनाऽध्याहारे "एकतिङ् वाक्यम्" इति लक्षणस्याऽपि नाऽव्याप्ति । उद्देश्यविधेयभावो वाक्यार्थ । अभिमुखीभवनानुकूलस्य संबोधनविभक्त्यन्तशब्द-प्रयोगरूपव्यापारस्य—इतरनैरपेक्ष्येणैव प्रतीतेस्तत्र वाक्यार्थ इति "संबोधनं न
‡ वाक्यार्थ" इत्यस्य तात्पर्यम् । एतन्मूलक एव सम्बोधनविभक्त्यन्तार्थस्य कर्तृ-कारकत्वव्यवहारो वृद्धानाम्, तस्यैव युष्मच्छब्दार्थत्वेन विनियोज्यक्रियाकर्तृत्वात् । अत एव "तिङ् समानाधिकरणे" इति वार्तिकमते प्रथमासिद्धि सम्बोधने । वृद्धा-वैकन्यासे हि "प्रातिपदिकार्थेति सूत्रवत् "सम्बोधने"तिसूत्रस्याऽपि प्रत्याख्यानमेव । अत एव "सम्बोधने चे"तिसूत्र कमादिविशिष्टे प्रथमाऽभावे ज्ञापकमाश्रित्य मात्रग्रहणं प्रत्याख्यातम् । तेन हि सम्बोधनविषयेऽपि "प्रातिपदिकार्थं" इत्यनेन सिद्धि

अतएव

आश्रयोऽधिरुद्देश्य सम्बन्ध शक्तिरेव वा॥
यथायथ विभक्त्यर्थाः सुपा कर्मेति भाष्यत ॥

इत्याभयुक्तोक्तम्, "सुपा कर्मादयोऽप्यर्था सङ्ख्या चैव तथा तिङाम्"

सूचितेति तत्त्वबोधनादिनैव सिद्धिरुचिता। वार्तिकेनय सूत्रसत्त्वेऽपि 'सम्बोधनाधिये तिङ्समानाधिकरणेऽर्थं वर्तमानात्प्रथमे त्येव तदर्थस्योचित्याच्च। तस्मा त्कर्तृकारकत्व सम्बोधनस्येति पूर्वोक्त साध्वेव॥

यत्तु सम्बोधनस्य प्रकृत्यर्थविशेषणत्वे "भो ब्राह्मणा, त्व पचे'ति प्रयोग पत्तिरिति कश्चित्तन्न, शब्दशक्तिस्वाभाव्येन सम्बोधनविभक्तयन्तपदसमभिव्याहारे युष्मदस्तत्पदवाच्ययावत्परामर्शकत्वस्य व्युत्पत्तिसिद्धत्वेनैकवचनस्य तत्राऽसाधु त्वादित्यलम्। अत एव = सम्बोधनप्रथमायास्त्वाऽऽदि कारकत्वादेव।

आश्रय इत्त—प्रथमाया, कर्मद्वितीयाया, कर्तृकरणतृतीयाया, अधि करणसप्तम्याश्च क्रमेणाभयोऽर्थ, आदानरक्षण्या अपादिरर्थ, सम्प्रदानचतुर्थ्या उद्देश्यार्थ, शेषषष्ठ्या उपपदविभक्तीनाञ्च सम्बन्धोऽर्थं। अथवा (आश्रय इत्याऽपि प्रकृत्यैव लाभसम्भवात्) आश्रयत्वम् अन्वितत्वम्, उद्देश्यत्वम् इति शक्तिरेव = धर्म एव यथायथं यथास्व सुङ्विभक्त्यर्थं। अत्र सुपा कर्मेत्यादिक भाष्य प्रमाणमित्यर्थ। श्लोकार्धं भूषणसार समुद्धृत इति तत्रैव विस्तरो द्रष्टव्य।

सुपा कर्मादय इति—

सुपा कर्मादयोऽप्यर्था सङ्ख्या चैव तथा तिङाम्।
प्रसिद्धा नियमस्तत्र नियम प्रकृतेषु वा॥ इति।

पूर्ण श्लोकवार्तिक बहुवचनसंज्ञासूत्रे भाष्ये पठितम्। अत्र चार्थेन सहिता सङ्ख्याया समुच्चय—"सुपो सङ्ख्यायाश्चार्थ कर्मादयश्च। तथा तिङां सङ्ख्या त्रैशब्द्य कर्मादयश्चे'ति तद्भाष्यात्। तत्र = कर्मादिसङ्ख्यास्वर्थेषु।

नियम = कर्मादिवर्थयोग्यप्रातिपदिकाच्चेत् कर्मणि विभक्तिस्तदा द्वितीयैव। एव सङ्ख्यावदर्थयोग्यप्रातिपदिकाच्चेत् एकत्वे विभक्तिस्तदैकवचनमेवेत्यादिरूपोऽपि नियम। प्रकृतेषु = प्रकृतानुयायिपदस्य। नियम = "कर्मादिवर्थयोग्यप्रातिपदिकाच्चेत् द्वितीया तदा कर्मण्येव न करणादौ"। एव "सङ्ख्यावदर्थयोग्यप्रातिपदि

इति भाष्य च सङ्गच्छते । अनुक्तकर्त्रादिषु तृतीयादयो विभक्तय अनभिहिताधिकारे वासा विधानात् इत्यन्यत्र विस्तर ॥

ननु क्रियानिमित्तत्वं कारकत्वमिति स्वीकायमितिचेन्न । चैत्रस्य तण्डुल पचतीत्यत्र सम्बन्धिनि चैत्रादायतिव्याप्ते । अनुमत्यादिप्रकाशन द्वारा सम्प्रदानादेरिव तण्डुलादिद्वारा सम्बन्धिनोऽपि क्रियानिमित्तत्वात् । किन्तु क्रियान्वितविभक्तयर्थान्वितत्व क्रियानिर्वर्त्तकत्व वा कारकत्यम् । विशेष्यतया क्रिया सुप्तिङन्यतरविभक्तयर्थेऽन्वेति । स च विशेष्यतयैव चैत्रघटादौ । षष्ठयर्थस्य तण्डुलादिनामार्थान्वितत्या क्रियानन्वितत्वात् । अत एव षष्ठयर्थस्योपपदविभक्तयर्थस्य च न कारकत्व क्रियान्वयाभावादिति शाब्दिका । उपपदविभक्तीनामपि सम्बन्ध एवार्थ । चैत्रस्य पचतीत्यादावपि तण्डुलादिपश्चाद्ध्याहारेणैव बोध । षष्ठयर्थसम्बन्धस्य नामार्थेनैव क्रियाया कर्मत्वादिनैव साकाङ्क्षत्वेन सम्बन्धक्रियया निराकाङ्क्षत्वात् । यत्तु कारकान्तराप्रयोज्यत्वे सति काच्चेदेकवचन तदा एक-व एवे'त्यादिरूप प्रकृतार्थाऽपेक्षप्रत्ययनियम इत्यर्थ इति बहुवचनसंज्ञासूत्रे भाष्ये "तद्धितश्चासर्वेति"सूत्रे शब्दरत्ने च स्पष्टम् ।

सङ्गच्छत इति—सम्बोधनप्रथमार्थस्य कारकत्वाऽभावे "सुपा कर्मादयोऽया" इति भाष्यस्य आश्रयार्थप्रतिपादकोक्तकारिकायाश्च असङ्गति स्पष्टैव । यत्तु सारे द्वितीयातृतीयासप्तमीनामाश्रयोऽय इति तत्कारिकाया विवरणम्, तन्न्यूनम्, प्रथमाया परित्यागात्, "तिङ्समानाधिकरणे प्रथम"ति वार्त्तिकरीत्या प्रथमाया अपि उक्तकर्तृकर्मार्थकत्वेन द्वितीयाद्युक्तरीत्या आश्रयार्थकत्वलाभात्, कारिकाया प्रथमार्थाऽविवरणे न्यूनत्वापत्तेश्च । क्रियानिमित्तत्वमिति—निमित्तत्व जन्य जनकताऽवच्छेदकसाधारण प्रयोजकत्वरूपमित्याशयेनाऽय पूर्वपक्ष । 'निमित्तत्वम् जनकत्वरूपम्' इति स्वीकारे तु नाऽय स्यात् । अतिव्याप्तेरिति—तथा च चैत्रस्य तण्डुल पचतीत्यत्र चैत्रस्य कारकत्वातिप्रसङ्गे "अकथितञ्चे"ति कर्मत्वापत्तौ पर्यायेण द्वितीयाया आपत्ति । किन्तु क्रियान्वितेति—अस्य सत्यमनुपदमेव निरूपितम् । विशेष्यतया क्रियेति—क्रियानिष्ठविशेष्यतासम्बन्धेन शाब्दबुद्धित्वाऽवच्छिन्न प्रति विशेष्यतासम्बन्धेन सुप्तिङन्यतरविभक्तिजन्योपस्थिते कारणत्वस्याङ्गीकारादिति भाव । उपपदविभक्तीनामिति—शेषार्थकषष्ठयभावादस्यादिति भाव । तत्त्व,न

कारकचक्रप्रयोजकत्व कर्तृत्वमिति । तन्न । स्थाली पचति अग्निश्छिनत्ती त्यादौ स्थाल्यादे कारकचक्राप्रयोजकत्वात् कारकान्तरप्रयोज्यत्वाच्च तत्त्वं न स्यादित्यलम् । कर्मत्व च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृ

स्यादिति—वस्तुतस्तु "कारके" इति सूत्रस्थभाष्यात् "कारकचक्रप्रयोजकत्व कर्तृत्वम्' इत्यपि लक्षणान्तरमायाति । तत्र हि—"कथ पुनर्ज्ञायते कर्ता प्रधान मिति ? यत्सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवती"त्युक्तम् । तस्मात्— 'स्थाली पचतीत्यादौ प्रयोजकत्वस्याऽरोपान्निवाह' उद्देश्यत्वघटितकर्मत्वलक्षणे 'रथ ग्रामं गच्छती'त्यादावुद्देश्यत्वस्येवेतिदिक् ।

अवसरसङ्गत्या कर्मलक्षणमाह—कर्मत्वञ्चेति—अत्र कर्मत्व व्याकरणशास्त्र बोधितकर्मसंज्ञकत्वम् । तच्चाऽनेकसूत्रबोधितत्वादनेकम् । तत्र "कर्तुरीप्सित"—सूत्रबोधितं कर्मत्वमत्रपरिष्करोति—कर्मत्वञ्चेति ।

अत्राय सार.—आप्नोते सनन्तात् "मतिबुद्धि" रिति वर्तमाने कर्मणि क्त, तदन्तात्तमप् । कर्तुरिति "क्तस्य च वर्तमाने" इति कर्तरि षष्ठी । आप्धातो सम्बन्धोऽर्थ, सचोपस्थितत्वात् कर्तृपदार्थविशेषणीभूतव्यापारद्वारक —स्वनिष्ठ प्रधानव्यापारविशिष्टफलाश्रयत्वरूप । षै०—स्वप्रयोज्यत्व, स्वबोधकधात्वन्वय त्वोभयसम्बन्धेन । कर्तृपदञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापाराऽऽश्रयरूपस्वतन्त्र परम्, नतु कर्तृसंज्ञकपरम् । अत एव 'चैत्र सार्यादीयते' इत्यत्र "अपादाने चाहीयरुहो" इति ज्ञापकेन कर्तृसंज्ञां बाधित्वाऽपादानसंज्ञायां सत्यामपि स्वातन्त्र्य स्याऽक्षतत्वेन "कर्तुरि"त्यनेन चैनादेः कर्मसंज्ञायां कर्मणि लकारसिद्धिः । अत एव च 'शत्रूनगमयत्स्वर्गम्' इत्यादौ प्रयोज्यस्य कर्मत्वेऽपि तदीप्सिततमस्य स्वर्गादेः कर्मत्वसिद्धि, गमधात्वर्थप्रयुक्तस्वातन्त्र्यस्य सत्त्वात् । कर्तुरिति कर्तृषष्ठ्या आश्रय माश्रमर्थं, व्यापारस्य प्रकृतक्रियत्वात् । षष्ठ्यर्थं प्रकृत्यर्थंस्याऽभेदेनाऽन्वयो 'नीलघटो घ' इतिवत्, विधेयांशेऽधिकाऽनवगाहिज्ञानस्य सत्त्वेन 'घटो घ' इति वत् अभेदान्वयबाधस्याऽप्रसक्ते । विशिष्टाऽऽश्रयस्य वृत्तित्वसम्बन्धेन सनर्थेच्छाया मन्वय । क्तप्रत्ययार्थ उद्देश्यतावच्छेदकविषयतायाश्रयः । तदेकदेशविषयतायां निरूपि तत्वसम्बन्धेनेच्छाया अन्वय । आप्धात्वर्थसम्बन्धस्य च स्वप्रकारकत्वेनेच्छाया मन्वयः तथा च—प्रकृतधात्वर्थप्रधानीभूतव्यापाराभयाऽभिन्नाभयनिष्ठा स्वनिष्ठ

(प्रधान) व्यापारविशिष्टफलाश्रयत्वप्रकारिका येच्छा तन्निरूपितोद्देश्यताश्रय नियतताश्रय कर्मसज्ञक इत्यर्थ सम्पन्न वैशिष्टयञ्चोक्तमेव । अत्र प्रकृतत्व वाचक वाच्यत्वञ्चेति द्वयमपि कर्तृग्रहणसामर्थ्यलभ्यम् कारकाधिकारेणैव तल्लाभसम्भवात् । तत्फलन्तु क्रमेण 'माषेषु प्रसक्तमश्व मापनाशोमाऽभूदित्यन्यत्र मज्ञाती'त्यर्थस्थले, पुष्टयर्थं माषक्षेत्रे एवाश्वबन्धनस्थले च । मापेष्वश्व बध्नाती'त्यत्र मापाणां कर्मत्वाऽभाव । 'प्रयागात्काशीं गच्छती'त्यत्र प्रयागस्य कर्मत्वाऽभावो पि वाचकवाच्यत्वस्य फलम् । प्रयोज्यत्वञ्च तम ग्रहणलभ्यम् । प्राधान्याशोऽपि व्यापारे कर्तृग्रहणादेव लभ्य । एतद्द्वयोरपि फलन्तु—'अग्नेर्माणवक वारयती'त्यत्र माणवकेऽङ्गत्वाप्तिपरिहार, अन्यथा वारिघातूपस्थाप्यसयोगरूपफलाऽऽश्रयत्वात् अग्नावपि कर्मसज्ञाप्तौ "वारणार्थानामि"त्यस्य निरवकाशतयाऽपवादत्वलाभेन स्वीयोद्देश्यताऽवच्छेदकाऽवच्छिन्नाऽतिरिक्तत्वेन कर्मसज्ञाशास्त्रीयोद्देश्यताऽवच्छेदकाऽवच्छिन्ने सङ्कोचात् माणवकेऽपि पञ्चम्यापत्ते । 'काशीं गच्छति न प्रयागम्' इत्यादौ तादृगिच्छाविषयत्व प्रयागादावारोप्यैव कर्मत्वम् । अत एव 'ग्रयो ग्राम गच्छती'त्यादौ ग्रामस्य कर्मत्व स्वनिरूपितोद्देश्यतामारोप्यैव मञ्जूषायामुक्तम् । परमलघुमञ्जूषायामत्र योग्यताविशेषे लक्षणया समाधानन्तु प्राचामनुरोधेनैव, न तु स्वमतेन गौरवात् योग्यताया अननुगमाच्चेति सर्वमवदातम् ।

अत्र फलाऽऽश्रयता न येन केनाऽपि सम्बन्धेन ग्रहीतव्या 'कालिकसम्बन्धेन फलाऽऽश्रय पाषाण भवतु' इतीच्छोद्देश्यत्वे 'पाषाण पचती'त्यापत्ते । नाऽपि समवायेनैव, 'घटं नाशयति' 'घटमिच्छति' 'घट जानाति' इत्यादावव्याप्ते । नाऽपि कालिकातिरिक्तेनैव, 'जनकत्वसम्बन्धेन फलाऽऽश्रयो व्यापारोऽस्तु' इतीच्छायां 'व्यापार पचती'त्यापत्ते । नाऽपि कालिकाऽतिरिक्तवृत्तिनियामकसम्बन्धेनैव, विषयितासम्बन्धेन फलाऽऽश्रयो ज्ञानं जायताम्' इतीच्छामादाय 'ज्ञान पचतीत्यापत्तेः 'ज्ञाने घट' इति प्रतीत्या विषयितायास्तत्त्वात् इतिचेत्—फलताऽवच्छेदकसम्बन्धेन सेति गृह्यताम् । फलताऽवच्छेदकसम्बन्धस्य फलनिष्ठाऽऽधेयताऽवच्छेदकतया धात्वर्थताऽवच्छेदको य स एव । एव हि सर्वेषामेव धातूना फलविशिष्ट व्यापारे शक्तिः । यै०—स्वाऽनुकूलत्व, स्वनिष्ठयत्किञ्चित्सम्बन्धाऽवच्छिन्नाऽऽधेयतानिरूपिताऽधिकरणतावत्त्वप्रकारकेच्छासामानाधिकरण्योभयसम्बन्धेनेति ।

तथात्वमर्थफलाश्रयत्वेनोद्देश्यत्वम् । इदमेव कर्मलक्षणे ईप्सिततमत्वम् एवञ्च तत्तद्धातुस्थले फलनिष्ठाऽऽधेयताऽवच्छेदकतया तत्तत्सम्बन्धेन निवेश्य यथा—पचूधातो विक्लित्तिविशिष्टो व्यापारोऽर्थः । यै०—स्वानुकूलत्व-स्व निष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताऽधिकरणतावत्त्वप्रकारकेच्छासामाना धिकरण्याभयसम्बन्धेनेति । एव 'नाशयती'त्यादौ नाशविशिष्टो व्यापारो धात्वर्थः यै०—स्वाऽनुकूलत्व स्वनिष्ठप्रतियोगितासम्बन्धाऽवच्छिन्नधेयतानिरूपिताऽधिक रणतावत्त्वप्रकारकेच्छासामानाधिकरण्योभयसम्बन्धेनेति । एव जानातीत्या विषयता सम्बन्धस्य तत्त्वम् । एवमन्यत्राऽपि तात्पर्यम् । 'स्तोक पचती'त्यादौ फलताऽवच्छेदकतादात्म्याऽन्यतरसम्बन्धेन फलसम्बन्धिता निवेश्या । तथा च— स्वाश्रयकत्वाऽवच्छेदकत्व—स्वप्रयोज्यत्वञ्चेति सम्बन्धाभ्यां स्ववृत्ति (प्रधान) व्यापार विशिष्टफलनिष्ठफलताऽवच्छेदकतादात्म्याऽन्यतरसम्बन्धाऽवच्छिन्नप्रकारतानिरूपि विशेष्यताश्रयत्वप्रकारकत्वम्, अथवा तादृशफलनिष्ठप्रतियोगितानिरूपकफलताऽ वच्छेदकतादात्म्याऽन्यतरसम्बन्धनिरूपिताऽनुयोगितावत्त्वप्रकारकत्वम् स्वसमवेतत्वञ्चे त्युभयसम्बन्धेन स्वत्वनिरूपितोद्देश्यतात्वविषयताश्रय सङ्केतसम्बन्धेन कर्मपदवानिति सूत्राय सम्पद्यते । इच्छाया कर्तृसमवेतत्वविशेषणात् चैत्रस्य तयेच्छाया 'मैत्रः पचती'ति नापत्ति । तादात्म्यस्य वृत्तिनियामकतासाम समीक्ष्य फलाऽऽश्रयतायाः स्थाने फलसम्बन्धिता निवेशितश्चम् । एतदेव सर्व फलितार्थीकृत्य मूलकृताऽत्र परिष्कृतमिति द्रष्टव्यम् ।

'प्रकृतधात्वर्थप्रधानीभूतव्यापारेति—अत्र प्रकृतत्वविशेषणात् मापप्र प्रसक्तमश्च मापनाशो माऽभूदित्यन्यत्र वक्ष्यति' इत्यथक 'मापस्यश्च वक्ष्यता'मि वाक्ये मापाणां कर्मत्व न । व्यापारे प्राधान्यग्रहणाय 'अनन्तराक्षरोत्ता अग्नेर्माण धक यारयतीत्यादौ माणवकेऽव्याप्तिर्न । प्रकृतधात्वर्थफलेति—अत्र प्रकृतत्वविशेषणात् पुरुषस्य मापमक्षणाय मापस्तत्र एव यदाऽश्वबन्धन तदा 'मापेक्षश्च वक्ष्यती'त्यत्र मापाणा नाऽतिव्याप्ति, बन्धनप्रयाज्यगतविलाय संयोगरूप फलाऽऽश्रयत्वेऽपि गतविलाय संयोगस्य वक्ष्यमाणत्वाऽभावात् । अनेकस्य कर्मत्वानां मध्ये इदमेकमेव कर्मत्व न तु सर्वम्, 'वैकुण्ठमधिशेते' इत्यादावव्याप्तेरसत्वात् । तद् सदृश्यनयनाह—इदमेव कर्मलक्षण इति । ईप्सिततमत्वमिति—अनुपदमेव

गां पयो दोग्धीत्यादौ पयोवृत्तिर्यो विभागस्तदनुकूलो व्यापारो गोवृत्ति तदनुकूलश्च गोपवृत्ति । अत्र पयस कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः जन्य त्वनिवेशे तन्नःस्यात् । प्रयागात्काशीगन्तुतीत्यत्र प्रयागस्य कर्मत्वधार णाय प्रकृतधात्वर्थफलेति । न हि विभागः प्रकृतधात्वर्थः किंतु नान्तरी यकतया गमने उत्पद्यते प्रयागस्य फलाश्रयत्वनानुद्देश्यत्वाच्च ॥

ननु प्रकृतधात्वर्थस्य ग्रहणेनैवात्र वारणादुद्देश्यत्वनिवेश किमर्थं इति चेन्न । तस्यासाधारण प्रयोजन काशीं गच्छन्पथि मृत इति काश्या फलाश्रयत्वाभावेऽपि फलाश्रयत्वेनोद्देश्यत्वात्कर्मत्वम् । ननु काशीं गच्छति चैत्रे चैत्र काशीं गच्छति न प्रयागमिति प्रयोगानुपपत्ति , प्रयागस्य फला श्रयत्वनोद्देश्यत्वाभावादितिचेदुच्यते । कर्मलक्षणे ईप्सिततमपदस्य स्वा र्थविशिष्टयोग्यताविशेषे लक्षणा । तथा च प्रकृतधात्वर्थप्रधानीभूतव्यापार प्रयोक्तृप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यताविशेषशालित्व कर्मत्वम् ।

स्पष्टीकृतार्थम् । प्रयोज्यत्वनिवेश इति—जन्यत्वनिवेशाऽपेक्षया जन्यजन्यताऽव च्छेदकसाधारणरूपस्य प्रयोज्यत्वस्य निवेशे गौरवमङ्गीकृत्याऽपीत्यादि- 'फलमुख्य गौरव न दोषाये'ति न्यायादितिभाव । तन्न स्यात्—पयोनिष्ठविभागस्य गोप वृत्तिव्यापारप्रयोज्यत्वेऽपि गोपवृत्तिव्यापारजन्यत्वाऽभावादिति शेष । फलताऽव च्छेदकेति—पारयातम् । अनुद्देश्यत्वाच्चेति—प्रयागात्काशीं गच्छतो जनस्य काश्येव फलाश्रयत्वेनेच्छाविषयीभूता न तु प्रयाग , यद्यपि नान्तरीयकतया सोऽपि - विभागरूपफलाश्रय सम्पद्यते । परे तु या जनस्य पूर्वदेशत्याग एवोद्देश्य , उत्तर देशसयोग एवाऽनुषङ्गिकस्तत्रापि'विरक्तो गृहाद्वन गच्छती'त्यादौ विभागाश्रयस्य गृहस्य फले प्रकृतधात्वर्थत विशेषणमन्तरेणाऽपि नकर्मत्वाऽऽपत्तिः, अनुयोगित्वावि शिष्टसमवायस्यैव तत्र फलताऽवच्छेदकत्वेन गृहस्याऽनुयोगित्वविशिष्टसमवायेन विभागाश्रयत्वाऽभावात् । अत एव "अपादान-समभिव्याहारे विभागोऽपि धात्वर्थ" इति शेखरमते विभागस्य प्रकृतधात्वर्थफलत्वेऽपि दोषो नेत्याहु । योग्यताविशेषे लक्षणेति—परे तु नाऽस्योपयोग , काशीं गच्छति चैत्रे 'चैत्र काशीं गच्छति - न प्रयागम्' इत्यत्र प्रयागे उद्देश्यत्वस्याऽऽरोपादेव निर्वाहादिति निरूपित

तच्च प्रयागस्याप्यस्तीति कर्मत्व तस्य सुलभम्। एतेन कार्यान्तरं कुर्वति चैत्रे किं ग्राम गच्छति अथ वा ओदन पचतीति प्रश्ने न ग्राम गच्छति नौदनं पचतीत्यादिप्रयोगा व्याख्याता । यत्र तु ताडनादिना पराधीनतया विष भोजनादिक तत्र विषादि तादृशफलाश्रयत्वेनोद्देश्यमेव । अत एव "आतश्च विषमीप्सित यद्भक्षयति ताडनाद्" इति भाष्य सङ्गच्छते । एतेन कशा मिहत कारागार गच्छतीति व्याख्यातम् । कालत्रये काशीगमनशून्ये चैत्र इति वारणाय विशेष इति । काश्या फलाश्रयत्वेनोद्देश्यत्वयोग्यतास त्त्वेऽपि तद्विशेषाभावान्नकर्मत्वम् । तद्विशेषश्च व्यापारसमकालिकस्तटस्थ जनगम्यः । किञ्च ईदृगस्थले तद्विशेषवत्त्वेऽपि निषेध एवानुभवसिद्ध इति काशीं न गच्छतीति किमनुपपन्नम् । नन्वन्न भक्षयन्विष भुङ्क्ते ग्राम गच्छस्तृण स्पृशतीत्यादौ विषतृणयोरुद्देश्यत्वाभावात् कथ कर्मत्वमिति चेत् शृणु, तथायुक्तमिति लक्षणान्तरात् । प्रकृतधात्वर्थप्रधानीभूतव्यापार प्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वमनीप्सितकर्मत्वमिति तदर्थात् । प्रयागा

मित्याहु । अन्न भक्षयन्निति—परे तु अत्राऽपि अन्तरेणैव विषेऽपीच्छोद्देश्य त्वमस्त्येवेति पूर्वेणैव सिद्धम्, यत्राऽपि च भयादिना विष भुङ्क्ते तत्राऽपि विष भोजनाऽभाव ताडनादिप्रयोजकमपेक्ष्य विषभोजनस्यैवोद्देश्यत्वमिति पूर्वेणैव सिद्धम्, "आतश्च विषमीप्सितं यद्भक्षयति ताडनात्" इति भाष्यात् । तस्मात् इदं 'चौरान् पश्यति' इत्यस्य शेषरोक्तोदाहरणस्योपलक्षणम् । अत्र विषयेन्द्रियसम्बन्धाद् दृश्यमाना अपि चौरा न दर्शनोद्देश्या, अपि तु अनिष्टदर्शना एवेत्याहु ।

तथायुक्तमिति—तथायुक्तत्वञ्च प्रकृतधात्वर्थप्रधानव्यापारप्रयोज्यप्रकृतधात्वर्थ फलाऽऽश्रयत्वम् । अनीप्सितत्वञ्च द्वेष्योदासीनाऽन्यतरत्वम् । द्वेष्यत्वञ्च इच्छाविषयीभूताऽभावप्रतियोगित्वम् । उदासीनत्वञ्च—अदिदृक्षत्वे सति इच्छा विषयत्वाऽभाववत्त्वम् । 'चोरान् पश्यती'ति द्वेष्योदाहरणम् । ग्राम गच्छन् तृणं स्पृशतीति उदासीनोदाहरणम् । अनीप्सितपदाऽभावे कर्तृवृत्तिव्यापारवाचकधातु-वाच्यफलाश्रय इत्यर्थस्तथायुक्तपदेन बोधित स्यादिति अग्नेर्माणवकं दारयतीत्यादौ दारणादानामित्यस्याप्रवादत्वप्रसङ्गो माणवकेऽप्यासि । एवञ्च अनीप्सितपद तथा युक्तपदस्योक्तार्थकत्वे तात्पर्यग्राहकमित्याशयेति । तदाह—प्रकृतधात्वर्थेत्यादि ।

त्काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्वनिवारणाय प्रकृतधात्वर्थफलेति द्वेष्यो दासीनकर्मसमहार्थमिद लक्षणम् । दुहादीना व्यापारद्वयार्थकत्वपक्षे अकथितश्चेति व्यर्थम्, पूर्वेणैवेष्टसिद्धे । एकव्यापारबोधकत्वपक्षे तु सम्बन्धषष्ठीबाधनार्थं तत्पक्षे कर्मसम्बन्धित्वे सति अपादानादिविशेषा विवक्षितत्वमकथितकर्मत्वमिति तृतीयलक्षणेन गा पयो दोग्धीत्यादौ गामि त्यस्य कर्मत्वसिद्धिरित्यन्यत्र विस्तर ।

यत्तु तार्किका—कर्मत्व तु न करणव्यापारवत्त्व तद्धि करणज न्यव्यापारवत्त्वम् । दात्रेण धान्य लुनातीत्यादौ हस्तादिकरणजन्य व्यापारवति दात्रादावतिव्याप्ते । नापि क्रियाजन्यफलशालित्वं तत्

प्रयागस्य कर्मत्वबारणायेति—'अपादानसमभिव्याहारे विभागोऽपि धात्वर्थ' इति शेखरीत्या तु विभागस्य फलत्वेऽपि फलताऽवच्छेदकसम्बन्धेन तदाश्रयत्वाऽभावान्न प्रयागस्य कर्मत्वमिति द्रष्टव्यम् ।

प्रसङ्गादाह—दुहादीना व्यापारद्वयार्थकत्वपक्ष इत्यादि—अय भाव—'गां दोग्धि पय' इत्यादौ 'गौ पयस्त्यजति, देवदत्तो गवा पयस्त्याजयती'त्यादयर्थं स्याऽपि प्रतीत्या पयोनिष्ठविभागानुकूलगोनिष्ठव्यापारानुकूलव्यापारादिर्दुहाद्यर्थ इति पक्ष सम्पद्यते । अत्र फलद्वयस्योपादानात् "कर्तुरीप्सिततमम्" इत्येव गो पयस श्चाऽपि कर्मत्व सिद्धम् । किन्तु 'गा दोग्धि पय' इत्यादाववस्थाविशेषे निष्क्रिया-यामपि गवादेर्दोहनादिषु विनियोगात् गोनिष्ठव्यापारऽप्रतीतावपि दोहनादिविषये दुहादे प्रयोगदर्शनात् पयोनिष्ठविभागाऽनुकूलव्यापारादिरेव धात्वर्थ इत्यपि पक्षा न्तर निश्चीयते । तदा च अपादानत्वाद्यविवक्षायामन्यसूत्रेणाऽसिद्धकर्मत्वार्थम् "अकथितञ्चे"तिसूत्रमावश्यकमिति ।

सम्बन्धषष्ठीबाधनार्थमिति—अपादानत्वाद्यविवक्षायां प्रकृतसूत्राऽभावे सम्बन्धषष्ठी प्राप्नोति, तद्बाधनार्थमिदमावश्यकम् । गवादेः पय आदिना अन्वय विवक्षाया च कारकत्वाऽभावात् "अकथित"सूत्रस्याऽप्राप्त्या षष्ठीष्टैवेति शेखरे स्पष्टम् । कर्मत्वेन रूपेण विवक्षायामेवेदम्, अत एव बोधोऽपि कर्मत्वेनैवेत्यादयपि शेखरे विस्तरस्तदाह—अन्यत्र 'विस्तर इति ।

खण्डनाय तार्किकमतमनुवदति—यत्तु इत्यादि । करणजन्येति—

चैत्रश्चैत्र गच्छतीत्यापत्तौ । संयोगरूपफलस्योभयकर्मकर्तृनिष्ठत्वात् । नापि परसमवेतक्रियाजन्यफलशालित्वं तत्, गमिपत्योः पूर्वस्मिन्देशे त्यजेश्चोत्तरस्मिन्देशे कर्मत्वप्रसङ्गात्, नदी वर्धत इत्यादौ अवयवोपचयरूपवृद्धिक्रियाया तीरप्राप्तिरूपफलाश्रये तीरे कर्मत्वापत्तेश्चेति ।

अत्र मूम । धात्वर्थतावच्छेदकफलशालित्व - कर्मत्वम - ।

करणव्यापारजन्येत्यर्थ, एवमन्यत्र । चैत्रश्चैत्रमिति—क्रियाजन्यफलस्य संयोगात्मकस्य द्विष्ठत्वादिति भाव । वस्तुतस्तु नेयमापत्तिः, ग्रामस्येव चैत्रस्याऽपि पक्षाऽऽश्रयत्वेऽपि परत्वात्तदीयकर्तृसंशया कर्मतायाः बाधात्, द्वितीयोत्पत्तौ संशया एव नियामकत्वात् । परसमवेतेति—परत्वञ्च द्वितीयया स्वमर्कृत्यर्थाऽपेक्षया बोध्यते इतिशेषः । अत्र परत्वस्य परसमवेतरस्य च द्वितीयावाच्यस्येष्टान्वयलाभायानेकत्र कार्यकारणभावाभ्युपगमे गौरवान्तरापत्तिरपि द्रष्टव्या । तथाहि द्वितीयाप्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वाऽवच्छिन्नम्प्रति द्वितीयार्थं परत्वापत्तिरिति कारणम् इति, द्वितीयार्थपरसमवेतत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वाऽवच्छिन्नम्प्रति क्रियात्वाऽवच्छिन्नविशेष्यतासम्बन्धेन धातुजन्योपस्थितिरिति कारणमिति च कार्यकारणभावान्तरकल्पनीय स्यात् । गमिपत्योः पूर्वस्मिन्निति—गमिरत्योर्व्यापारेणोत्तरदेशसंयोगस्येव पूर्वदेशविभागस्याऽपि जन्यत्वात् विभागाभये पूर्वदेशे लक्षणसमन्वयात्कर्मत्वाऽऽपत्तिरिति भाव । त्यजेश्चोत्तरस्मिन्निति—त्यजधात्वर्थव्यापारेण विभागाऽनुकूलेन पूर्वदेशीय विभागस्येवोत्तरदेशीयसंयोगस्याऽपि जन्यत्वादिति भाव । नदी वर्धत इति—अत्र तीरप्राप्त्यनुकूलोऽवयवोपचयस्यो यापारो वृधधात्वर्थ इति भाव ।

स्वसिद्धान्तमाह—अत्र मूम इत्यादिना । धात्वर्थताऽवच्छेदकेति—धातुनिष्ठशक्तिरूपकार्यनिष्ठविशेष्यतायाऽवच्छेदकेत्यर्थ । तथा च गमिपत्या संयोगानुकूलव्यापारे शक्तिसत्त्वेन तादृशशक्तिनिरूपकार्थीभूतव्यापारनिष्ठविशेष्यतानिरूपिताऽवच्छेदकतायाः संयोग एव सत्त्वेन संयोगाभयस्योत्तरदेशस्यैव कर्मत्वम्, विभागस्य तु नान्तरीयकत्वेन संयोगानुकूलव्यापारजन्यत्वेऽपि तत्राश्रयत्वाभावात् प्रकृतधात्वर्थताऽवच्छेदकत्वाऽभावेन न तदाश्रयस्य पूर्वदेशस्य कर्मत्वाऽऽपत्तिः । एवं त्यजधातोरपि विभागानुकूलव्यापार एव शक्तिसत्त्वेन संयोगस्य नान्तरीयकत्वेऽपि

तादृशफल च गमेस्सयोगः त्यजेर्विभाग पतेरधोदेशसयोग । अधोदेशरूप कर्म्मणो धात्वर्थनिविष्टत्वादकर्मकत्वे तु पर्ण वृक्षाद्भूमौ पततीति। सयोग मात्रफलपक्षे वृक्षाद्भूमि पततीति । ननु चतुर्थलक्षणेऽपि चैत्रश्चैत्र गच्छतीत्यापत्तिः, तत्र हि धात्वर्थावच्छेदकफल सयोग इति चेन्न । लक्षणे व्यापारानधिकरणत्वे सतीति विशेषणदानादित्याहु तन्न । काशीं गच्छन् पथि मृत इत्यादौ काशीं गच्छति न प्रयागमित्यादौ प्रयागस्य, ग्राम न गच्छतीत्यादौ ग्रामस्य तादृशफलशालित्वाभावात् एतस्य लक्षण स्याप्रसिद्ध्याप्ते । ननु वृक्ष त्यजति पर्ण इत्यत्र वृक्षस्य विभागरूप फलाश्रयत्वेनापादानत्वमस्त्विति चेन्न । अत्र हि विभाग प्रकृतधात्वर्थ । यत्र च विभागो न प्रकृतधात्वर्थस्तद्विभागाश्रयस्यैवापादानत्वम्, यथा वृक्षात्पततीत्यादौ । यत्र च प्रकृतधात्वर्थो विभागस्तत्रोभयप्राप्तौ अपादान-

---

नान्तरीयकत्वेऽपि तदंशे शक्त्यभावेन संयोगस्य प्रकृतधात्वर्थताऽवच्छेदकत्वाऽभावेन न तदाश्रयस्योत्तरदेशस्य कर्मत्वापत्तिरिति तात्पर्यम् । अत्राऽपि इष्टान्वयलाभाय—'द्वितीयार्थधात्वर्थताऽवच्छेदकत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्द-बुद्धित्वाऽवच्छिन्नम्प्रति धातुजन्यफलोपस्थिति कारणम्' इति कार्यकारणभाव कल्पनीय स्यादितिद्रष्टव्यम् । धात्वर्थनिविष्टत्वादकर्मकत्वेति—तदुक्तम्—"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् । प्रसिद्धेरविवक्षात कर्मणोऽकर्मिका क्रिया" इति । भाष्येऽपि "सुप आत्मन" इति सूत्रे—"अभिहित तत्कर्मान्तर्भूत धात्वर्थ सम्पन्न, न चेदानीमन्यत्कर्माऽस्ति येन सकर्मक स्यादि"त्युक्तम् । एवञ्च अकर्मकत्वम्—'पृथगुपस्थितैतच्छास्त्रविहितकर्मसजकाऽनन्वय्यर्थकत्वम्' इति भाव । भूमिं पततीति—अत एव पतिशब्दयोगे "द्वितीयाभिताऽतीतपतिते"त्यादिना समासविधान सगच्छते । पतधातोरकर्मकत्वे तु मूलं मृग्यमेव । चतुर्थलक्षणेति—करणजन्यव्यापारवत्त्व कर्मत्वमिति प्रथमलक्षणम् । क्रियाजन्यफलशालित्व तत्त्वमिति द्वितीयलक्षणम् । परसमवेतक्रियाजन्यफलशालित्व तदिति तृतीयलक्षणम् । धात्वर्थताऽवच्छेदकफलशालित्व तदिति चतुर्थलक्षणम् ।

विभागरूपफलाश्रयत्वेनेति—विभागाश्रयत्वमपादानत्वमिति लक्षणाऽभिप्रायेणेदम, प्रकृतधात्ववाच्यविभागाश्रयत्वमितिलक्षणाऽभिप्रायेण तु समाधानम् ।

मुच्चराणि साधयते इति भाष्ययुक्ते कर्मत्वम् । अनुक्ते कर्मणि षष्ठीद्वितीये भारतस्य श्रवणं भारतं शृणोतीति यथा । सकर्मकत्वं च फलव्यधिकरण व्यापारवाचकत्वम् । फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । अथ देवदत्तो भवति उत्पद्यत इत्यर्थः । अत्रोत्पत्तिरूप फलं बहिर्निसरण च व्यापार देवदत्तनिष्ठ एव । व्यापारमात्रवाचकत्व वाऽकर्मकत्वम् अस्ति भवति विद्यते वर्तत इत्यादिधातुषु फलस्य सर्वैदुविज्ञेयत्वात् । सत्ता हि स्थितिरूपो व्यापारविशेष । देवदत्तोऽस्तीत्यादौ देवदत्तकर्तृका सत्ते त्येव बोधाच्च । फलव्यापारयोर्धातुवाचक इति तु बाहुल्याभिप्रायेणेति दिक् । स्वनिष्ठव्यापाराव्यवधानेनफलनिष्पादकत्व करणत्वम् । इदमेव साधकतमत्वम् ।

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करण तत्तदा स्मृतम् ॥

इति हर्युक्तेः । क्रियाया इत्यस्य फलात्मिकाया इत्यर्थः । रामेण बाणेन हतो वालीत्यादौ धनुराकर्षणादेर्व्यापारस्य बाणव्यापारात्पूर्वमपि कर्तरि सत्त्वाद्रामाभिन्नकर्तृनिष्ठव्यापारप्रयोज्यो बाणनिष्ठो व्यापारस्तज्जन्य यस्मा णवियोगरूप फल तदाश्रयो वालीतिबोधाच्च । रामो बाणेन हन्तीत्यादौ कर्तृप्रत्यये बाणव्यापारजन्यो यो वालिनिष्ठ प्राणवियोगस्तदनुकूलो राम

अनुक्ते कर्मणीति—अनभिहितविकारादितिभाव । प्रसङ्गादाह—सकर्मकत्व श्चेति । वस्तुतस्तु शब्दशास्त्रीयकर्मसज्ञकाऽर्थान्वय्यर्थकत्व सकर्मकत्वम्, तदन्य त्वयकत्वमकर्मकत्वमिति निरूपितम्—तदाह द्विगिति ।

अवसर आह—स्वनिष्ठेति—यस्य करणत्व चिकीर्षितं तत् स्वम् । यथा 'रामेण बाणेन हतो वाली'त्यादौ स्वनिष्ठव्यापाराऽव्यवधानेन वालिप्राणवियोग रूपफलनिष्पादकत्व बाणस्येति लक्षणसमन्वय । विवक्ष्यत इति—एतेन विव क्षैव सज्ञाया प्रयोजिकेति लभ्यते । अत एव 'स्थाल्या पचति' 'स्थाल्यां पचती'त्यु भयथा प्रयोग । प्रकृतकारिकायां क्रियापदेन फलस्य ग्रहणं न व्यापारस्येत्यत्र बीज दर्शयति—रामेणेत्यादि—करण बाणादिस्वरतोऽनन्तरं कर्तृव्यापारस्य निष्पत्ति

कर्तृको व्यापार इति बोध'। अर्थाद्रामव्यापारप्रयोज्यो बाणव्यापार इति पार्ष्णिको बोध । कर्त्रादिपञ्चकारकाणा करणत्ववारणाय व्यापारा व्यवधानेनेति दिक् ।

क्रियामात्रक्रमसम्बन्धाय क्रियायामुद्देश्य यत् कारक तत्त्व सम्प्रदानत्वम् । यथा ब्राह्मणाय गा ददातीत्यादौ दानक्रियाकर्मीभूत-

---

र्नास्ति, किन्तु फलस्यैव निष्पत्तिरस्तीतिभाव । बोधाच्चेति—मानसेत्यादि । शाब्दे तु कर्तृव्यापारस्य प्रयोज्यत्वसम्बन्धेन प्राणवियोगरूप उक्त एवाऽन्वय, समानशब्दोपात्तत्वप्रत्यासत्त्या फलव्यापारयोस्तथाऽन्वयस्यैव कल्पनत्वात्, रामाऽभिन्न करणवृत्तिव्यापारजन्यश्च य प्राणवियोगस्तदाश्रयो बाली' इतिबोधस्यैव शाब्द-त्वात् । तदेतद्ध्वनयन्वक्तयति—अर्थाद्रामव्यापारप्रयोज्यो बाणव्यापार इति पार्ष्णिको बोध इति । एतेन तुल्यन्यायादनुपदोक्तकर्मकृदतस्यलेऽपि राम व्यापारप्रयोज्यत्वस्य बाणव्यापारे पार्ष्णिकत्वमेव युक्तमिति ध्वनितम् । कर्त्रादि-पञ्चेति—सर्वेषामेव कारकाणां फलनिष्पादकत्वस्य तुल्यत्वादिति भाव । व्यापाराऽ व्यवधानेनेति—इदञ्च प्रकर्षवाचकतमबग्रहणमहिमलभ्यम् । तथाहि—साधक तममितिसूत्रे तमबर्थं प्रकर्ष, सचाऽव्यवधानेन फलजनकव्यापारवत्ता । प्रकर्षश्च कारकाऽन्तराऽपेक्ष एव नतु करणान्तराऽपेक्षोऽपि, कारकसामान्यवाचिसाधक शब्दादुत्पन्नेन तमबा करणेतरकारकाऽवधिकप्रकर्षस्यैव द्योतनात् । तेन 'देवदत्तो रथेन दीपिकया राजमार्गेण व्रजतीतियुगपदनेककरणसमावेश सिद्धो भवति, अन्यथा करणान्तरापेक्षस्याऽपि प्रकर्षस्य ग्रहणे तु युगपदेकस्यैव कस्यचित्करणत्व स्यादेकस्यैव कस्यचित्प्रकृष्टत्वादिति बोध्यम्, तदाह—दिगिति ।

अवसर आह—क्रियामात्रेत्यादि । अत्र मात्रशब्दः साकल्यवाचक, "मात्र कात्स्न्येंऽवधारणे' इति कोषात् । एवञ्च सकलक्रियाकर्मसम्बन्धायेत्यार्थम् । एतेन अन्वर्थसंज्ञावला'दानस्य कर्मणा यमभिप्रैति स सम्प्रदानस'इत्यर्थं वदन्त प्राचीना कटाक्षिता, संज्ञाया अन्वर्थत्वस्य भाष्यरीत्या प्रत्याख्यास्यमानत्वात्, सूत्रे कर्मणेतिसामान्यकर्मणो निर्देशाच्च तेन मैत्राय वार्ता कथयती'ति । क्रियाम अकर्मसम्बन्धाय क्रियायामुद्देश्य यत्कारक तत्सम्प्रदानम् । तत्त्वमिति—अय भाव —"कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रे अभिप्रैति सम्बन्ध-प्रकारकेच्छावाचक, अभिप्रैति = ईप्सति, सम्बन्धुमिच्छति इत्यर्थ इति यावत् ।

गोसम्बन्धाय ब्राह्मणो दानक्रियोद्देश्य गोब्राह्मणयो स्वस्वामिभाय सम्बन्ध । चैत्रो मैत्राय वार्ता कथयतीत्यत्र मैत्रवार्तयाज्ञेयत्वात्माव

कर्मणेति सहयुक्ततृतीयार्थं प्रतियोगित्वम्, यमिति कर्मद्वितीयार्थो विशेष्यतात्मक विषयताश्रय । अभिप्रैतीत्यनेन च अभिप्रैतिकर्तुराक्षेप । तथा च कर्मप्रतियोगिक सम्बन्धप्रकारककर्तृवृत्तीच्छानिरूपितविशेष्यतात्मकविषयताश्रयो य स सम्प्रदान मिति, कर्मप्रतियोगिकसम्बन्धप्रकारिका यद्विशेष्यिकेच्छा स सम्प्रदानमिति वा सूत्रार्थ । यथा 'विप्राय गा ददाती'त्यत्र कर्मीभूतगोप्रतियोगिकस्वामिभावसम्बन्ध प्रकारिका दानकर्तृवृत्ति 'विप्रो गोप्रतियोगिकस्वस्वामिभावसम्बन्धवान् मत्त' इतीच्छा, तद्विशेष्यो विप्र इति स सम्प्रदानं भवतीतिसमन्वय । एवमन्यत्र । एतेन सूत्रे कर्मणेति करणतृतीयान्तम्, कर्मण करणत्वञ्च सम्बन्धक्रियाऽपेक्षम् इति व्याचक्षाणा, करणस्य च व्यापारवत्त्वनियमात् कर्मत्वप्रयोजकफलस्यैव कर्म वृत्तिव्यापारत्वकल्पनात् तादृशफलस्य धात्वर्थताऽवच्छेदकस्यैव सम्भवात् 'चैत्रो ग्राम गच्छती'त्यत्र ग्रामजन्यसुखे ग्रामरूपकर्मवृत्तिसंयोगरूपव्यापारजन्यत्वस्याऽ सत्त्वात् ग्रामरूपकर्मजन्यसुखादिरूपफलाश्रयत्वेनोद्देश्ये कर्तरि नाऽतिप्रसङ्ग इति च तादृशव्याख्यानस्य फले ब्रुवाणा भूषणसारतद्दर्पणकारप्रभृतयः परास्ता, य स प्रद्योतेनैव भाष्ये अभिप्रैतिकर्तुं सम्प्रदानत्वस्य वारणादित्यलम् । उद्देश्यम = इच्छाविशेष्यम् । ब्राह्मणाय गा ददातीति—अत्र दानं स्वस्वत्वनिवृत्तिसमानाधि करणपरस्वत्वोत्पत्त्यनुकूलो व्यापारः । उपेक्षायामतिव्याप्तिवारणाय परेति । स्वस्वत्व निवृत्तिं विना परस्वत्वोत्पत्तेरयोगात्साऽपि धात्वर्थः, इद स्वरूपपरिचायकमेव । प्रतिग्रह एव स्वत्वजनक इति मते तु स्वस्वत्वध्वससमानाधिकरणपरस्वत्वोत्पत्तीच्छा योधानुकूलो व्यापारो दानम् । तदुत्पत्तीच्छामात्रं तु न धात्वर्थः, तदिच्छाबाधाऽ नुकूलकायिकव्यापारविशेषकाल एव ददातीति प्रयोगात् । वस्तुतस्तु दानमेव स्वत्वजनकम्, प्रतिग्रहस्तु फलाऽतिशयार्थो न स्वत्वजनको दानेनाऽन्यथासिद्धत्वात् । अस्वीकारस्तु तदुत्पत्तिप्रतिबन्धक, तस्मिन्सति दानेऽपि न तदुत्पत्ति । अत एव देशान्तरस्थब्राह्मणोद्देशेन द्रव्यदाने तस्य मरणे तत्पुत्राणां तस्य द्रव्यस्य पितृदाय त्वेन ग्रहणमुक्तं निबन्धेष्वित्याहुः । सम्प्रदानचतुर्थ्यर्थताऽवच्छेदको सम्बन्धाद्—गोब्राह्मणयोरित्यादि । एवमन्यत्राऽप्यूह्यम् ।

सम्बन्धश्च । यत्तु वृत्तिकार—सम्यक्प्रदीयते यस्मै तत्सम्प्रदा नमित्यन्वर्थमज्ञेयम् । यथा च गोनिष्ठस्वत्वनिवृत्तिसमानाधिकरण परस्वत्वोत्पत्त्यनुकूलव्यापारस्फलकिये द्देश्यस्य ब्राह्मणादेरेव सम्प्रदानत्वम्। पुनर्ग्रहणाय रजकस्य वस्त्रदाने रजकस्य वस्त्र ददातीति सम्बन्धसामान्ये षष्ठ्येवेत्याहु । तन्न । खण्डिकोपाध्याय शिष्याय चपेटा ददातीति भाष्यविरोधात् । "कर्मणा यमभिप्रैती" तिसूत्रव्याख्यावसरे भाष्यकृताऽन्वर्थसज्ञाया अस्वीकाराच्च । अत एव "तदाचदत्तासुरेन्द्राय स च युक्त करोतु यत्" इति समशतीश्लोक सङ्गच्छते । तस्माद्रजकाय वस्त्र

अन्वर्थसञ्ज्ञेयमिति—महासञ्ज्ञात्वादितिभाव । खण्डिकोपाध्याय'—अथर्ववेदाध्यापक, अथर्ववेदाध्यायिनां हि खण्डिकेति सञ्ज्ञेति केचित् । खण्डिका = खलीतिभाषायाम्, तत्सम्बन्धी उपाध्यायो बालशिक्षक इत्यर्थ इत्यन्ये । चपेटाम् = प्रसृतकरतलम् । इति भाष्यविरोधादिति—"वृद्धिरादैच्" सूत्रे भाष्य मिदम्—"कथ पुनर्ज्ञायते भेदका उदात्तादय इति ? एव हि दृश्यते लोके य उदात्त कर्तुमेऽनुदात्त करोति, खण्डिकोपाध्यायस्तस्मै चपेटां ददाति—'अन्यत्व करोषी'ति' इति ।

अत्र दान सयोगविशेषाऽनुकूलो व्यापारो न तु स्वस्वत्वनिवृत्तिसमानाधिकरण-परस्वत्वोत्पत्त्यनुकूलो व्यापार । तथा च सम्प्रदानसज्ञाया अन्वर्थत्वे भाष्यविरोध स्पष्ट एव । भाष्यकृता अन्वर्थसञ्ज्ञाया अस्वीकाराच्चेति—अत एव प्रकृत-सूत्रे भाष्ये—"क्रियाग्रहणमपि कर्तव्यम् । इहाऽपि यथा स्यात्—श्राद्धाय निगृह्यते, युद्धाय सन्नह्यते, पत्ये शेते इति । तत्तर्हि वक्तव्यम् ? न वक्तव्यम् । कथम् ? क्रिया हि नाम लोके कर्मेत्युपचरन्ति—'का क्रिया करिष्यसि ?' 'कि कर्म करि-ष्यसी'ति" इत्युक्तम् । एवञ्च बहुलक्ष्यसत्काराऽनुरोधेनाऽत्र कर्मक्रियामयगति-र्भवतीत्याशय । सम्प्रदानमिति महासज्ञाया अन्वर्थत्वे तु दाधात्वर्थनिरूपितकर्म मानग्रहणे भाष्योक्तप्रयोगाऽसिद्धि, भाष्योक्तव्याख्यानाऽसङ्गतिश्च स्फुटैवेति नाम महासंज्ञाया अन्वयत्वम्, महासज्ञा तु प्राचामनुरोधादेवेति बोध्यम् । एव हि यदा—ग्रामसत्कारार्थं—'ग्रामोऽजासम्बन्धवान् जायतामि'तीच्छया हि अजानयन, नीधात्वर्थश्च संयोगानुकूलव्यापारमात्र, फलताऽवच्छेदकसम्बन्धोऽजामात्रनिष्ठस्तदा

ददातीत्यादि भवत्येव। अत्राधीनीकरणेऽर्थे ददाति। चपेटां ददाती त्यत्र न्यसनेऽर्थे इति। सम्प्रदानचतुर्थ्यर्थो उद्देश्य'। तथा च ब्राह्मणोद्देश्यक गोकर्मक 'दानमिति बोधो मैत्रोद्देश्यक वार्ताकर्मक कथनमिति च। अकर्मकक्रियोद्देश्यत्वं सम्प्रदानत्वमिति लक्षणान्तरम्। यथा पत्ये

'अजां ग्रामाय नयतीति' भवत्येव। यदा तु 'अजा ग्रामसम्बन्धा भवतु' इतीच्छयैव हि अजानयन, तत्र ग्रामस्योद्देश्यत्वाऽभावान्न सम्प्रदानत्वमित्यपि बाध्यम्।

अत्राधीनीकरणेऽर्थ इति—रजकाय वस्त्रं ददातीत्यत्र अधीनीकरणं दाना त्वर्थ। तच्च—प्रक्षालनेच्छाबोधानुकूलस्थित्यनुकूलो व्यापार। तत्र 'रजको वस्त्र प्रतियोगिकप्रक्षाल्यप्रक्षालकभावसम्बन्धवान् जायताम्' इतीच्छोद्देश्यत्वे रजकस्य सम्प्रदानत्वम्। अधीनीकरणक्रियाया सम्बन्धसामान्यविवक्षायां तु षष्ठीति तत्त्वम्। न्यसनेऽथ इति—यसन प्रकृते कपोलानुयोगिकसंयोगानुकूलव्यापार।

सम्प्रदानचतुर्थ्यर्थं चद्देश्य इति—अत्र शेखरे—"सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यर्थ, स एवोद्देश्य इत्युच्यते, क्रियाकारकभाव सम्बन्धश्च तदर्थ। विप्रसम्प्रदानक दानम् (विप्राऽभिन्नसम्प्रदानत्वशक्तिमद्विशिष्ट क्रियाकारकभाव सम्बन्धेन दानम्, यद्वा विप्राऽभिन्नसम्प्रदानत्वशक्तिमन्निष्ठक्रियाकारकभाव सम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छालि दानम्) इति बोध" इत्युक्तम्। ब्राह्मणोद्देश्यकमिति—क्रियाकारकभावसम्बन्धेन ब्राह्मणाऽभिन्नसम्प्रदानत्व शक्तिमद्विशिष्ट दानमिति बोध इत्यर्थ। एवमन्यत्राऽपि।

ननु 'कर्मणा इत्युक्तावकर्मकक्रियोद्देश्यस्य सम्प्रदानत्वं न स्यादत आह—अकर्मकक्रियोद्देश्यत्वमित्यादि—अकर्मकक्रियाद्देश्यत्वञ्च—अकर्मकक्रियामति योगिकसम्बन्धप्रकारकेच्छाविशेष्यत्वम्। यथा 'पत्ये शेते' इत्यत्र शयनप्रतियोगिक-स्वप्रयोज्यसंयोगवत्त्वात्मकसम्बन्धप्रकारिका नायिकावृत्ति 'पतिः मदीयशयनप्रति योगिकस्वप्रयोज्यसंयोगवत्त्वात्मकसम्बन्धवान् भवतु' इतीच्छा, तद्विशेष्यत्वात् पति सम्प्रदानं भवतीति। अत्र शयनपत्यो संयोगद्वारक स्वप्रयोज्यसंयोगवत्त्व (संयोगप्रयोजकसंयोगकर्तृभाव) सम्बन्ध। 'युद्धाय संनह्यते' इत्यत्र संनहन प्रतियोगिकस्वपूर्वकनिश्चयविषयत्वसम्बन्धप्रकारिका संनहनकर्तृवृत्ति 'युद्धं मदीय-संनहन (कवचादिबन्धन) पूर्वकनिश्चयविषयत्वसम्बन्धि भवतु' इतीच्छा, तद्वि

शेते इत्यादि । पत्युद्देश्यक नायिकाकर्तृक शयनमित्ति बोध । ननु दाना-

---

ज्येप्यत्वात् युद्धस्य सम्प्रदानत्वम् 'युद्धविषय संनद्धनपूर्वक निश्चय । करोतीत्यर्थ' इति कैयटोक्ते । 'आदाय निगर्हते' इत्यत्र च निगर्हणप्रतियोगिकस्वसमानाधिकरण नास्तिकत्वप्रयोज्यकुत्साविषयत्वसम्बन्धप्रकारिका निगर्हणकर्तृवृत्ति 'आद्ध मदीय निगर्हणसहचरितनास्तिकत्वप्रयोज्यकुत्साविषयत्वसम्बन्धवद्भवतु' इतीच्छा । तद्वि शेष्यत्वात् ,आद्धस्य ,सम्प्रदानत्वम् 'श्राद्धं निन्दति, नास्तिकत्वादित्यर्थ' इति कैयटोक्ते । अत्र सर्वत्र अकर्मको धातु , सकर्मकत्वे कर्मसङ्ख्या परत्वात् बाधापत्ते । कैयटस्य सकर्मकयोग्यार्थप्रदर्शनन्तु भाषायाऽभिप्रायेण । 'निगर्हते' इत्यत्राऽपि गर्हधातु कथञ्चिदकर्मक एव द्रष्टव्य । पतिसम्प्रदानक शयनमित्यादिबोध ।

लक्षणान्तरमिति—कर्मणा यमभिप्रैतीति सूत्रस्य 'क्रियामहण कर्तव्यम्' इति वार्तिकमत्र मूलम् । वार्तिकप्रत्याख्यानपरकभाष्यरीत्या तु पूर्वलक्षणेनैव (कर्मप्रतियोगिकसम्बन्धप्रकारकेच्छाविशेष्यत्व सम्प्रदानत्वमित्यनेन) कर्मशब्देन कर्मक्रियोभयग्रहणात्सिद्धिरिति लक्षणान्तरमिद नावश्यकम् । तथाहि प्रकृतसूत्रे भाष्ये—"क्रियाग्रहणमपि कर्तव्यम् , इहाऽपि यथा स्यात्—आदाय निगर्हते, युद्धाय सनह्यते, पत्ये शेते इति । तत्तर्हि वक्तव्यम् ? न वक्तव्यम् । कथ ? क्रिया हि नाम लोके कर्मेत्युपाचरन्ति—'का क्रिया करिष्यसि ?' 'किं कर्म करिष्यसीति ? एवमपि कर्तव्यम् । कृत्रिमाऽकृत्रिमयो । कृत्रिमे सम्प्रत्ययो भवति । क्रियाऽपि कृत्रिम कम । न सिध्यति, 'कर्तुरीप्सिततमं कर्म'च्युच्यते, कर्थं च नाम क्रियया क्रियेप्सिततमा स्यात् ? क्रियाऽपि क्रिययेप्सिततमा भवति । कया क्रियया ? सन्द-र्शनक्रियया वा, प्रार्थयतिक्रियया वाऽध्यवस्यतिक्रियया वा । इह य एष मनुष्य प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत्किञ्चिदर्थं सपश्यति, सदृष्टे प्रार्थना, प्रार्थना यामध्यवसाय , अध्यवसाय आरम्भ , आरम्भे निवृत्ति , निवृत्तौ फलाऽवाप्ति । एव क्रियाऽपि कृत्रिमं कर्म इत्युक्तम् । एतद्भाष्यरीत्या तु सन्दर्शनादीनामन्य भिचारेण प्रतीयमानत्वात् प्रविश पिण्डीमित्यादाविव प्रतीयमानसन्दर्शनादि क्रियाऽपेक्षकर्मसङ्ख्याविधानात् 'पत्ये शेते' इत्यादेर्दर्शनादिपूर्वकारम्भकर्मभूत पति सम्प्रदानक शयनमित्यादिबोध इत्यलम् ।

दीना तदर्थत्वात्तादर्थ्ये चतुर्थ्यैव सिद्धौ किं "कर्मणा यम्" इति सम्प्रदान सञ्ज्ञया, "चतुर्थी सम्प्रदाने" इति सूत्र तु रुच्यर्थानामिति विषये चतुर्थ्य र्थमिति चेन्न । दानक्रमणो गवादेर्ब्राह्मणार्थत्वेऽपि दानक्रियायाः परलोकार्य त्वात् । अत एव तादर्थ्यचतुर्थ्या दानकर्मणो गवादे सम्प्रदानार्थत्वेऽपि दानक्रियायास्तदर्थत्वाभावेन चतुर्थ्यन्तार्थस्य दानक्रियायामन्वयानापत्त्या कारकत्वानापत्तिरिति हेलाराज । उपकार्योपकारत्वसम्बन्धस्तादर्थ्ये चतुर्थ्यर्थ । ब्राह्मणाय दधीत्यादौ ब्राह्मणोपकारकं दधीति बोधादिति दिक्।

तत्तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्वर्थाश्रयविभागाश्रयत्वमपादा

तदर्थत्वादिति—स्वकर्मगवादिद्वारा दानादीनां ब्राह्मणाद्युपकारकत्वादिति भाव । ननु तर्हि कर्मणेतिसूत्राऽभावे "चतुर्थी सम्प्रदाने" इति सूत्र किमर्थं स्या दित्यत आह—चतुर्थीति । परलोकार्थत्वादिति—स्वर्गद्वारा दानकर्तुरुपकार कत्वेन विवक्षितत्वादिति भाव । तदर्थत्वाऽभावेनेति—तदर्थत्वेन विवक्षितत्वाऽ भावेनेत्यर्थः । हेलाराज इति—इदमुपलक्षणम्—तत्सम्प्रदानक दानमिति बोधाऽ र्थमपि कर्मणेति सूत्रमावश्यकमेवेति । ननु "रुच्यर्थानाम्" इत्यादि सूत्रमाश्रित सम्प्रदानलक्षण कुतो न निरूपितमित्यत आह—दिगिति—सम्प्रदानस्य लक्षणा न्तराणि अनयैव दिशा स्वयमूह्यानीति भाव ।

अवसरे अपादानत्व निरूपयन्नाह—तत्तत्कर्तृसमवेतेति—अत्रेद तत्त्वम्—"ध्रुवमपाये" इति सूत्रे—अपायो विभागजन्यसंयोगाऽनुकूलोऽवधिसाक्षाद्भूतो गतिविशेषः—'गतिविनात्वसधिना नाऽपाय इति कथ्यते' इति दर्पणे । अन्यथेष संयोगाऽनुकूलव्यापारमान तु नाऽपाय, वृक्षमशाखयि पर्णं भूमि सृजति वृक्षात्पर्णं पततीत्यप्रयोगात् । ध्रुवत्वञ्च—अवधिभावमहणाऽतिरिक्ताऽवधित्वो पयोगिव्यापाराऽनाश्रयत्वे सति अवधिभावमहणाऽऽश्रयत्वम् । यद्यपि "भु गति स्थैययोः' इत्यादुकारादे पचाद्यच्, 'ध्रुव स्थैर्ये' इति पाठे तु इगुपधलक्षण कः' इति साधनात् 'ध्रुव स्थिरम्, अचल, चेष्टाऽनाश्रय' इत्यर्थावगतौ भवतः, "ध्रुवमस्य शीलमि'त्यत्र तयाश्रुतेश्च, तथापि 'अपाय अपायविषय ध्रुवम्' इत्यन्वयाऽनु साधारद्वगतिविशेषरूपाऽपायेनाऽऽक्षिप्ततया अवधित्वमहणाऽऽश्रयत्वांशस्य लाभ । ध्रुवपदार्थस्याऽपायेन विशेषणात्—'अपायविषये स्थिरं चेष्टाऽनाश्रय',

अन्यत्र स्थिरं स्यादस्थिरं वा' इति प्रतीते —अत्रधित्वोपयोगितदतिरिक्तव्यापाराऽनाश्रयत्वमित्यस्य लाभ । तथा च वाक्यशक्त्या 'ध्रुव'पदस्य तादृशोऽर्थ इत्यागतम् । एवञ्च—अपाये यत् ध्रुवम् उक्तरूप तदपादानमितिसूत्रार्थ ।

ननु अपायविषये यत्कारक तदपादानमितिमात्रेणाऽपीष्टसिद्धि, स्वविषये क्षत्रादिभिः परत्वाद्बाधेन परिशेषात् तादृश्येव ध्रुवाऽर्थे प्रवृत्तिसम्भवात् इतिचेत्—अपादानस्य अवधित्वप्रहणाऽतिरिक्तव्यापाराऽभावबोधनार्थं ध्रुवग्रहणम् । तेन सौकर्यविवक्षायां 'ग्राम आगच्छती'ति प्रयोगो नेति फलम् । 'नस्तादृश्वात्पतित' 'धावतोऽश्वात्पतित' इत्यादौ ग्रासधावनादे सतोऽपि नाऽवधित्वोपयोगित्वेन विवक्षा, 'वृक्षात्पर्ण पतति' इत्यादौ ग्रासादेरभावेन तस्य तदुपयोगित्वाऽभावात्, इतीह ध्रुवत्वमेव, अवधित्वोपयोगितदतिरिक्तव्यापाराऽनाश्रयत्वात् । 'परस्परस्मान्मेघावपसरत' इत्यत्र मेघपदोपात्तयोरेव क्रियाऽऽश्रयत्वविवक्षणात्कर्तृत्वम्, परस्पर शब्दोपात्तयोरेव विभागाश्रयत्वविवक्षणादपादानत्वम्, प्रयोगाऽनुसारित्वाद्विवक्षाया । अत एव 'अश्वोऽयमाश्विनव्यतश्चैत्रमैत्रान्नि'त्यादौ तयो कर्मत्वसिद्धिः । शब्दरूपोपाधिभेदेन एकस्यैवाऽर्थस्य भेद, शब्दाऽऽलिङ्गितार्थस्यैव हि, स्वमते मानात् ।

यत्तु—ध्रुवत्वम्—विश्लेषाऽऽश्रयत्वे सति विश्लेषजनकतत्क्रियाऽनाश्रयत्वमिति, तन्न—'नस्तादृश्वात्पतित' इत्यत्र अध्रौव्यशङ्कापरकभाष्याऽसङ्गते अध्रौव्यस्याऽविवक्षया समाधानपरकभाष्याऽसङ्गतेश्च । स्वद्रीत्या पतधात्वर्थव्यापाराश्रयत्वरूपस्याऽध्रुवत्वस्याऽत्राऽभावात् । प्रकृतसूत्रे भाष्ये हि—"गतिमुक्तेष्वपादानसंज्ञा नोपपद्यते 'अश्वात्त्वस्तात्पतित' 'रथात्प्रवीतात्पतित' 'सार्थाद्गच्छतो हीन' (धावत पतित) इति । किं कारणम् ? 'अध्रुवत्वात्' । नवाऽध्रौव्यस्याऽविवक्षितत्वात् । नवैष दोष । किं कारणम् ? अध्रौव्यस्याऽविवक्षितत्वात्' नाऽत्राऽध्रौव्यविवक्षितम् । किं तर्हि ध्रौव्यम्' इत्युक्तम् । स्वमते तु अत्र ग्रासादेरवधित्वोपयोगित्वाऽभिमानेन शङ्काया, 'वृक्षात्पतित' इत्यादौ तदभावेन ग्रासादेर्न तदुपयोगित्वम्, इह सतोऽपि तस्य तत्त्वेनाऽविवक्षेति समाधानस्य च सङ्गतिरित्यत्र विस्तर ।

इतीममेव सूत्रार्थं फलितार्थीकृत्य मूलकृता परिष्कृतम्—तत्तत्कर्तृसमवेते त्यादिना—शेखरे तथैव परिष्कारात् । तत्र 'वृक्ष त्यजति' इत्यत्र फलाऽऽश्रयत्वेन

नत्वम्। तदेवाधिक्यं, विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि माथुरा पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ बुद्धिपरिकल्पितापायाश्रयणेनैव भाष्ये पञ्चमीसाधनात्। अत एव चैत्रान्मैत्र सुन्दर इत्यादिः लोके प्रयोग। वृक्ष त्यमति

परत्वात्कर्मसंज्ञया बाधाद्बाधसिद्ध एव सङ्कोच —'प्रकृतबाध्यवाच्येति'। 'पतोऽश्वात्पतती'त्यपि 'अस्तादश्वात्पतित' इत्यनेन धावत पतित इत्यनेन च भाष्याङ्केन तुल्ययोगक्षेममेवेति तदन्यान्तिवारकत्वेन विवक्षिततदितिनिवेशोऽपि अशौव्यस्याऽविवक्षेतिभाष्योक्तयुक्तिमूलक एवेति विभावनीयम्। बुद्धिपरिकल्पितसम्बन्धपूर्वक बुद्धिपरिकल्पितविभागाभये बीजमाह—भाष्ये पञ्चमीसाधनादिति—प्रकृतसूत्रे भाष्ये हि—"उगुप्साविरामप्रमादार्थानामुपसङ्ख्यानं कर्तव्यम्—अधर्माज्जुगुप्सते, अन्नमाद्धीमत्सते'- धर्मादिरमति, धर्मान्निवर्तते, धर्मात्प्रमाद्यति, धर्मान्मुह्यति। इदञ्चोपसङ्ख्यान कर्तव्यम्—'साङ्काश्यकेभ्य पाटलिपुत्रका आभिरूपतरा' इति। तत्तर्हीद मक्तव्यम्! न वक्तव्यम्। इह तावदधर्माज्जुगुप्सते, अधर्मादीमत्सते, इति—य एष मनुष्य प्रेक्षापूर्वकारी भवति, स पश्यति—'दुःखोऽधर्मो नाऽनेन कृत्यमस्ती'ति। स बुद्धया सम्प्राप्य निवर्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्। इह च धर्मादिरमति, धर्मान्निवर्तते इति, धर्मात्प्रमाद्यति, धर्मान्मुह्यतीति—य एष मनुष्य सभिन्नबुद्धिर्भवति, स पश्यति—नेदं किञ्चिद्धर्मो नाम, नैनं करिष्यामी'ति स बुद्धया सम्प्राप्य निवर्तते। तत्र ध्रुवमपायेऽपादानमित्येव सिद्धम्। इह च साङ्काश्यकेभ्य पाटलिपुत्रका अभिरूपतय इति—यस्तैः साम्यं गतवा भवति, स एतत्प्रयुङ्क्ते।" इत्युक्तम्। अत्र केयटः—"साङ्काश्यकेभ्य इति—"पञ्चमा विधक्ते" इत्यनपेक्ष्य वचनम्। सभिन्नबुद्धिरिति—धर्माऽधर्मयोरेकाकारबुद्धिनास्तिक इत्यर्थ। यस्तैरिति—तै साङ्काश्यके पाटलिपुत्रकाणां समगुणत्वायः साम्यमवगतवान् स प्रकृत्याश्रयेण पुन पृथक् भूत्वा वाक्यं प्रयुङ्क्ते इत्यर्थ।" इति। अत्र बुद्धिपरिकल्पिताऽपायाश्रयणप्रयुक्तमपादानत्वमित्युक्तमेवोक्तम्। इत्यादा विति—आदिग्रहात् अधर्माज्जुगुप्सते इत्यादिमाष्योक्तसंग्रहः। ध्रुवमिति—विभागाऽनुकूलव्यापारात्मकत्यजर्थाश्रयत्वं यत्र समवेतक्रियाजन्यविभागाश्रयत्वादिति

यग इत्यादावपादानत्ववारणाय प्रकृतधात्वर्थाश्रयेति । परस्परस्मान्मेषावपसरत इत्यत्रापादानत्वाय तत्तत्कर्तृकेति । तत्तत्पशुविशेषनिष्ठव्यापारजन्यविभागाश्रयस्तत्तत्पशुविशेषः । किं च मेषपदवाच्ययो पशुविशेषयो क्रियाश्रयत्वविवक्षा परस्परपदवाच्ययोस्तयोस्तु विभागाश्रयत्वविवक्षेत्यौपाधिकस्तयोर्भेद । शब्दस्वरूपोपाधिकृतभेदोऽप्यर्थे गृह्यते । यथाऽऽदमाऽऽदमानमात्मना वेत्तीत्यादौ शरीरावच्छिन्न कर्तृ, अन्त करणावच्छिन्न करण,निरवच्छिन्न निरीह कर्म । एकस्यैव शब्दभेदाद्भेद' शब्दालिङ्गितस्यैव सवत्र वस्तुमानात् तदाह—

न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते ।
अनुविद्धमिव ज्ञान सर्वं शब्देन भासते ॥ इति ।

ननु ह्येतदौपाधिकभेदमादायैवात्रापादानत्वे सिद्धे किं तत्तत्कर्तृसमवेतेत्यनेनेति चेन्न । पर्वतात्पतत्यश्वात्पतत्यश्वयवाद्द इत्यादावश्वस्यापादा

भावः'। परस्परस्मान्मेषाविति--मेषान्तरसमवेतक्रियाजन्यविभागाश्रयत्वान्मेषान्तरस्याऽपादानत्वम्, स्वसमवेतक्रियाश्रयत्वाच्च कर्तृत्वमितिभाव, निरूपकभेदात्तयोर्नविरोध इति न परया-कर्तृसंशया बाध इत्यपि भाव'। ननु क्रियाया निवृत्तभेदाया एव 'न वै तिङन्तानीत्यादि''वक्ष्यमाणमाष्यात्प्रतीतेर्नेद युक्तसमाधानमिति चेदत आह—किञ्चेति--शब्दोपाधिभेदा मेषपदोपात्तपरस्परपदोपात्तयोर्भेदस्य सत्वान्नैकत्र कर्तृत्वाऽपादानत्वयो सम्मेलनमिति नाऽत्र कर्तृसंशया अपादानत्वस्य बाधाशङ्केति भाव । शरीराऽवच्छिन्नमिति—स्थूलशरीराऽवच्छिन्नमित्यर्थ । अन्त करणाऽवच्छिन्नमिति—मनोबुद्ध्यहङ्कारात्मकसूक्ष्मशरीराऽवच्छिन्नमित्यर्थ । निरवच्छिन्न निरीहमिति—"अनश्नन्नन्योऽभिचाकशीति" इत्यादिश्रुत्या चैतन्यस्य निरीहत्वाऽवगतिरपि एकस्यैवेति—चैतन्यस्येतिशेष । नसोऽस्तीति—स प्रत्यय =ज्ञानम्, शब्दाऽनुगमात् =शब्दसाहचर्यात्, ऋते=विना भवति, स प्रत्यय, लोके नाऽस्ति, लोकादन्यत्र स्याद्वा न वा स्यात् । (यत) सर्वं प्रत्यक्षानुमानोपमानशब्दजन्यात्मक ज्ञान शब्देन अनुविद्धं ग्रथितम् इव भासते उपतिष्ठत इत्यर्थ । पर्वतादिति—अश्वीयपतनाऽवधित्वेन पर्वतस्य, अश्ववाहीयपतनाऽवधित्वेन चाश्वस्य अपादानत्वम् । क्रियाया एकत्वेऽपि द्वाभ्यां धातुभ्यां प्रतिपादनात्

नत्वाय तत्स्वीकारात् । नन्न वृक्षात्पर्णं पततीत्यादौ तादृशफलाश्रयत्वात् र्णस्यापादानत्व विभागस्य द्विप्रत्वादिति चेन्न । परया कर्तृसंज्ञया बा धात् । अत एव "अपादानमुत्तराणि कारकाणि बाधन्त" इति भाष्यं सङ्गच्छते ।

यत्तु केचिद्वृत्यनाश्लिष्टत्वे सति तज्जन्यविभागाश्रयत्वमपादानत्वमिति। तन्न । तत्तद्वाक्ये मेषाश्वयोरपादानत्वानापत्तौ । यदपि अपसरत इति सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठा गतिं प्रतीतेरस्यापादानत्वम विरुद्धमिति तन्न । क्रियाया एकत्वात् । अत एव "न वै विरुद्धा येकस्यारम्भ प्रयोजयन्ति क्रियाया एकत्वादिति" भाष्यं सङ्गच्छते । पञ्चम्यर्थोऽवधि । वृक्षावधिक पणकर्तृक पतनमिति बोध । पर्वतावधिकपतनाश्रया

उपाधिभेदात् च स्वपतनं प्रति अश्वस्य कर्तृत्वम्, अश्वबाह्यीयपतन प्रति च तस्या ऽपादानत्वमिति निरूपकभेदान्न शक्तयार्त्तिराध इति नात्र परया कर्तृसंज्ञया बाध इति भाव । गत्यनाश्लिष्टत्वे सति = विश्लेषजनकक्रियाऽनाश्रयत्वे सति । तज्जन्य = विश्लेषजनकक्रियाजन्य । तत्तद्वाक्ये="परस्परस्मान्मेषावपसरतः' 'पर्वतात्तवोऽश्वात्पतत्यश्ववाह ' इत्यादिवाक्ये । भूषणसारस्य मतं कथञ्चिति—यदपीति । पञ्चम्यर्थोऽवधिरिति—अवधि = अपादानत्वशक्तिमान्, अपादानत्व तदेवाऽवधित्वमिति स्वपूर्वोक्तमन्येन तयारैक्यमाधनात् । इदमुपलक्षणम् क्रियाद्वारकमाव सम्बन्धश्च अपादानपञ्चम्यर्थ इति निष्कर्ष । वृक्षाऽवधिकमिति—अत्र योजने "अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति अपादानसमभिव्याहारे विभागोऽपि धात्वर्थ इति बाध्यम् । एवञ्च 'वृक्षात्पतति' इत्यादौ वृक्षा दानकविभागपूर्वक संयोग पर्णवृत्तिरितिबोध । 'वृक्षाद्भूमि पतति' इत्यादौ वृक्षापादानकविभागपूर्वकसंयोगाऽनुकूलो व्यापार इति बोध" इत्युक्तम् । एवञ्च वृक्षाऽभिन्नाऽपादानत्वशक्तिनिष्ठक्रियाकारकभावसम्बन्धाऽवच्छिन्नप्रकारतानिरूपि तविशेष्यताशालि विभागपूर्वक पर्णकर्तृक पतनमिति बोध इति तत्त्वम् । एवमन्यत्र ।

ननु 'अपादानसमभिव्याहारे विभागोऽपि धात्वर्थ' इत्युक्तेश्वरमते अपा दानत्वलक्षणे प्रकृतधात्वन्वयितावच्छेदकविभागीयविशेषणस्य कथ उन्नतिरितिचेत्, सत्य

भिन्नाश्रयावधिकमश्वावहकर्तृकं पतनमिति बोध । परस्परमेपावधिकद्वित्वावच्छिन्नमेपकर्तृकमपसरणमिति बोध इति दिक् ।

कर्तृकर्मद्वारकफलव्यापाराधारत्वमधिकरणत्वम् । यथा स्थाल्यामोदन गृहे पचतीत्यादौ कर्मद्वारकविक्लित्तिरूपफलाधार' स्थाली, कर्तृद्वारकव्यापाराधारो गृहमिति । ननु साक्षात्क्रियाधारयोरोदनचैत्रयोरधिकरणत्वलक्षणे परम्परया तदाधारयोर्गृहस्थाल्योस्तत्सङ्ग त्वयुक्तेति चेन्न । परत्वात्कर्तृकर्मसङ्गाभ्या साक्षादाधारीभूते बाधात् । स्थाल्यधिकरणिका या ओदन

धात्वर्थान्वयेत्यस्य प्रकृतधातुवाच्यफलताऽनुकूलैकसम्बन्धाऽवच्छिन्नफलेतर इत्यर्थे तात्पर्यमिति बोध्यम् ।

अवसरेऽधिकरणत्व निरूपयति—कर्तृकर्मद्वारकेति—साक्षात् फलव्यापाराऽधारयो परत्वात्कर्तृकर्मसङ्गाभ्यां बाधाद्बाधसिद्ध एव कर्तृकर्मद्वारकेति सङ्कोचोऽयम् । कर्मद्वारकविक्लित्तिरूपेति—विक्लित्ति ओदने ओदनश्च स्थाल्यामिति ओदनद्वारा विक्लित्तिरूपफलाधार स्थालीतित्या अधिकरणत्वम् । कर्तृद्वारकेति—व्यापार कर्तरि, कर्ता च गृहे, इति कर्तृद्वारकपरम्परया व्यापाराधारो गृहमिति तस्याधिकरणत्वम् इति भाव ।

स्थाल्यधिकरणिका या ओदननिष्ठा विक्लित्तिरिति—अत्र मञ्जूषाकारा—"परे तु 'अधिकरणस्य कर्त्राद्यन्वय एव । 'कटे शेते' इत्यादौ कटाधिकरणकचैत्रकर्तृक शयनमित्यादिरीत्या बोध । तद्द्वारकमेवाऽस्य क्रियाऽन्वयित्वम् । कारकाणा भावनान्वयव्युत्पत्तिरपि एतच्छास्त्रबलादीदृशपरम्पराऽन्वयविषयाऽपि । अत एव 'अन्नेषु शौण्ड' इत्यादौ समास । अत एव भाष्ये तत्राऽसामर्थ्यशङ्का न कृता । एवञ्चाऽत्र अन्तर्भूतक्रियाद्वारा सामर्थ्यमिति कैयटादयश्चिन्त्या एव । 'अन्न शौण्डोऽन्नप्रवीण' इत्यादौ दध्योदनादाविव क्रियाऽन्तर्भावेण बोधस्याऽननुभवात्, अन्नविषयकप्रावीण्यवानित्येव प्रतीते । ध्वनितञ्चेद हरिमन्येऽपि । तत्र हि—

"कर्तृकर्मण्यवहितामसाक्षाद्धारयत्क्रियाम् ।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम् ॥"

इति कारिकायां व्यवहितामित्युक्तेऽपि असाक्षादित्युक्तिर्लोकाऽनुसारेणाऽवयोऽपि परम्परयेत्येति सूचनाय" इत्याहुः ।

निष्ठा विष्ठिचिम्बदनुकूलो गृहाधिकरणको मैत्रकर्तृको व्यापार इति बोध।

तत्राधिकरण त्रिधा। अभिव्यापकमौपश्लेषिक वैषयिक चेति। तत्र

अक्षशौण्डस्य धनमित्यादौ कर्तृकर्माऽभावेऽपि शौण्डपदस्य आसक्त्यौपयिके लक्षणा। अक्षशौण्ड इत्यत्र तु न लक्षणा 'न विधौ परः शब्दार्थ' इति न्यायादिति तद्भाव" इत्याहु।

तत्राधिकरण त्रिधेति—अत्र मूलं "सहितायामिति" सूत्रस्य भाष्यं तत्र-अधिकरण नाम त्रिप्रकारम्—व्यापकम्, औपश्लेषिकम्, वैषयिकमिति। शब्दस्य च शब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हति अन्यदत उपश्लेषात्! 'इको यणचि' अन्युदश्लिष्टस्येति" 'तदस्मिन्नधिकमि'तिसूत्रेऽपि भाष्ये—"यद्यपि तावद्द्रव्यस्यैव वैषयिके वाऽधिकरणत्वे सम्भवो नास्ति, औपश्लेषिकमधिकरण विद्यास्यते—एका दश कार्षापणा उपश्लिष्टा अस्मिन्शते एकादश शतम् इति" इत्युक्तम्।

तत्र व्यापकाऽधार एव मुख्य आधार इति "स्वरितेनाऽधिकार" "साधकतम करणम्" इतिसूत्रस्थभाष्यपो स्पष्टम्। तत्र हि "स्वरितेने" तिसूत्रे—"तथाऽधिकरणमाचार्यं किं न्याय्यं मन्यते? यत्र कृत्स्न आधारात्मा व्याप्तो भवति। तेनेहैव स्यात्—'तिलेषु तैलम्' 'दध्नि सर्पि'रिति। 'गङ्गायां गाव' 'कूपे गर्गकुलम्' इत्यत्र न स्यात्। स्वरितेनाधिकं कार्यं भवतीत्यत्राऽपि सिद्धं भवति अधिक कार्यम्" इत्युक्तम्। "साधकतमम्" इति सूत्रेऽपि तत्र—"तथाऽऽधार माचार्यः किं न्याय्यं मन्यते?

यत्र कृत्स्न आधारात्मा व्याप्तो भवति। तेनेहैव स्यात्—'तिलेषु तैलम्' 'दध्नि सर्पि'रिति, 'गङ्गायां गाव' 'कूपे गर्गकुलम्' इत्यत्र न स्यात्। कारकसंज्ञायां तत्प्रयोगो न भवतीत्यत्राऽपि सिद्धं भवति" इत्युक्तम्। श्यामामेव च माध्वा श्यामितरयोर्गोणाधारत्वमप्यावेदितं भवति, भवति च प्रथमोच्चरितत्वं गौणाधार योरपि स्वरितत्वमतिशयनादिति। एवञ्च यत्र सर्वांऽवयवावच्छेदेन आधेयस्य व्याप्ति, यथा—'तिलेषु तैलम्' 'दध्नि सर्पिरि'ति, समवायेन पदमिहत्यमिति यावत्, एतद्व्यापकम्। यत्तु उप समीपे श्लेष सम्बन्धस्तत्त्वम्, यथा—'इको यणची' त्यादावचीति, तदौपश्लेषिकम्। अत्र श्यामोपयमेव इक इति 'सहितायामिति सूत्रे भाष्ये स्पष्टम्। 'तत्रोपश्लिष्टपदाऽध्याहारेण च सप्तमी'त्यपि

सकलावयव व्याप्तौ व्यापकाधारत्वम्, यथा तिलेषु तैलमस्तीत्यादि। उप समीपे श्लेष सम्यन्ध उपश्लेषस्तत्कृतमौपश्लेषिकम्। यथा कटे गाव सन्ति। अत एवेकोयणचीत्यादावौपश्लेषिकाधारे सप्तम्युक्ता सहितायामिति सूत्रे भाष्ये। तत्राजाद्यसामीप्यमेवेगादीना। यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधिकरणम्। मासिक धान्यमित्युक्त 'तत्र च दीयते' इति सूत्रे भाष्ये। यत्तु कटे आस्ते इत्यौपश्लेषिकोदाहरणमुक्त तदयुक्त मुक्तभाष्यविरोधात्। एतदुद्धयातिरिक्तवैषयिकमधिकरणम्। कटे आस्ते जले सन्ति मत्स्या इत्यादि। अभिव्यापकातिरिक्त गौणमधिकरणमिति

तत्रैव भाष्ये स्पष्टम्। "तत्र च दीयते" इति सूत्रेऽपि भाष्ये—"यन्मासेऽतिक्रान्ते दीयते तस्य स मास अधिकरणम्" इत्युक्तम्। यत्किञ्चिदवयवावच्छेदेनाऽऽधारस्याऽऽधेयेन व्याप्तिरपि उपश्लेष—श्लेषस्य मुख्यस्य सर्वाधारव्याप्तिरूपस्य समीप यत् आधारीययत्किञ्चिदवयवव्याप्तिरूपमिति व्युत्पत्त्ते, तत्कृतमपि औप श्लेषिकम्—यथा 'कटे आस्ते' इति। एवमेव गङ्गैकदेशे तरन्तीषु गोषु, कूपैक देशस्थिते गर्गकुले 'गङ्गायां गाव' 'कूपे गर्गकुलम्' इत्यादौ बोध्यम्। सामीप्य-सयोगाऽन्यतरसम्बन्धेन अधिकरण यत् तदौपश्लेषिकमिति तत्त्वम्। यद्यपि उप-श्लेषशब्दस्य द्वितीयोऽयमर्थो भाष्यारूढो नास्ति, "सहितायाम्" "तदस्मिन्न-धिकम्" "तत्र च दीयते" इति सूत्रत्रयोदाहृतभाष्येषु प्रथमस्यैवाऽर्थस्यसम्मत त्वात्, तथाऽपि 'कटे शेते' इत्यादौ 'कटविषये शेते' इति प्रतीतेरभावेन तथाऽ-र्थान्तरस्याऽवश्यकल्पनीयत्वम्। अत एव मञ्जूषायाम् स्वीकृतोऽयमर्थ, शेखरेऽपि यदेत्यादिना स्वीकृत एव। किन्तु परमलघुमञ्जूषायामत्र कस्मात्तस्य निरादरण मिति मृग्यम्।

यत्तु—सामीप्यसयोगसमवायैतद्भिन्नसम्बन्धेनाऽधिकरणम् तद् वैषयिकम्। यथा—'से शकुनय' इति। अत्राऽऽकारस्य तात्त्विकाऽवयवाऽभावेन कल्पित देशत्वाद्वैषयिकत्वम्। 'गुरौ वसती'त्यत्रापि गुर्वधीनायां वृत्तौ गुरोर्वैषयिकत्वम्। 'व्यापकाऽऽधारस्यैवाधिकरणता न्याय्या (मुख्या)' इत्यत्र मानन्तु प्रकृत्यर्थताऽ-वच्छेदकविशिष्टे विभक्त्यर्थाऽन्वयौचित्यमिति। नहि कटैकदेशे कटत्वमस्ति, एक देश एव चाऽधिकरणत्वस्य मानम्। तस्मादेकदेशगताऽऽधारत्वस्य कटे आरो-

बोध्य सप्तम्यर्थोऽधिकरणमिति दिक् । ज्ञापकक्रियाश्रयवाचकादुत्तरा सत्सप्तम्यास्तु क्रियान्तरज्ञापकत्वमित्यर्थः । तत्रानिर्णीतकालिकाया

पेण घोष इति गौण एव स आधारः । एवमेव वैषयिकाऽऽधारेऽपि 'ये शकुनय' इत्यादौ खल्वविशिष्टे सकले नाऽधिकरणत्वस्य भानम्, इति तदपि गौणमेव । व्यापकाऽऽधारे तु दग्नि सर्पि'रित्यादौ दधित्वविशिष्टेऽधिकरणत्वस्य भानात् आरोपमन्तरेणैवाधिकरणत्वाऽन्वयबोध इति मुख्योऽयमाधारः । गौणाऽधारत्वाऽपि स्वरितित्वप्रतिज्ञानात्सप्तमी शक्यतेयेति "स्वरितेने" तिसूत्रोक्तभाष्ये स्पष्टम् ।

स्यादेतत्—'गङ्गायां घोष' इत्यत्राऽपि सामीप्यमूलकौपश्लेषिकाऽधिकरणत्वस्य सत्त्वेन शक्त्यैवाऽन्वयबोधे सिद्धे कस्माल्लक्षणायां प्रयासस्तत्राऽऽद्रियतामिति चेत्—मैवम्—अव्यवहितसामीप्यमेवाऽऽधारतानियामकम्, न तु व्यवहितसामीप्यमपीति "सहितायामि"ति सूत्रे भाष्ये ध्वनितम् । तत्र हि—"अर्थं योग शक्योऽवक्तुम् । 'इको यणचि' अच्युपश्लिष्टस्येति । तत्राऽन्तरेण सहितामहणं सहितायामेव भविष्यति" इत्युक्तम् । अत्र कैयट—"उपश्लेषे त्वाऽऽश्रिते निर्दिष्टमहणमपि न कर्तव्यम्, व्यवहितयोरुपश्लेषाऽभावात्" इत्युक्तम् । भाष्येऽपि वर्णानां परसन्निकर्षरूपसंहिताऽधिकारस्य वैकल्पमुपश्लेषाभयपक्षेनेति व्याख्यानेन उपश्लेषस्य परसन्निकर्षरूपता सूचितेति । एवञ्च व्यवहिते सामीप्ये सति 'गङ्गायां घोष' इत्यादौ गङ्गाशब्दस्य तीरे लक्षणाभयणमावश्यकमेवेति स्यादयात् । यदपि गौणमेवाधारत्वम्, सर्वाऽवयवावच्छेदेन तीरस्य घोषसम्बन्धा भावादित्यलम् ।

"यस्य च भावेन भावलक्षणम्" इत्येतत्सूत्रविहितसप्तम्या अर्थमाह—ज्ञापक क्रियाश्रयेति—यस्य क्रियया क्रियान्तरं लक्ष्यते ततः क्रियान्तरलक्षकक्रियाश्रयवाचकात् सप्तमीति सूत्रार्थः । तदुक्तादेव तद्विहितसप्तम्या क्रियान्तरज्ञापकत्वमर्थः इति लभ्यते, तत्र क्रियान्तरस्योक्तलक्षणविधया प्रवेशेन ज्ञाप्यज्ञापकभावगर्भं महत्व सप्तम्यर्थ इति निष्कर्ष इति । 'गोषु दुह्यमानासु गत' इत्यादावुभयोरपि पदयोर्धात्वर्थ क्रियाश्रयवाचकत्वादुभाभ्यामपि सप्तमी ।

तत्राऽनिर्णीतेति—अयं भावः—निश्चितदेशकाला क्रिया अनिश्चितदेश कालक्रियासम्बन्निदेशकालपरिच्छेदकत्वेन अनिश्चितदेशकालक्रियाया ज्ञानिका

क्रियाया निर्णीतकालिका ज्ञापिका । गोषु दुह्यमानासु गत इत्यादौ गोनिष्ठ-दोहनक्रियाज्ञापितगमनाश्रयश्चैत्र इति बोध । कारकप्रातिपदिकार्थव्यति-

---

भवतीति । एवञ्च नाऽत्र वह्निधूमयोरिव व्याप्तिज्ञानसापेक्षो ज्ञाप्यज्ञापकभावोऽ-पेक्षित, परिच्छेदकत्वरूपस्यैवाऽत्र ज्ञापकत्वस्य प्रकृतसूत्रे ग्रहणात् । एतेन भूयो दर्शनाश्रयत्वाद्ज्ञाप्यज्ञापकभावस्य, 'उदिते आदित्ये तमो नष्टमि'त्यादावेव स्यान्न तु 'गोषु दुह्यमानासु गत' इत्यत्र कादाचित्कगमनस्थले इत्यपास्तम् । अत्र मूले कालेति देशस्याऽप्युपलक्षण बोध्यम् । तत्र देशोदाहरणम्—'सति गुणे द्रव्यत्व-मस्तीत्यादि । कालोदाहरणम्—'गोषु दुह्यमानासु गत ' इत्यादि । दुह्यमानगोज्ञा प्यगमनाश्रय इति शाब्दो बोध । अत्र गवि ज्ञापकत्वस्य विशेषणीभूतक्रियाद्वारैव पर्यवसानात्—गोनिष्ठदोहनक्रियाज्ञापितगमनाश्रय इति बोध फलितो भवति—तदाह—गोनिष्ठेति । इतिबोध इति—फलित इत्यादि । इति लघुमञ्जूषायां कारकप्रकरणम् ।

अथ शेषषष्ठ्यर्थं निरूपयति—कारकप्रातिपदिकार्थव्यतिरिक्त इति—अत्राऽयं परिष्कार —"षष्ठी शेषे" इति सूत्रे शेष उपयुक्तादन्य । उपयुक्तत्वञ्च पूर्वत्र कारकप्रातिपदिकार्थयो । अतस्तद्व्यतिरिक्त स्वस्वामिभावादि सम्बन्ध एव शेषपदार्थ, तद्वाचिका षष्ठीति सूत्रार्थ । यथा—'राज्ञ पुरुष' इत्यत्र कर्तृत्वादिशक्तिभ्योऽन्य प्रातिपदिकार्थाच्चान्य स्वस्वामिभावो नाम सम्बन्ध । यद्यपि कारकप्रातिपदिकार्थव्यतिरिक्तो नास्त्येवाऽर्थ—'राज्ञ पुरुष' इत्यत्राऽपि राजा कर्ता पुरुष सम्प्रदानम्—'राजा पुरुषाय ददातीति' सम्प्रत्ययात्, एव पुरुष कर्ता राजा कर्म—'पुरुषो राजान सेवते' इति सम्प्रत्ययाच्च । अयात्—राजकर्तृ कपुरुषसम्प्रदानकदानमन्तरेण, पुरुषकर्तृकराजकर्मकसेवनमन्तरेण च राज पुरुषयो स्वस्वामिभाव कथमपि भवितु नार्हत्येव, सर्वथा सम्बन्धस्य क्रियाकारकभावमूलकत्वात् । एवञ्च सम्बन्धस्यापि कर्तृत्वकर्मत्वादिशक्तिरूपतै वेतिचेत्—तथापि सतोऽपि क्रियाकारकभावस्य कर्मत्वादितत्तद्विशेषरूपेणाऽवि वक्षायां कर्मत्वादितत्तद्व्यापकसम्बन्धत्वेन रूपेण विवक्षायां स्वस्वामिभावादितत्त द्रूपेण विवक्षायाञ्च स्वस्वामिभावादिर्नाम शेषपदार्थ प्रसिध्यत्येव । तदुक्तं प्रकृत सूत्रे भाष्ये—"क शेषो नाम ? कर्मादिभ्यो येऽन्येऽर्था स शेष । यद्येष शेषो न प्रकल्पते, नहि कर्मादिभ्योऽन्येऽर्थाः संभवन्ति । इह तावत्—'राज्ञ पुरुष'

रिक्त स्वस्वामिभावादि' सम्बन्ध' षष्ठ्या वाच्य । अत्र राज्ञ' पुरुष इत्यादौ षष्ठीवाच्यसम्बन्धस्याश्रयाश्रयिभावसम्बन्धेन पुरुषेऽन्वय' । राजनिरूपितसम्बन्धवान पुरुष इति बोधात् । ननु सम्बन्धस्योभयनिष्ठत्वात् पुरुष शब्दादपि षष्ठ्युत्पत्तिरस्त्विति चेन्न । राजसम्बन्धिपुरुष इति विवक्षायां राजशब्दादेव षष्ठी । प्रकृत्यर्थप्रत्यार्थयो प्रत्ययार्थस्यैव प्राधान्यमिति इति—राजा कर्ता पुरुष सम्प्रदानम् । 'वृक्षस्य शाखे'ति—वृक्ष शाखाया अधिकरणम । तथा यदेतत् स्व नामचतुष्टयमेतत्प्रकारैर्भवति—क्रयणादपहरणाया ऽऽया विनिमयादिति । अत्र च सर्वत्र कर्मादय सन्ति । एव तर्हि कर्मादीना मनिवक्षा शेष । कथ पुन सतो नामाऽविवक्षा स्यात् ? सतोऽप्यविवक्षा भवति । तद्यथा—"अलोमिकैडका, अनुदरा कन्येति" इति । हरिणाऽप्युक्तम—

सम्बन्ध कारकेभ्योऽन्य क्रियाकारकपूर्वक ।
श्रुतायामश्रुतायां वा क्रियायामभिधीयते ॥ इति ।

अत्र क्रियाकारकभावसम्बन्ध कारणम्, शेषा सम्बन्धास्तु फलभूता । अश्रुतायां दानादिक्रियायां उक्तरीत्या 'राज्ञ पुरुष' इत्यादौ । सम्बन्धोपलक्षक कार्यस्याऽन्ययाऽनुपपत्त्या अनुमितदानादिक्रियानिमित्तक सम्बन्धस्त्र । श्रुतायां यथा—'मातु स्मरती'त्यादौ । अत्र क्रियाकारकभावमूलको विशेष्यविशेषणभाव विषयविषयिभावो वा सम्बन्ध । सिद्धस्वभावानां हि द्रव्याणां क्रियां विना परस्पर सम्बन्धाऽभावात् क्रियाकारकभावमूलकत्व सम्बन्धस्येति युक्तमेव, क्रिया हि नि श्चयेनैव सम्बन्धं करोति । एवञ्च सम्बन्धिनोरपि अनुमीयमानक्रियानिमित्तक-रूप कारकत्वमस्ति । सामीप्याद्यपि बुद्धिस्थैकदेशाधिकरणकास्तिक्रियाकृत्य निमित्तकम् इत्याद्यक्षम् । अत्र षष्ठी तु न, अनभिधानात् । अत एव 'पर्वतस्य वृक्षा' इति न, पर्वतवृक्षयोः क्रियाकारकभावमूलकसम्बन्धाऽभावात् । आधाराधेयभावमूलक संयोगस्तयो सम्बन्ध इति न, विपरीतमाधाराधेयभावस्यैव संयोग मूलकत्वात् । आधाराधेयभावस्य च कारकत्वेन शेषत्वाऽभावात् । न च निर्निगननाविरहात् 'संयोग एव सम्बन्धमूलकोऽस्तु' इतिवाच्यम, 'भेदो परस्पर संसृष्टा'-दित्यादावाधाराधेयभावमन्तरेणाऽपि संयोगस्य सद्भावाच्चस्य सम्बन्धमूलकत्वाऽसम्भवस्यैव विनिगमकत्वात् । किञ्च संयोगो नहि सम्बन्ध, सम्बन्धस्य पञ्चसंयोगनानात्व

व्युत्पत्त्यनुरोधात्। अन्यथा तद्विवक्षाया राजा पुरुषस्येति पुरुषशब्दात् षष्ठया पुरुषार्थं प्रति षष्ठ्यर्थस्य विशेषणत्वापत्त्या व्युत्पत्तिभङ्गापत्ते। अत एवाह—

हेतुत्वात्, संयोगस्य च स्वत पदार्थत्वात्, सांसर्गिकविषयतया तस्याऽभानाच्च। सम्बन्धो हि सांसर्गिकविषयतया षष्ठयादिभिरेवोच्यते, सम्बन्धपदेनाऽपि सांसर्गिकविषयतावत्त्वेन बोध्यते, इति सम्बन्ध सर्वथा पदाऽगम्य। संयोगस्तु न कदापि सांसर्गिकविषयतयोच्यते, 'संयोगेनेमौ विशिष्टा'वितिव्यवहाराऽभावात् 'इमौ संयुक्ताविति'त्येव व्यवहारात्, अत्र च व्यवहारे प्रकारतयैव तस्य भानात्। संयोगे सम्बन्धत्वव्यवहारस्तु उभयाश्रितत्वरूपसम्बन्धीयधर्मवत्त्वाद्गौण। अत एव मनुसूत्रे 'वृक्षवान्पर्वत' इत्याद्यर्थं सप्तम्युपादानम् 'गोमान् देवदत्त' इत्याद्यर्थञ्च षष्ठ्युपादानमिति भाष्य उक्तम्—"नैतयोरावश्यक समावेश, भवन्ति देवदत्तस्यगावो न च तास्तस्मिन्नाधृता भवन्ति। भवन्ति च पर्वते वृक्षा न च ते तस्य भवन्ति, तस्मादस्याऽस्मिन्ग्रहणम्" इति। एतेन—'संयोग सम्बन्ध' इति नैयायिकोक्तमपास्तम्। षष्ठ्यर्थश्च सांसर्गिकविषयतयैव भासते—'स्वस्वामिभावसम्बन्धेन राजविशिष्ट पुरुष' इति बोधात्। अत एव "षष्ठी शेष" इति सूत्रे भाष्ये—"राज्ञ पुरुष इत्यत्र राजा विशेषण पुरुषो विशेष्य" इत्युक्तम्, अन्यथा सम्बन्ध विशेष्यतया विशेषणतया वा ब्रूयात्। 'राज्ञ पुरुष' इत्यत्र स्वस्वामिभाव षष्ठ्यर्थ, स च स्वत्वस्वामित्वसमूहरूप। यत्तु स्वामित्व स्वत्व वा षष्ठ्यर्थ इति, तन्न, तस्यैकमात्रवृत्तितया सम्बन्धत्वाऽयोगात्। सम्बन्धो हि सम्बन्धिद्वयमिन्नो द्विष्ठश्च। न च तदप्येकत्राऽऽश्रयतया, परत्रनिरूपकतयाऽस्त्येवेतिवाच्यम्, निरूपकत्वस्य वृत्त्यनियामकतयोभयत्र सम्बन्धवत्त्वप्रतीत्यनापत्ते। सम्बन्धस्य द्विष्ठत्वञ्च—"यस्मादधिकमि"तिसूत्रे भाष्ये स्पष्टम्। तत्र हि—"अधिब्रह्मदत्ते पञ्चाला' इत्यत्र "यस्मादधिक" मित्यनेन ब्रह्मदत्ते सप्तम्यां पञ्चालाद्द्वितीया प्राप्नोति, अनेद्योत्यस्य ब्रह्मदत्तनिष्ठस्य सम्बन्धस्य सप्तम्योक्तत्वेऽपि तद्द्योत्यपञ्चालनिष्ठसम्बन्धस्य तयाऽसम्प्रत्ययात्" इत्युक्तम्। उपपदविभक्तेरितिन्यायेन समाहितमित्यादेवत्। विशेष्यपदात्यष्ठीयारकयुक्त्याऽपि तद्वारण बोध्यम्। अत एव स्वस्वामिभावोऽवयवाऽवयविभाव इत्यादिर्व्यवहार। सचैकदेशाऽवच्छेदेन विशेष्यविशेषणोभयनिष्ठ इतिबोध्यम्।

भेदभेदकयोश्चैकसम्बन्धोऽन्योन्यमिष्यते ।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥ इति ।

स च सम्बन्ध स्वस्वामिभावत्वादिवच्छब्देन सम्बन्धत्वेन रूपेण च षष्ठीरूपः । आद्यम्—अनेकसम्बन्धसत्त्वेऽपि सम्बन्धिविशेषतात्पर्येण 'चैत्रस्य नेदं धनम्' इत्यादौ। अन्त्यन्तु—देवदत्तस्य पाणिपुष्पकमलानि' इत्यादौ। तच्छब्देन चोद्घादेव-"एकस्यां षष्ठ्यर्थायां आया, मौना, मौखा, सौवारश्चेति" "षष्ठी स्थाने" इति सूत्रे भाष्यं सङ्गच्छते ।

नन्वेवं 'राज्ञः पुरुष' इत्यत्र पुरुषपदादपि षष्ठी स्यादिति चेन्न—भेदे सति विशेषणतया विवक्षितस्य सम्बन्धस्य विना विशेषणत्वाऽसम्भवेन तन्नियामकत्वे नाऽऽकाङ्क्षितत्वात् विशेषणो सम्बन्ध उद्भूत, इति तद्वाचकादेव सम्बन्धार्थिका षष्ठी। विशेष्यस्य तु पदार्थान्तरनिरूपितसम्बन्धमन्तरेणाऽपि स्वप्रवृत्तिनिमित्त निरूपितविशेष्यत्वस्य भानमिति न विशेष्यतानियामकसम्बन्धाऽऽकाङ्क्षेति तत्र सम्बन्धस्य बहिरङ्गत्वेन अन्तरङ्गत्वात्प्रातिपदिकार्थवाचिका प्रथमैव भवतीति स्थो कारात्। वदुक्तं प्रकृतसूत्रे भाष्ये—"यथैव तर्हि राजनि स्वकृत स्वामिन्य वश पष्ठी भवत्येव पुरुषेऽपि स्वामिकृत स्वत्व, वश पष्ठी प्राप्नोति। राजशब्दस्तुल्यजा तीयया षष्ठ्याऽभिहित सोऽर्थ इति कृत्वा पुरुषशब्दात्षष्ठी न भविष्यति" इति। तस्योक्त एवाशय । हरिणाऽपि—

"द्विष्ठोऽप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते ।
तत्राऽभिधीयमानश्च प्रधानेऽप्युपयुज्यते ॥"

इत्युक्तम्। परार्थत्वात्=परप्रति विशेषणत्वेन विवक्षितत्वादित्यर्थ । व्यतिरिच्यते उद्भूततया प्रतीयत इत्यर्थ । प्रधाने तस्यान्वयोगश्च तत्सम्बन्धाऽवच्छिन्न गुणनिष्ठप्रकारतानिरूपितविशेष्यताया भानमिति बाध्यम्। अत्र मूले विशेषण षष्ठीपारतन्त्र्य प्रकारतया भानमङ्गीकृत्य प्राचामुक्तमादिति ध्येयम्।

संयोग इवाऽभेदोऽपि सम्बन्धो नास्त्येव, तस्य सम्बन्धत्वे मानाऽभावात्, सम्बन्धस्य द्विष्ठत्वात्। अत एव 'आद्यन्तवत्सूत्रे 'गवो शिर' इत्यादौ षष्ठ्युपादनाय व्यपदेशिवद्भाव इति भाष्य उक्तम्। किञ्च तस्य सम्बन्धत्वे 'नीलो घट' इत्यादौ षष्ठ्याऽऽपत्ति 'भेदसम्बन्ध एव षष्ठी'त्यपस्य सूत्रोक्तेरभावात्। नाऽऽ

भेदक सम्बन्धनिरूपको, भेद्य सम्बन्धाश्रयः । इति षट्कारकाणि ॥

अथ नामार्थ । अत्र मीमासका —शब्दाना जातौ शक्तिर्लाघवात् ।

काङ्क्षालभ्य स इति वाच्यम्, वाक्ये विशेष्यविशेषणभावाऽतिरिक्तस्याऽऽकाङ्क्षा लभ्यत्वाऽभावात् । एवञ्च 'वीर पुरुष' इत्यादौ पददयोपस्थाप्ययोरेकत्वेन सम्बन्धाऽभावेऽपि विशेष्यविशेषणभावो बोध्य । अत एव प्रतिपादिकार्थसूत्रे 'विशेष्यविशेषणभावस्याऽधिकस्य प्रतीत्या प्रथमा न प्राप्नोती' त्याशङ्क्य यद् ग्राऽधिकं स वाक्याय इति समाहितम् । तस्मात् विशेष्यविशेषणभावो द्वेधा—द्वयार्थर्मिणो सम्बन्धेन वैकत्वेन वेति बोध्यम् । तस्मा'दमेदान्वय' इत्यस्याऽ'भेदेऽप्यन्वयो विशेष्यविशेषणभाव (विशेषणविशेष्यभाव) इत्येवार्थो नत्वभेदसंसर्गको बोध' इति । किञ्च वीरत्वपुरुषत्वोभयसमूहवान् 'वीरः पुरुष' इति बोध । अत एव कर्मधारयविषये द्वन्द्वाऽपादानं भाष्ये शङ्कितम् 'चार्थे द्वन्द्व' इति सूत्रे इत्यलम् ।

अत्रेदमपि बोद्धव्यम्—कर्मविहितद्वितीयादीना कर्मत्वशक्तिमानर्थ, क्रियाकारकभाव (क्रियाकर्मभाव) सम्बन्धश्चार्थ —"राज्ञ पुरुष' इत्यत्र राजपुरुषयो सम्बन्धस्य षष्ठी वाचिका, 'कष्ट श्रित' इत्यत्र क्रियाकारकयो सम्बन्धस्य द्वितीया वाचिका" इति समर्थसूत्रस्थभाष्यात् । एवञ्च — हरिं भजती'त्यादौ हर्यभिन्न कर्मत्वशक्तिमद्विशिष्ट क्रियाकारकभावसम्बन्धेन भजनमिति (हर्यभिन्नकर्मत्वशक्तिमन्निष्ठक्रियाकारकभावसम्बन्धाऽवच्छिन्नप्रकारतानिरूपितविशेष्यताशालिभजन - मिति) रीत्या बोध । कर्तृतृतीयाया कर्तृत्वशक्तिमान् कर्तृक्रियाभावसम्बन्धश्चार्थ । करणतृतीयायाः करणत्वशक्तिमान् क्रियाकरणभावसम्बन्धश्चार्थ । सम्प्रदानचतुर्थ्या सम्प्रदानत्वशक्तिमान् क्रियाकारकभावसम्बन्धश्चार्थ । एवमन्यत्राऽप्यूह्यम् । प्रथमा यास्तु सूत्रमते प्रातिपदिकार्थ एवाऽर्थः, वार्तिकमते उक्तत्वेच्छशक्तिमान् क्रियाकारकभावसम्बन्धश्च तदर्थ । उपकार्योपकारकभावसम्बन्धश्च तादर्थ्यचतुर्थ्यर्थ । ज्ञाप्यज्ञापकभाव सम्बन्धश्च सप्तम्या अर्थ इत्यलम् । इति कारकवाद ।

कारकवादे कारकविहितसुपामर्थाना निरूपणादनन्तरं मुख्यदेश्यत्वेन स्मृतस्य नाम्नोऽर्थाना प्रसङ्गसङ्गत्या निरूपणारम्भ प्रतिजानीते—अथ नामार्थ इति । निराकरणार्थं मीमांसकमतमनुवदति—अत्र मीमासका इत्यादिना । जावावितिजातिरिति प्रवृत्तिनिमित्तोपलक्षणम् । तेन गौ, शुक्ल, चलो, डित्थ इत्येतेषां

भेदभेदकयोश्चैकसम्बन्धोऽन्योन्यमिष्यते ।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥ इति ।

स च सम्बन्ध स्वस्वामिभावत्वादितद्रूपेण सम्बन्धत्वेन रूपेण च षष्ठीशक्य । आद्यम्—अनेकसम्बन्धसत्त्वेऽपि सम्बन्धविशेषतात्पर्येण 'चैत्रस्य नेत्र घास' इत्यादौ। अन्त्यन्तु—देवदत्तस्य पाणिपुष्पकम्मलानि' इत्यादौ । तद्रूपेण बोधादेव-"एकशत् षष्ठ्यर्थो आर्या, मौना, मौखा, स्त्रौवार्श्चेति" "षष्ठी स्थाने" इति सूत्रे माष्यं सङ्गच्छते ।

नन्वेव 'राज्ञ पुरुष' इत्यत्र पुरुषपदादपि षष्ठी स्यादितिचेन्न—भेदे सति विशेषणतया विवक्षितस्य सम्बन्ध विना विशेषणत्वाऽसम्भवेन तन्नियामकत्वे नाऽऽक्षाद्वितत्वात् विशेषणे सम्बन्ध उद्भूत, इति तद्बोधकादेव सम्बन्धार्थिका षष्ठी । विशेष्यस्य तु पदार्थान्तरनिरूपितसम्बन्धमन्तरेणाऽपि स्वप्रवृत्तिनिमित्त निरूपितविशेष्यत्वस्य भानमिति न विशेष्यतानियामकसम्बन्धाऽऽक्षाङ्क्षेति तस्य सम्बन्धस्य बहिरङ्गत्वेन अन्तरङ्गत्वात्प्रातिपदिकार्थवाचिका प्रथमैव भवतीति स्थे कारयात् । तदुक्तं महतसूत्रे भाष्ये—"यथैव तर्हि राज्ञि स्वकृत, स्वामित्व, तत्र षष्ठी भवत्येव पुरुषेऽपि स्वामिकृत स्वत्व, तत्र षष्ठी प्राप्नोति । राजश्, दद्युत्पत्त्य मानया षष्ठ्याऽभिहित सोऽर्थ इति कृत्वा पुरुषशब्दात्षष्ठी न भविष्यति" इति । तस्योक्त एवाशय । हरिणाऽपि—

"द्विष्ठोऽप्यसौ परार्थत्वाद्गुणेषु व्यतिरिच्यते ।
तत्राऽभिधीयमानश्च प्रधानेऽप्युपयुज्यते ॥"

इत्युक्तम् । परार्थत्वात् = परम्प्रति विशेषणत्वेन विवक्षितत्वादित्यर्थ । व्यतिरिच्यते उद्भूतवया प्रतीयत इत्यर्थ । प्रधाने तस्योपयोगश्च तत्सम्बन्धाऽवच्छिन्न गुणनिष्ठप्रकारतानिरूपितविशेष्यताया मानमित्ति बोध्यम् । अत्र मूले विशेष्या स्यष्ठीवारणन्तु प्रकारतया मानमङ्गीकृत्य प्राचामनुरोधादिति ध्येयम् ।

सयोग इवाऽभेदोऽपि सम्बन्धो नास्त्येव, तस्य सम्बन्धत्वे मानाऽभावात्, सम्बन्धस्य द्विष्ठत्वात् । अत एव 'आद्यन्तवत्सूत्रे 'राहो शिर' इत्यादौ षष्ठ्युप पादनाय व्यपदेशिवद्भाव इति भाष्य उक्तम् । किञ्च तस्य सम्बन्धत्व 'नीलो घट' इत्यादौ षष्ठ्याऽऽपत्ति 'भेदसम्बन्ध एव षष्ठी'त्यर्थस्य सूत्रतोऽलाभात् । नचाऽऽ

भेदक सम्बन्धनिरूपको, भेद्य सम्बन्धाश्रय । इति षट्कारकाणि ॥
अथ नामार्थ । अत्र मीमासका —शब्दाना जातौ शक्तिर्लाघवात् ।

काङ्क्षालभ्य स इति वाच्यम्, वाक्ये विशेष्यविशेषणभावाऽतिरिक्तस्याऽऽकाङ्क्षा लभ्यत्वाऽभावात् । एवञ्च 'वीर. पुरुष' इत्यादौ पदद्वयोपस्थाप्यव्यक्त्योरेकत्वेन सम्बन्धाऽभावेऽपि विशेष्यविशेषणभावो बोध्य । अत एव प्रतिपादिकार्थेसूत्रे 'विशेष्यविशेषणभावस्याऽधिकस्य प्रतीत्या प्रथमा न प्राप्नोती' त्याशङ्क्य यद् ग्राऽधिक स वाक्याय इति समाहितम् । तस्मात् विशेष्यविशेषणभावो द्वेधा—द्वयोर्धर्मिणो सम्बन्धेन वैकत्वेन वेति बोध्यम् । तस्मा'दभेदान्वय' इत्यस्याऽ'भेदेऽप्यन्वयो विशेष्यविशेषणभाव (विशेषणविशेष्यभाव) इत्येवार्थो नत्वभेदसंसर्गको बोध' इति । किञ्च वीरत्वपुरुषत्वोभयसमूहवान् 'वीरः पुरुष' इति बोध । अत एव कर्मधारयविषये द्वन्द्वाऽपादानं भाष्ये शङ्कितम् 'चार्थे द्वन्द्व' इति सूत्रे इत्यलम् ।

अत्रेदमपि बोद्धव्यम्—कर्मविहितद्वितीयादीना कर्मत्वशक्तिमानर्थ, क्रिया-कारकभाव (क्रियाकर्मभाव) सम्बन्धश्चार्थ —"राज्ञ पुरुष' इत्यत्र राजपुरुषयो सम्बन्धस्य षष्ठी वाचिका, 'कट श्रित' इत्यत्र क्रियाकारकयो सम्बन्धस्य द्वितीया वाचिका" इति समर्थसूत्रस्यभाष्यात् । एवञ्च— हरिं भजती'त्यादौ हर्यभिन्न कर्मत्वशक्तिमद्विशिष्ट क्रियाकारकभावसम्बन्धेन भजनमिति (हर्यभिन्नकर्मत्वशक्तिमन्निष्ठक्रियाकारकभावसम्बन्धाऽवच्छिन्नप्रकारतानिरूपितविशेष्यताशालिभजन - मिति) रीत्या बोध । कर्तृतृतीयाया कर्तृत्वशक्तिमान् कर्तृक्रियाभावसम्बन्धश्चार्थ । करणतृतीयायाः करणत्वशक्तिमान् क्रियाकरणभावसम्बन्धश्चार्थ । सम्प्रदानचतुर्थ्या सम्प्रदानत्वशक्तिमान् क्रियाकारकभावसम्बन्धश्चार्थ । एवमन्यत्राऽप्यूह्यम् । प्रथमा यास्तु सूत्रमते प्रातिपदिकार्थ एवाऽर्थः, वार्तिकमते उक्तत्तच्छक्तिमान् क्रिया-कारकभावसम्बन्धश्च तदर्थ । उपकार्योपकारकभावसम्बन्धश्च तादर्थ्यचतुर्थ्यर्थ । ज्ञाप्यज्ञापकभाव सम्बन्धश्च सतिसप्तम्या अर्थ इत्यलम् । इति कारकवाद ।

कारकवादे कारकविहितसुपामर्थानां निरूपणादनन्तर सुबुद्देश्यत्वेन स्मृतस्य नाम्नोऽर्थाना प्रसङ्गसङ्गत्या निरूपणारम्भ प्रतिजानीते—अथ नामार्थ इति । निराकरणार्थं मीमांसकमतमनुवदति—अत्र मीमासका इत्यादिना । जाताविति—जातिरिति प्रवृत्तिनिमित्तोपलक्षणम् । तेन गौ, शुक्ल, चलो, डित्थ इत्येवंपो

व्यक्तीनामानन्त्येन तत्र शक्तौ गौरवात्। "नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते" इति न्यायस्य विशेषणे शक्तिर्विशेष्ये लक्षणेति तात्पर्यात्। किञ्च एकस्या व्यक्तौ शक्त्युपदेशे व्यक्त्यन्तरे तदभावेन तद्बोधाप्रसङ्गात्। गामानयेत्यादावन्वयानुपपत्त्या तदाश्रयलक्षकत्वेन निर्वाहश्चेत्याहुः। तन्न। गोत्वमस्तीत्यर्थेऽन्वयानुपपत्त्यभावेन गौरस्तीति प्रयोगे व्यक्तिमाना नापत्तेः। व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजातेरुपलक्षणत्वेन तदैक्येन

जातिगुणक्रियासञ्ज्ञानिरूपितशक्तिमत्त्व सिद्धयति। गौरवादिति—अनन्तशक्ति कल्पनापत्तेरित्यर्थः। ननु नागृहीतविशेषणेतिन्यायेन विशेषणविशेष्ययोर्भाति व्यक्त्योरुभयोरपि शक्तिरावश्यकीत्यत आह—नागृहीतेति। विशेषणे शक्ति रिति—विशिष्टज्ञान प्रति विशेषणज्ञानस्य कारणत्वेनान्तरङ्गत्वात् विशेषण एव शक्तिरितिभाव। तदुक्तम्—'विशेष्य नाऽभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति। ननु एकस्यां व्यक्तावेव शक्त्युपदेशे गौरव नास्तीत्यत आह—किञ्चेति। तद्बोधाऽप्रसङ्गादिति—तद्विषयकशाब्दबोध प्रति तद्विषयकशक्तिग्रहस्य कारणत्व मित्युक्तत्वात्, अन्यथा गवादिपदादश्वादेरपि बोधापत्तेरितिभाव। मीमांसकमत निराकरोति—तन्नेति। अन्वयाऽनुपपत्त्यभावेनेति—अन्वयानुपपत्तेरेव तन्मते लक्षणाबीजत्वात् व्यक्तौ लक्षणाऽनापत्तिरिति भाव। जातेरुपलक्षणत्वेनेति—एतदेव जात्यादेरुपलक्षणत्वम् यत् स्वाऽऽश्रयाणां सर्वेषां स्वरूपत शक्तिग्रह विषयत्व संपाद्य स्वय शक्तिग्रहाऽविषयो बोधाऽविषयश्च भवतीति। यथा—'य शुक्लवासा स देवदत्त' इत्यादौ शुक्लवाससोपलक्षिते शक्तिग्रहेऽपि देव दत्तपदजन्यबोधे न तद्भानम्, तथा जात्यादेरपि न भानम्। यथा वा—'काक-वन्तो देवदत्तस्य गृहा' इत्यादौ काक स्वोपलक्षितान् देवदत्तस्य गृहानितरेभ्यो व्यावर्तयति तथा जातिरपि स्वाश्रयव्यक्तीरितराभ्यो व्यावर्तयतीति। उपलक्षण त्वञ्च—स्ववृत्तिप्रतियोगि समानाधिकरणविभिन्नकालिकाऽभावप्रतियोगित्वमिति। स्वम् उपलक्षणीय ग्राह्यम्। यथा 'काकवन्तो गृहा' इत्यत्र स्व = गृहा, तद्वृत्ति प्रतियोगिसमानाधिकरणविभिन्नकालिकोऽभाव'—'अन्यदा काको नास्ती'ति, तत्प्रतियोगित्व काकस्येति काक उपलक्षणम्। प्रकृते स्व = व्यक्ति, तद्वृत्ति प्रतियोगिसमानाधिकरणो विभिन्नकालिकोऽभावः—व्यक्तिपक्ष स्वविषयकबोध

च तादृशजात्युपलक्षितव्यक्तौ शक्तिस्वीकारेणानन्तशक्तिकल्पनाविरहेण गौरवात्। लक्ष्यतायच्छेदकतीरत्वादिवत् शक्यतायच्छेदकस्यावाच्यत्वे दोषाभावात्। नागृहीतेति न्यायस्य विशेषणविशिष्टविशेष्यबोधे तात्पर्येऽपि त्वदुक्ततात्पर्ये मानाभावात्। जातेरुपलक्षकत्वेन तदाश्रयसकलव्यक्तिबोधेनानन्तव्यक्तिबोधाप्रसङ्गभङ्गाच्च। तदाह—

आनन्त्येऽपि हि भावानामेक कृत्वोपलक्षणम्।
शब्द सुकरसम्बन्धो न च व्यभिचरिष्यति॥ इति।

विषयत्वसम्बन्धेन जात्यादिर्नास्तीति, तत्प्रतियोगित्व जात्यादेरिति समन्वय। अनित्यविद्यमानत्वे सति व्यावर्तकत्वमुपलक्षणत्व, नित्यविद्यमानत्वे सति व्यावर्तकत्व विशेषणत्वमिति च फलितं भवति। अनन्तशक्तिकल्पनाविरहेणेति—जात्युपलक्षितव्यक्तौ शक्तिस्वीकारे एकयैव शक्त्या जात्युपलक्षितानां सकलव्यक्तीनां बोधस्य सम्भवादिति भाव। ननु जाते शक्यताऽवच्छेदकत्वे तस्या अपि वाच्यत्व मावश्यकमित्यत आह—लक्ष्यताऽवच्छेदकतीरत्वेति। उक्तरीत्योपलक्षणविधया शक्यताऽवच्छेदकत्वे शक्तिग्रहविषयत्व नावश्यकमिति भाव। त्वदुक्ततात्पर्य इति—विशेषणे शक्तिर्विशेष्ये लक्षणेति शक्तिलक्षणाप्रवेशांशे मानाभाव, तत्र न्याये शुद्धिपदेन प्रत्यक्षादीनामपि ग्रहणात्तत्र शक्तिलक्षणयोरसम्भवादिति भाव। किञ्चैकस्यां व्यक्तावित्यादिना यदुक्त तन्निराकरोति—जातेरुपलक्षकत्वेनेति। तदाश्रयसकलव्यक्तीति—नहि एकस्यामेव कस्याञ्चिद्व्यक्तौ शक्ति स्वीक्रियते, किन्तु जात्युपलक्षितासु यावतीष्वेव व्यक्तिषु एकैव शक्तिः कल्प्यत इति भाव।

तदाहेति—अस्य हरिरिति शेष। आनन्त्येऽपीति—भावानाम् = व्यक्तीनाम् आनन्त्येऽपि (व्यक्तौ पदार्थे अनन्तव्यक्तिनिरूपिताऽनन्तव्यक्तिकल्पनापत्ति र्नास्ति, न वा सकलव्यक्तिबोधकैकशक्तिस्वीकारे व्यक्तीनामानन्त्यात् शक्तिग्रहाऽशक्यत्वम्, यस्मात्) एक = प्रवृत्तिनिमित्तात्मकं जात्यादिरूपमनुगतधर्मम् उपलक्षण परिचायकं कृत्वा = स्वीकृत्य (तादृशैकधर्मोपलक्षितासु यावतीष्वेव व्यक्तिषु परिचायकधर्मस्यैक्यात्, परिचायकधर्मज्ञानद्वारेण) शब्दो गौरित्यादि सुकरसम्बन्ध सुग्रहवाच्यवाचकभावसम्बन्धात्मकशक्ति (भविष्यति। प्रवृत्तिनिमित्ताऽवच्छिन्न

युक्त ह्येतत् ।

शक्तिग्रह व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यत सिद्धपदस्य वृद्धा ॥

निरूपितैकशक्तिस्वीकारे अत्रच्छेदकस्य प्रवृत्तिनिमित्तस्यैक्येन अनन्तानामपि व्यक्तीनामेकप्रवृत्तिनिमित्ताश्रयीभूतानामेकप्रवृत्तिनिमित्तस्य ज्ञानद्वारा ज्ञानस्य सम्भवेन अनन्तास्वपि व्यक्तिषु शब्दस्यैकस्या एव शक्तेर्ज्ञानं सुलभमेव भविष्यतीति यावत् । एवञ्च शब्दः समास्वपि व्यक्तिषूपलक्षणीभूतप्रवृत्तिनिमित्तज्ञानद्वारेण सुग्रहशक्तिकत्वात् शक्तिग्रहतो) न च व्यभिचरिष्यति=न च पृथग्भूत्वा चरिष्यति=बोधयिष्यतीत्यर्थ । अत्राऽयं परिष्कार—सहचारो हि द्विविध—अन्वय सहचारो व्यतिरेकसहचारश्च । कारणसत्वे कार्यसत्वमन्वयसहचार । कारणाऽभावे कार्याऽभावो व्यतिरेकसहचार । सहचारभङ्ग एव च व्यभिचार । एवञ्च व्यभिचारोऽपि द्विविध—अन्वयव्यभिचारो व्यतिरेकव्यभिचारश्चेति । शाब्दबोध प्रति शक्तिज्ञानस्य कारणत्वात्—यत्र यत्र विषयतासम्बन्धेन शक्तिग्रह तत्र तत्र स्वजन्य बोधीयविषयतासम्बन्धेन शब्द, यत्र यत्र च तेन सम्बन्धेन शक्तिग्रहाऽभावस्तत्र तत्र तेन सम्बन्धेन शब्दाऽभाव इति शक्तिग्रहशब्दयो सहचारो फलत । यदि च प्रवृत्तिनिमित्तस्योपलक्षणत्वमनादृत्यैव सकलव्यक्तिषु एका शक्ति स्वीक्रियेत शब्दस्य । अनन्तव्यक्तिषु च शक्तिज्ञानाऽसम्भवेन शक्तिग्रहाऽविषयीभूतव्यक्तेरपि बोधश्चाङ्गीक्रियते तर्हि शक्तिग्रहाऽभावसत्वेऽपि उक्तसम्बन्धेन शब्दाऽभावस्याऽसत्वात् शब्दे व्यतिरेकसहचारस्य भङ्गरूपो व्यतिरेकव्यभिचार स्फुट एव स्यात् । किन्तु एव नास्ति यत प्रवृत्तिनिमित्तस्योपलक्षणत्वमादृत्य तदवच्छिन्नासु सकला स्वेव व्यक्तिषु शक्तिग्रहस्य विद्यमानत्वमेवास्ति न च कुत्रचिदभावा यथोक्त सम्बन्धेन शब्दस्य स्थितिरस्तीति नाऽत्र शब्दा व्यभिचारी भवतीत्यलम् ।

युक्त ह्येतत् इति—एतत्=व्यक्तेर्वाच्यत्वम् हीतिनिश्चयेन युक्तमित्यर्थः । ननु कस्मादेतद्युक्तम् ? इत्यत आह—शक्तिग्रहमिति—व्याकरणाच्छक्तिग्रहो यथा—पचति, पाचक इत्यादौ । आद्ये 'ल कर्मणि च भावे चाकर्मकेभ्य' इत्य नेन प्रत्ययस्य 'डुपचष् पाके' इत्यनेन च प्रकृते शक्तिग्रह । अन्त्ये च 'कर्तरि कृत्' इत्यनेन प्रत्ययस्य 'डुपचषपाके' इत्यनेन च प्रकृते स । उपमानाद्

इत्येतेषु शक्तिग्राहकशिरोमणिर्व्यवहारो व्यक्तावेव शक्तिं ग्राहयति

'गौरिव गवय' इति वाक्यात् गवयपदस्य शक्तिग्रह । कोशात्—'अमरा निर्जरा देवा' इत्यादितोऽमरादिपदानां शक्तिग्रह । आप्तवाक्यात् 'लक्षणलक्षणे व्याकरणम्' इत्यादितो व्याकरणादिपदानां शक्तिग्रह । आप्तत्वञ्च—तदर्थविषयक यथार्थज्ञानवत्त्वम् । व्यवहारात्=प्रयोज्यप्रयोजकवृद्धव्यवहारात्—'घटमानये'त्या दिवाक्यानां तद्घटकपदानाञ्च शक्तिग्रह । यथा—प्रयोजकवृद्धेन प्रयोज्यवृद्ध-मुद्दिश्य—'घटमानय' इत्युक्ते घटमानयनं प्रयोज्यवृद्ध पश्यता बालेन—'अस्य प्रयोज्यवृद्धस्य चेष्टा घटाऽऽनयनविषयकप्रवृत्तिजन्या चेष्टात्वात्, मदीयस्तन्यपाना त्मकचेष्टावत्' इति चेष्टाकारणीभूता तदीयप्रवृत्तिरनुमीयते । तत —'अस्य प्रयोज्य वृद्धस्य प्रवृत्ति —घटानयनविषयकेच्छाजन्या प्रवृत्तित्वात्, मदीयस्तन्यपानविषय कप्रवृत्तिवत्' इति प्रवृत्तिकारणीभूतामिच्छामनुमिनोति । तत —'अस्य प्रयोज्य वृद्धस्येच्छा—'घटानयन मदिष्टसाधनम्' इतीष्टसाधनताज्ञानजन्या इच्छात्वात्, मदीयेच्छावत्' इतीच्छाकारणीभूतमिष्टसाधनत्वप्रकारकज्ञानमनुमिनोति, तत — 'अस्य मध्यमवृद्धस्य घटानयनविषयकेष्टसाधनताज्ञान 'घटमानये'ति प्रयोजक-वृद्धप्रयुक्तवाक्यजन्य तदन्वयव्यतिरेकसहचारित्वात्, यो हि यदन्वयव्यतिरेकसह चारी स तज्जन्यो यथा दण्डान्वयव्यतिरेकसहचारी घटो दण्डजन्य' इति वाक्यमेव तत्कारणत्वेनानुमिनोति । एव रीत्या 'घटमानये'ति वाक्यस्य 'घटानयन मदिष्ट साधनम्' इत्यर्थे तादृशव्यवहारात् शक्तिग्रहो भवति । तत आवापोद्वापाभ्यां पदादिष्वपि तत्तदर्थविषयकशक्तिग्रहो जायते इति । वाक्यस्य शेषात्—'यवैर्जुहोती'त्यत्र यवपदस्य दीर्घशूकविशिष्टे आर्याणा प्रयोगात् कङ्गौ म्लेच्छाना प्रयो-गात् क शक्तिरितिसन्देहे—'यत्राऽन्या ओषधयो म्लायन्ते अयैते मोदमाना स्तिष्ठन्ति" इति वाक्यशेषेण दीर्घशूकविशिष्टे तन्निर्णय (तच्छक्तिग्रह)। विवरणस्य शक्तिग्राहकत्व यथा—'पाक करोति', 'पाकानुकूला भावना' इत्यादि विवरणेन पचतीत्यस्य शक्तिग्रह इति । सिद्धपदस्य प्रसिद्धार्थकपदस्य—'इह सह कारतरौ मधुरं पिको रौति' इत्यादौ सहकार इत्यादेः सन्निधानात्—पिकादिपदानां कोकिलादौ शक्तिग्रह इति ।

शक्तिग्राहकशिरोमणिरिति—व्यवहारस्य शक्तिग्राहकशिरोमणित्वञ्च—

गवादिपदेन लोके व्यक्तेरेव बोधात्।

वस्तुतस्तु "न ह्याकृतिपदार्थकस्य द्रव्य न पदार्थ" इति सूत्र सूत्रभाष्याद्विशिष्टमेव वाच्य तथैवानुभवात्। अनुभवसिद्धस्यापलापा नर्हत्वाच्च।

लिङ्गमपि नामार्थ। प्रत्ययाना द्योतकत्वात्। अन्यथा वागुपानद्

बालानामाद्यबोधकालिकत्वेनान्तरङ्गत्वमूलकमित्युक्त प्राक्। इतिसरूपसूत्रभाष्यादिति—इत्यादिसरूपसूत्रभाष्यादित्यर्थ। एवं हि तत्र भाष्यम्—"नह्याकृतिपदार्थकस्य द्रव्य न पदार्थो, द्रव्यपदार्थकस्य वा आकृतिर्न पदार्थः, उभयोरुभय पदार्थ। कस्यचित्तु किञ्चित्प्रधानभूत किञ्चिद्गुणभूतम्। आकृतिपदार्थकस्याऽऽकृति प्रधानभूता, द्रव्य गुणभूतम्। द्रव्यपदार्थकस्य द्रव्यं प्रधानभूतमाकृतिर्गुणभूता" इति। एतेन 'विशिष्टमेव वाच्यमि'त्युत्तरमन्याऽसङ्गति, "नह्याकृतिपदार्थकस्य द्रव्य न पदार्थ" इति भाष्येण आकृतिद्रव्ययोर्वाच्यतायालाभेऽपि तयोर्वैऽशिष्टयस्याऽलाभादिति परास्तम्, "किञ्चित्प्रधानभूतम् किञ्चिद्गुणभूतम्" इति भाष्यशेषेण तयोर्वैशिष्टयस्य स्फुटमेव लाभात्।

विशिष्टमिति—आकृतिविशिष्ट द्रव्यम्, द्रव्यविशिष्टाऽऽकृतिर्वेत्यर्थ। मूले च सामान्ये नपुसकम्। तत्र आकृतेः प्राधान्ये—'ब्राह्मणो न हन्तव्य' 'सुरा न पेया' इति एकत्व स्वरसत उपपन्न भवति। अत्र द्रव्यद्वारक क्रियान्वय इति कैयटः। द्रव्यप्राधान्ये च— ब्राह्मणौ' 'ब्राह्मणौ' 'ब्राह्मणा' इति लिङ्गवचन योग स्वरसत उपपन्ना भवति। आकृतिप्राधान्येऽपि द्रव्यसङ्ख्यामादाय द्विवच नाद्युपपत्तिर्बोध्या। तदुक्तं कैयटेन—'यथा—पचति, पचतः, पचन्तीतिक्रिया प्राधान्येऽपि साधनसङ्ख्याकृतो वचनभेद, एवमाकृतिप्राधान्येऽपि द्रव्यसङ्ख्या कृत इत्यदोष' इति। तुल्यन्यायात् द्रव्यप्राधान्यवादेऽपि क्वचिदाकृतिसङ्ख्या मादायैकवचनम् 'ब्राह्मणो न हन्तव्य' इति। अधिकन्त्वन्यत्र द्रष्टव्यम्। आकृति प्राधान्यवादी आचार्यो वाजप्यायन, द्रव्यप्राधान्यवादी च व्याडिरिति "आकृत्य भिधानाद्वैक मिभक्तौ वाजप्यायन" "द्रव्याभिधानं व्याडि"रित्यादिवार्तिकभा ष्याभ्यां लभ्यत इत्यलम्।

लिङ्गमपि नामार्थ इति—लिङ्गं प्रकृतेः परिणामविशेष। तच्च त्रिविधम्—

दिशब्देभ्य इय त्व वागिति स्त्रीत्वबोधानापत्ते । अयमिति व्यवहारविषयत्व पुस्त्वम्, इयमितिव्यवहारविषयत्व स्त्रीत्वम्, इदमितिव्यवहारविषयत्वं क्लीवत्वमिति विलक्षण शास्त्रीय स्त्रीपुन्नपुसकत्वम्। अत एव

पुस्त्व, स्त्रीत्व, नपुसकत्वञ्चेति । अस्य नामार्थत्वे "ह्रस्वो नपुसके प्रातिपदिकस्य" "स्यमोर्नपुसकात्" "यचि क्ष्नाह्रा पुसि" इत्याद्यष्टाध्यायीसूत्राणि, लिङ्गानुशासन सूत्राणि, नामलिङ्गानुशासनात्मका कोशाश्च लिङ्गानि । अत एव च वागादि शब्दानां लिङ्गबोधकत्वोपपत्ति । रमादिशब्देष्वपि प्रत्ययानां द्योतकत्वमेव, वाच कत्व तु 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयो प्रत्ययार्थस्य प्राधान्यमि'ति तस्य प्राधान्यापत्तिरित्यलम् ।

इति विलक्षण शास्त्रीयमिति--अत्राऽय परिष्कार —

"स्तनकेशवती स्त्रीस्याल्लोमश पुरुष स्मृत ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥"

इति हि लौकिक लिङ्ग "स्त्रियामिति" सूत्रे वार्तिककृतोक्तम् । अत्र स्तनकेशौ भगस्योपलक्षणम्, अथवा केशशब्दो भगवाचक एव 'कामिन केशशूलिन्य' इत्यत्र तथा दर्शनात् । लोमशब्दस्तु शिश्नपर्यायः । अन्तरशब्दश्च सदृशवाची । तथा च—भगवत्त्व स्त्रीत्वम्, शिश्नवत्त्व पुंस्त्वम्, भगशिश्नाऽन्यतराऽभाववत्त्वे सति स्त्रीपुससदृशत्व नपुसकत्वमिति लक्षणम् । तृतीये—मयूरीकुक्कुटादिद्वन्द्ववाच्यस्य स्त्रीपुससमुदायस्य नपुसकत्ववारणाय सत्यन्तम्, अन्यथा भवति हि समुदाय समुदायिन सदृश इति स्यान्नपुसकत्वम्। अव्ययाख्यातार्थस्य नपुसकत्व वारणाय स्त्रीपुससदृशत्वमिति । सादृश्यञ्च—भगशिश्नाऽन्यतराकृतिचिह्नत्वेन । वार्तिके यद्यपि लिङ्गिनो लक्षण तथापि तद्द्वारा लिङ्गलक्षणमेव तात्पर्यविषयीभूतमितिबोध्यम् ।

नन्विद लक्षण स्टट्वाधृद्धतटादिष्वव्याप्तमितिचेत्—अत्र "स्त्रिया" मितिसूत्रे भाष्यवार्तिककृत –"तस्मान्न वैयाकरणै शक्य लौकिक लिङ्गमास्थातुम् । अवश्यञ्च कश्चित्स्यकृतान्त आस्थेय । कोऽसौ स्वकृतान्त ? 'संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्वत' सस्त्यानं (तिरोभाव) स्त्री, प्रवृत्तिश्च (आविर्भाव) पुमान् । कस्य पुन सस्त्यान स्त्री ? प्रवृत्तिर्वा पुमान् ? गुणानाम् । केषाम् ?

शब्दस्पशरूपरसगन्धानाम्। सर्वाश्च पुनर्मूर्तय एवमात्मिका संस्त्यानप्रसवगुणा शब्दस्पर्शरूपरसगन्धवत्य । प्रवृत्ति खल्वपि नित्या। नहीह कश्चिदपि स्वात्मन्या त्मनि मुहूर्तमप्यवतिष्ठते, वर्द्धते वा यावदनेन वर्धितव्यम्, अपायेन वा युज्यते। तच्चोभयं सर्वत्र। यद्युभय सर्वत्र कुतो व्यवस्था ? 'विवक्षात'। संस्त्यानविवक्षायां स्त्री, प्रसवविवक्षाया पुमान। उभय (योर) विवक्षाया नपुसकम्" इत्यादु। अत्र भाष्ये संस्त्यानप्रसवाभ्या तृतीयमपि साम्याऽवस्थात्मक स्थितिरूप लक्ष्यते। स्वकृतान्तेत्युक्त्वा साख्यशास्त्रीयगुणानां शब्दादीनां निदर्शनेन 'साङ्ख्याना साऽनुसारित्व व्याकरणस्य इति सूच्यते। सर्वस्य जगत सुखदु खमोहाऽन्वय त्कल्पितानि 'सत्त्वरजस्तमांसि' गुणा इति कथ्यन्ते साङ्ख्ये। एतत्त्रिगुणात्मिका प्रकृति महदादिसप्तकेन्द्रियादिषोडशकात्मना परिणमते, पुरुषस्तु न प्रकृतिनाऽ पि तद्विकृति केवलचैतन्यरूपोऽपरिणामी शुद्ध इति साङ्ख्यसिद्धान्त। गुणानां परिणामस्याऽपि वस्तुतस्तदात्मकत्वात् शब्दादिना भाष्ये सत्त्वादीनामेव तात्पर्ये विषयता बोध्या। 'मूर्तय' इति मूर्तिशब्देन भाष्ये सपिण्डितस्वेभावाश्चक्षुर्गोचर विवक्षिता, तेन वाय्वाकाशतेजसां रसग धयोरभावेऽपि नाऽसङ्गति'। पुल्वादि लिङ्गमिकस्य सवपदार्थव्यापित्वमाह भाष्ये—"प्रवृत्ति खल्वपि नित्या" इत्यादिना। अत्र प्रवृत्ति सत्त्वादीनामाविर्भावादिरूपः परिणामो लिङ्गसामान्यमितियावत्।

तदित्थम्—सत्त्वादिगुणानामाविर्भाव पुल्वम्, तिरोभावः स्त्रीत्वम्, स्थित्यपरपर्यायाऽन्तरालावस्था च नपुसकत्वमिति लक्षण फलितम्। तच्चार्थनिष्ठं केवलान्वयि, उक्तभाष्यात्। 'अय पदार्थ, इय व्यक्ति, इद वस्तु' इति व्यवहारस्य पदार्थमात्रे सत्त्वात्।

पुरुषो यद्यपि अपरिणामी गुणाविर्भावादिपरिहीन तथापि भोक्तृत्वाऽवस्थायां भोग्यवस्तुशवलित एव प्रतीयते, स एव च शब्दगोचर, नहि शुद्ध परिणाम रहित वस्तु शब्दविषय, आकाराऽवमर्शेनैव शब्दवाच्यत्वात्। एतेन पुरुषे परि णामाऽनभ्युपगमात् कथं 'पुरुष, चितिः, चैतन्यम्' इति लिङ्गत्रययोग इत्यपास्तम्। तत्र केनचिच्छब्देन किञ्चिदस्तु एकैकलिङ्गविशिष्टमेव, केनचिच्छब्देन लिङ्गद्व विशिष्टम्, केनचित्पर्यायेण लिङ्गत्रयविशिष्टमिति लिङ्गानुशासनादितो निर्णेयम्। तत्र लौकिकलिङ्गाऽसम्भवे शास्त्रीयलिङ्गे कार्यम्, तत्सम्भवे तु महासगाकरणाद्

खट्यादिशब्दवाच्यस्य स्तनकेशभगादिमत्त्वरूपलौकिकस्त्रीत्वाभावेऽपि तद्बोधकाट्टापादिप्रत्ययः ।

सङ्ख्याऽपि नामार्थं । विभक्तीना द्योतकत्वात् । अत एव "आदिर्ञिटुडव" इति सूत्रे बहुत्वे एकवचनम् । वाच्यत्वेऽन्वयव्यतिरेकाभ्या जस विना नामार्थबहुत्वप्रतीत्यभावापत्ते ।

कारकमपि प्रातिपदिकार्थं इति पञ्चक प्रातिपदिकार्थं । नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यमिति चेन्न । दधि तिष्ठति,दधि पश्येत्यादौ कर्त्रादिकारकप्रतीते प्रत्यय विनापि सिद्धत्वात् । न च लुप्तप्रत्ययस्मरणात्तत्प्रतीतिरिति वाच्यम् । प्रत्ययलोपमजानतोऽपि नामत एव तत्प्रतीते । विशेषणतया शब्दोऽपि शाब्दबोधे भासते । युधिष्ठिर आसीदित्यादौ युधिष्ठिरशब्दवाच्य कश्चिदासीदिति बोधात् ।

न सोऽस्ति प्रत्ययो लोके य शब्दानुगमादृते ।
अनुविद्धमिव ज्ञान सर्वं शब्देन भासते ॥ इत्यभियुक्तोक्ते ।

वद्विशिष्ट एव शास्त्रीयलिङ्गे कार्यम् । अत एव 'पशुना यजेत' इत्यत्र लौकिकपुस्त्वविशिष्टयाज्ञीयपुस्त्ववता यागो विधीयते, नतु पशुक्रिया शास्त्रीयपुस्त्वविशिष्टयाऽपीत्यलम् ।

सङ्ख्याऽपि नामार्थं इति—राम रामौ रामा इत्यादौ सङ्ख्याबोधस्याऽनुभवसिद्धत्वादिति भाव । ननु अन्वयव्यतिरेकाभ्या विभक्तेरेव तद्बोधजनकत्वमितिचेत्, न 'दधिमधु'इत्यादौ विभक्तिं विनाऽपि तत्प्रतीतेः । न च लुप्तविभक्तिस्मरणात्तत्प्रतीतिरितिवाच्यम् विभक्तिलोपमजानतोऽपि नामत एव तत्प्रतीते । ननु तर्हि 'द्व्येकयोर्द्विवचनैकवचने' इत्यादिसूत्राणां का गतिरितिचेत् न, सङ्ख्याद्योतकत्वेन तेषामुपपत्ते । तदाह—विभक्तीना द्योतकत्वादिति । आदिर्ञिटुडव' इति' इतिसूत्रे आदिरिति निर्देशोऽप्यत्रार्थेऽनुकूलः । तदाह—अत एवेति । पञ्चकमिति—जातिव्यक्तिलिङ्गसङ्ख्याकारकाणीत्यर्थ ।

एकं द्विकं त्रिकञ्चाऽथ, चतुष्कं पञ्चक तथा ।
नामार्थ इतिसर्वेऽमी पक्षा शास्त्रे निरूपिता ॥"

इत्यपि केषाञ्चिद्भणितिरत्र ।

न सोऽस्तीति—य प्रत्ययो ज्ञानं शब्दाऽनुगमात् शब्दभानात् ऋते =

प्राह्यत्व प्राहकत्व च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥
विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते ॥ इति वाक्यपदीयात् ।

अत एव विष्णुमुच्चारयेत्यादावर्थोच्चारणासम्भवाच्छब्दप्रतीति ।
अत एवानुकरणेनानुकार्य्यस्वरूपप्रतीतिः । तथाहि—स्वसदृशशब्द
मात्रबोधतात्पर्यकोच्चारणविषयत्वमनुकरणत्वम् । स्वसदृशशब्दप्रति
पाद्यत्वे सति शब्दत्वमनुकार्यत्वम् । तत्रानुकार्यादनुकरण भिद्यत इति
तयोर्भेदविवक्षायामनुकार्य्यस्वरूपप्रतिपादकत्वेनार्थवत्त्वात् प्रातिपदिक-
त्वात्स्वादिविधि । भेदपक्षज्ञापक "भुवोवुग्लुङ् लिटा" वित्यादिनिर्देश ।
अनुकार्यादनुकरणमभिन्नमित्यभेदविवक्षायां चार्थवत्त्वाभावान्न प्रातिपदि

विना (स्यात्) स प्रत्ययो लोके नास्त्येव, [वेदेऽपि स्यान्नवा] (यत) सर्व=
प्रत्यक्षानुमित्युपमितिशब्दजन्यात्मक ज्ञानं शब्देन अनुविद्धमिव नीरक्षीरन्यायेन
संभिन्नमिव भासते = अनुभवसीयमानं भवति [प्रत्यक्षानुमित्योरपि मूकबधिरयो
रपि आन्तरस्फोटसद्भिन्नत्वस्य सत्त्वान्नासगति सर्वज्ञानानुवेधनादेव च शब्दस्य
ब्रह्मरूपत्वमप्युपपद्यत इति द्रष्टव्यम्] इत्यर्थ । प्राह्यत्वमिति—यथा प्रदीप
स्व प्रकाशयन्नेव परप्रकाशको भवति, तथैव सर्वे शब्दाः स्वपरप्रकाशका भवन्ति
इतिभावार्थ । पृथगवस्थित इत्यनेन शब्देऽर्थे च शब्दानां लाघवात् खण्डशः
शक्तिरिति सूचितम् । घोषस्तु आकाङ्क्षया विशिष्ट एवेति 'विशेषणतया भापत'
इति नाऽसङ्गतम् । विषयत्वमिति—शब्दे स्वविषयत्वमनादृत्य स्वरूपमात्र
मङ्कृत्या अर्थो न प्रकाश्यते । शाब्दबोधस्यार्थोऽपि विषय स्वरूपमपि विषय इत्यर्थ ।

अनुकार्यादनुकरण भिद्यत इति—अत्र प्रमाणम्—"मतौ छ " इतिसूत्रस्य
भाष्यम् । तत्र हि—अस्यवामीयमित्यत्र 'अस्यवामस्ये'तिपदसमूहस्य वेदे पठ्यमानस्ये
कदेशानुकरणेऽस्यवामशब्दे छसिद्ध्यर्थम्, तस्य अनुकार्येणाऽर्थेनाऽर्थवत्त्वात्प्रातिपदि
कत्वस्य समर्थनाय-"योऽसावाम्नायेऽस्यवामशब्दः पठ्यते, सोऽस्य (छमकृतित्वेन
विधद्वितस्यास्यवामशब्दस्य) पदार्थ । किम्पुनरन्ये आम्नायशब्दा अन्य इमे!
ओमित्याह" इत्युक्तम् । अभिन्नमिति—'कृत्तद्धितसूत्रे "इदमर्थप्रकर्तव्यम्—
प्रकृतिवदनुकरणम् भवतीति । किं प्रयोजनम्! "हि पचन्ती" त्यादि—"तिङ

कत्व न वा पदत्वम् । अभेदपक्षज्ञापकस्तु भूसत्तायामित्यादिनिर्देशः । प्रातिपदिकत्वपदत्वाभावेऽपि भू इत्यादि साधु भवत्येव ।

ननु "अपद न प्रयुञ्जीत" इति भाष्यादसाध्विदमिति चेन्न । अपद मित्यस्य हि अपरिनिष्ठितमित्यर्थः । परिनिष्ठितत्वं च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वं, देवदत्तो भवतीत्यादौ "तिङ्ङतिङ" इति निघाते जातेऽतिङन्तपदपररूपोद्देश्यतावच्छेदकसत्त्वे अपरिनिष्ठितत्व वारणाय अप्रवृत्तेति । स्वरतीत्यादि विकल्पसूत्रस्य पाक्षिकप्रवृत्तौ सेद्धेत्यादावसाधुत्ववारणाय नित्यविधीति । अभेदपक्षे तु "अर्थवद्" इतिसूत्रस्यार्थवत्त्वरूपोद्देश्यतावच्छेदकानाक्रान्तत्वात्सूत्राप्रवृत्तावपि भू इत्यादि परिनिष्ठितम्, परिनिष्ठितसाधुशब्दौ पर्य्यायौ ।

न चानुकरणस्यानुकार्यस्वरूपबोधकत्वस्याप्यभावेन कथमनुकार्यरूपप्रतीतिरितिचेत् सादृश्याख्यसम्बन्धेनेति गृहाण । यथा मैत्रसदृशपिण्डदर्शने मैत्रस्मरणम् । एव भू इत्यादावनुकरणज्ञाने तादृशानुकार्यस्य ज्ञानमिति सङ्क्षेपः ।

अथ समासादिवृत्त्यर्थः । वृत्तिर्द्विधा । जहत्स्वार्थाऽजहत्स्वार्था च ।

तिङ्" इति निघातो यथा स्यात्" इति भाष्ये "प्रकृतिवत्" इत्यनेन लाघवात् सादृश्यमूलकाऽभेदविवक्षायामेव तात्पर्यम्, वचनेन प्रकृतिषमारोपतात्पर्यकत्वेगौरवात्" इत्यस्मद्गुरव । साधु भवत्येवेति—शिष्टप्रयोगादिति भाव । सादृश्याख्यसम्बन्धेनेति—नन्वेवमनुकार्यप्रत्यायकत्वे अर्थवत्त्वमपि स्यादिति प्रातिपदिकत्वाऽऽपत्तिरेवेतिचेन्न, अर्थवत्सूत्रे वृत्त्याऽर्थप्रत्यायकस्यैवाऽर्थवत्त्वाङ्गीकारात् । ननु शाब्दे वृत्तिज्ञानजन्योपस्थितेरेव हेतुत्वस्य व्यवस्थापितत्वादभेदपक्षे सादृश्याख्यसम्बन्धेनोपस्थितौ अनुकार्यस्य शाब्दत्वाऽऽपत्तिरितिचेत् न वृत्तिज्ञानस्य अनुकरणाऽजन्यशाब्दत्वमेव कार्यताऽवच्छेदकम्, अनुकार्यविषयकशाब्दत्वाऽवच्छिन्नं प्रति अनुकरणजन्योपस्थितित्वेन कारणतायाः विशेषरूपेण स्वीकारादित्याशयात् इत्यलम् । इति नामार्थवाद ।

अथ समासादिवृत्त्यर्थवाद । नामार्थनिरूपणप्रसङ्गात्समासादिवृत्त्यर्थनिरूपण प्रतिजानीते—अथ समासादिवृत्त्यर्थ इति—आदिना कृत्तद्धितैकशेषसनाद्यन्त

अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्व, जहत्स्वार्थात्वम्। अवयवार्थसहितसमुदायार्थबोधिकात्वमजहत्स्वार्थात्वम्। रथन्तर साम भेद । शुश्रूषा सेवा इति पूर्वस्योदाहरणम्। राजपुरुष इत्यादावन्त्या।

धातुसञ्ज्ञकानां परामर्शं । वृत्तिर्द्विधा जहत्स्वार्थेति-तदुक्तं "समर्थं पदविधि" रितिसूत्रे भाष्ये—"अथ तेषामेव ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवति, आहो स्विदजहत्स्वार्था ? किं चात ? यदि जहत्स्वार्था वृत्ति, 'राजपुरुषमानये'त्युक्ते पुरुषमात्रस्याऽऽनयन प्राप्नोति, 'औपगवमानये' त्युक्तेऽपत्यमात्रस्य। अथाऽजहत्स्वार्था वृत्ति उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचन प्राप्नोति। का पुनर्वृत्तिर्नाम्या ? जहत्स्वार्था। ननु चोक्तम्—'राजपुरुषमानये'त्युक्ते पुरुषमात्रस्याऽऽनयन प्राप्नोति, 'औपगवमानये'त्युक्तेऽपत्यमात्रस्येति ? नैष दोषः, जहदप्यंशो स्वार्थं नात्यन्ताय जहाति, य परार्थविरोधी स्वार्थंस्त जहाति। अथवा पुनरस्तु अजहत्स्वार्था वृत्ति । ननु चोक्तम्—उभयोर्विद्यमानस्वार्थयोर्द्वयोर्द्विवचनमिति द्विवचन प्राप्नोतीति ? कस्या पुनर्द्विवचन प्राप्नोति ? प्रथमाया । न प्रथमासमर्थो राजा। षष्ठ्यास्तर्हि प्राप्नोति, न षष्ठीसमर्थं पुरुष । प्रथमायास्तर्हि प्राप्नोति। ननु चोक्तम्—न प्रथमासमर्थो राजेति ? अभिहित सोऽर्थोऽन्तर्भूत प्रातिपदिकार्थं। तत्र "प्रातिपदिकार्थे प्रथमे"तिप्रथमाया एव द्विवचन प्राप्नोति। 'संघातस्यैकाप्या ऽऽवयवसङ्ख्यातः सुबुत्पत्ति' । संघातस्यैकत्वमर्थं, तेनाऽवयवसङ्ख्याव सुबुत्पत्तिर्न भविष्यति।" इति । 'इदुतौ चे'ति सूत्रेऽपि—अथ क्रियमाणेऽप्यर्थग्रहणे कस्मादेवाय न भवति ? जहत्स्वार्था वृत्तिरिति। अथाऽजहत्स्वार्थायां वृत्तौ दोष एव ? अजहत्स्वार्थायाञ्च न दोषः, समुदायाऽर्थोऽभिधीयते" इत्युक्तम्। तत्र 'जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था' इति विवरणे भूषण-सारे। 'जहति (शत्रन्तप्रयोग) स्वानि=वृत्तिघटकीभूतपदानि य स जहत्स्व:, ताद्दशोऽर्थो यस्या'मिति समानाधिकरणपदकोऽपि बहुव्रीहि संभवतीति परे। पूर्वंस्य विवरणे "सप्तमी विशेषणे' इति सूत्रे सप्तमीग्रहणाज्ज्ञापकादन्यधिकरणो बहुव्रीहिरितिबोध्यम् क्रमेण द्वयोर्लक्षणमाह—अवयवार्थेति । इति पूर्वस्या उदाहरणमिति—"य परार्थविरोधीस्वार्थस्तं जहाति" इत्युक्तभाष्येण जहत्स्वार्था यास्तादृश एव विषयो लभ्यत इति बोध्यम्।

समासादिपक्षस्तु विशिष्ट एव शक्तिर्नावयवे रथन्तरम्, सप्तपर्ण, शुश्रूषेत्यादौ अवयवार्थानुभवाभावात् । अत एव भाष्ये व्यपेक्षापक्ष मुद्भाव्य "अथैतस्मिं व्यपेक्षाया सामर्थ्ये योऽसावेकार्थीभावकृतो विशेष स वक्तव्य" इत्युक्तम् । धवखदिरौ, निष्कौशाम्बि, गोरथो, घृतघटो, गुडधाना, केशचूड, सुवर्णालङ्कारो, द्विदशा, सप्तपर्ण इत्यादौ साहित्य ना त युक्त पूर्ण मिश्र सङ्घात विकार सुचप्रत्ययलोप वीप्सार्थ वाचनिका एव वाच्या इति तद्भाष्याशय ॥

विशिष्ट एव शक्तिरिति—समाससञ्ज्ञके समुदाय, कृदन्ते, तद्धितान्ते, एक शेषे, सनाद्यन्तधातुसञ्ज्ञके समुदाये एव शक्तिपर्यासिरित्यर्थ —"समर्थ पद-विधि"रिति सूत्रेण एकार्थीभावात्मकसामर्थ्यस्य विशिष्ट एव बोधनादिति भाव । विशिष्ट एवेत्येवकारेण व्यवच्छेद्यमाह—नत्ववयव इति ।

'विशिष्ट एव शक्तिर्नावयवे' इत्यत्र प्रतीत्यभावमपि प्रमाणयति—अव यवार्थानुभवाऽभावादिति । अवयवे रथन्तरमित्यादिना रथहरणकतरणकर्त्रा-द्यर्थस्य बोध स्यादेव तु नास्ति, तस्मान्नाऽवयवे शक्तिरिति भाव । अत्र भाष्य मपि प्रमाणमित्याह—अत एव भाष्य इति । भाष्याशयमाह—धवखदिरा वित्यादि । वाचनिका एव वाच्या इति—तथा च तत्तदर्थबोधक-तत्तद्वचनाना कर्तव्यत्वे महागौरवम्, एकार्थीभावे तु धत्वाऽवच्छिन्ने धव पदस्येव साहित्यावच्छिन्न एव धवखदिरादिपदाना "समर्थ पदविधि" रिति सूत्रेण शक्तिबोधनमिति लाघवम । अयमेव एकार्थीभावकृतो विशेषो भाष्योक्त इति भाव । एकार्थीभावकृत इति—एकार्थीभावश्च विशेष्यविशेषणभावावगा ह्युपस्थितिजनकत्वमितिशेखरकृत । यत्किञ्चित्पदजन्यपृथगुपस्थितिविषयार्थैकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयैकशक्त्यैवोपस्थितिजनकत्वमेकार्थीभाव । घट इत्यादौ वारणाय दृष्टानामित्यन्तम् । औपगवादौ प्रत्ययाना यथा दृष्टत्वाऽ भावेनोपस्थितौ यत्किञ्चित्पदजन्यत्वेति विशेषणम् । अपत्यरूपार्थस्योपगोरपत्य मित्यादौ तथा दर्शनसत्त्वात्तत्त्वम् । विमतत्यर्थस्य तु न तथात्वम्, तद्वाच्याय वाचकस्य शब्दान्तरस्याऽभावादिति मञ्जूषाकृत ।

यत्तु व्यपेक्षावादिनो नैयायिकमीमासकादय—न समासे शक्ति।

ननु पूर्वत्र लक्षणे घट इत्यादावतिव्याप्तिः, उत्तरत्र तु लोमपक्षाङ्गूलाऽच्छिन्नवाचकपशुपदेऽतिव्याप्तिरितिचेत्—न, शक्तिविशिष्टत्वमेकार्थीभाव इति स्वीकारात्। यै० च—स्वपर्याप्त्यधिकरणघटितत्वम्, स्वनिरूपकेतरनिरूपितशक्तिपर्याप्त्यधिकरणत्वमित्येतत्त्रितयसम्बन्धेन। अन्त्यसम्बन्धाऽभावेन रथन्तरादिषु तु नाऽव्याप्तिः, तादृशार्थे तेषां रूढत्वस्वीकारात् घटपदादिवत्। तादृशार्थे सामविशेषादौ रथन्तरादिशब्दानां रूढत्वस्वीकारेणाऽन्त्यसम्बन्धाऽभावकृता तेष्वव्याप्तिरिति न वाच्यम्, 'रथेन तरती'ति विग्रहदर्शनात् सामविशेषनिरूपितशक्तिज्ञाने रथपदे तरपदनिष्ठशक्तिज्ञाननिरूपितप्रयोज्यत्वस्यारोपादन्त्यसम्बन्धस्य सत्त्वादिति भाव।

एवम्—एकशेषे रामावित्यादौ व्यपदेशिवद्भावेन स्वपर्याप्त्यधिकरणघटितत्व, स्वनिरूपकेतरव्यक्तिनिरूपितशक्तिपर्याप्त्यधिकरणघटितत्व बोध्यम्।

राजपुरुष इत्यत्र स्व विशिष्टार्थघटकनिरूपिता शक्ति राजत्वाऽवच्छिन्ननिरूपिता तत्पर्याप्त्यधिकरणराजपदघटितत्वस्य, स्वनिरूपको राजरूपोऽर्थस्तदितरपुरुषरूपाऽर्थ, तन्निरूपितशक्तिपर्याप्त्यधिकरणपुरुषपदघटितत्वस्य, राजत्वाऽवच्छिन्ननिरूपितशक्तिज्ञानप्रयोज्य राजसम्बन्ध्यभिन्नपुरुषत्वाऽवच्छिन्ननिरूपितयक्तिज्ञान, तद्विषयीभूतशक्तिपर्याप्त्यधिकरणत्वस्य च 'राजपुरुष' इति समुदाये सत्त्वाल्लक्षणसमन्वय। अन्त्यसम्बन्धेन घटादिपदे वाक्ये च नाऽतिव्याप्ति। वाक्यशक्तिनये वाक्ये, वाक्यैकदेशस्य वाक्यार्थे शक्तिरिति नये 'दधि भुङ्क्ष्व' इत्यर्थे 'दधि' इत्यत्र चाऽतिव्याप्तिरिति न वाच्यम्, अन्त्यसम्बन्धघटकस्वज्ञानप्रयोज्यज्ञानविषयीभूताया शक्तेरारोपिताया एव ग्रहणेनाऽदोषात्। एकार्थीभावेत्यत्र स्थिनिदशेनारोपितस्यैवैकार्थत्वस्य वृत्तौ वृत्तिप्रयोजकतत्तत्प्रकारसामर्थ्येन स्वीकारात्। वाक्ये वाक्यैकदेशे च वास्तविकशक्ते सत्त्वादित्यलमित्यस्मद्गुरुचरणा। "संसृष्टार्थं समर्थम्" इतिसमर्थसूत्रस्थ भाष्य तादृशैकार्थीभावस्वीकारे मानमितिद्रष्टव्यम्।

प्रतिवादिमत निराकरणार्थमनुवदति—यत्तु इति। व्यपेक्षावादिन इति—

राजपुरुष इत्यादौ राजपदादे सम्बन्धिनि लक्षणयैव राजसम्बन्धवदभिन्न पुरुष इति बोधात्। अत एव राज्ञ पदार्थैकदेशत्वान्न तत्र ऋद्धस्येत्यादि विशेषणान्वय ।'पदार्थं पदार्थेनान्वेति नतु पदार्थैकदेशेन' इत्युक्ते । 'सविशेषणाना वृत्तिर्न वृत्तस्य च विशेषणयोगो न' इत्युक्तेश्च। न वा घन श्यामो, निष्कौशाम्बि , गोरथ इत्यादाविवादिप्रयोगापत्ति । लक्षणयैवो क्तार्थतया 'उक्तार्थानामप्रयोग' इति न्यायेन इवादीनामप्रयोगात्। नापि "विभाषा" इति सूत्रमावश्यकम्, लक्षणया राजसम्बन्ध्यभिन्न इति बुबोध यिषाया समासस्य, राजसम्बन्धवानिति बुबोधयिषाया विग्रहस्य च प्रयोगनियमसम्भवात्। नापि शक्ति , पङ्कजशब्दचदितिपङ्कजशब्दप्रति द्वन्द्विता शक्तिसाधिका तत्राश्रयत्वशक्तिमजानतोऽपि ततो बोधात्।

न च शक्त्यग्रहे लक्षणया तस्माद्विशिष्टार्थप्रत्यय सम्भवति । अत एव राजपदादिशक्त्यग्रहे राजपुरुष इत्यादिषु न बोधः । न च चित्रगुरित्यादौ लक्षणासम्भवेऽप्यपदार्थयबुद्धौ लक्षणाया असम्भव ,

---

व्यपेक्षा च—पृथगुपस्थितानां पदार्थानामाकाङ्क्षावशात्परस्पर य सम्बन्धः स । यथा—वाक्ये । एकार्थीभावश्च वृत्ताविति तयोर्भेद । नैयायिकादीनां मते तूभयत्राऽपि व्यपेक्षैवेतिबोध्यम् । अतएवेति—राजपदादे राजसम्बन्धिनि लक्षणासत्त्वादेवे त्यर्थ । पदार्थ = पदजन्यप्रतीतिविशेष्य , पदार्थेन=पदजन्यप्रतीतिविशेष्येने त्यर्थ । घनत्वाऽन्वयतात्पर्येण 'नित्यो घट' इति प्रयोगो नेति तद्व्युत्पत्ते फलम्। सविशेषणानामिति वृत्तस्येति च वार्तिकद्वय समर्थसूत्र भाष्ये व्याख्यातम्। लक्ष णयैवेति—घनश्यामादौ घनादिशब्दस्य घनसादृश्याद्यर्थे लक्षणयैवेत्यर्थ । राज सम्बन्ध्यभिन्न इति बुबोधयिषायामिति—अभेदसम्बन्धेन राजसम्बन्धवत प्रकारत्वेन बोधनेच्छायामित्यर्थ । राजसम्बन्धवानिति बुबोधयिषाया मिति—आश्रयत्वसम्बन्धेन राजसम्बन्धस्य पुरुषे प्रकारतया बोधनेच्छायामित्यर्थ । प्रतिद्वन्द्विता = दृष्टान्तता । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमित्याशयेनाह—तत्राऽ वयवेति । राजपुरुषादिपदे चावयवशक्तिमहाधीना लक्षणाग्रह इत्याह—न चेति- शक्यसम्बन्धरूपलक्षणायां शक्तिग्रहस्य कारणत्वादिति भाव । चित्रगुरित्यादौ लक्षणासम्भेऽपीति—चित्राऽभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तर

बहुव्युत्पत्तिभङ्गनापत्तेरितिवाच्यम् । प्रापोदक इत्यादौ उदकपदे ए
लक्षणास्वीकारात् । पूर्वपदस्य यौगिकत्वे तत्र लक्षणाया धातुप्रत्यय
तदर्थज्ञानसाध्यतया विलम्बितत्वात् । प्रत्ययानां सन्निहितपदार्थगतत्वाच

तादृशगोस्वामी गोपदेन लक्ष्यते । गोपदस्य चित्रपदस्य वा विनिगमनाविरहे
लक्षकत्वाऽसम्भव इति न वाच्यम्, गोपदार्थे साक्षात्सम्बन्धस्यैव विनिगमकत्वात्
'स्वबोध्यसम्बन्धो लक्षणे'ति मते तु समूहस्यैव लक्षकत्वमिति लक्षणासम्भव
द्रष्टव्य । अपष्टयर्थबहुव्रीहाविति—प्रासोदक इत्यादौ । बहुव्युत्पत्तिभङ्गना
पत्तेरिति—अपष्टयर्थबहुव्रीहौ 'प्रासोदक' इत्यादौ पृथक्शक्तिवादिनां मते प्राप्ति
कर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तत्समभिव्याहारलक्षणायामपि उदककर्तृकप्राप्तिकर्म
प्राप्त इत्यर्थाऽलाभे प्राप्ते 'प्राप्ते'रित्तप्रत्ययस्य कर्त्रर्थकस्य कर्मार्थे लक्षणायामपि
समानाधिकरणनामार्थयोरभेद एव संसर्ग इति व्युत्पत्तेरुदकाऽभिन्न प्राप्तिकर्मेति
बाध स्यात् । उदकस्य प्राप्तौ कर्तृतयाऽन्वय तु नामार्थयोरभेदान्वय इति व्युत्पत्ति
भङ्गन स्यात्, प्राप्तेर्धात्वर्थतया तत्रोदकस्य कर्तृतासम्बन्धेन भेदेनान्वये नामा
र्थघात्वर्थयो साक्षाद्भेदेनाऽन्वयोऽनुभवन' इति व्युत्पत्तेश्च भङ्गापत्ति अन्यथा
देवदत्तेन पच्यत इत्यर्थे 'देवदत्त पच्यते' इत्यपि स्यात्कृतासम्बन्धेन पाके देवदत्त
स्यान्वयसम्भवात् । अत एव च तण्डुलं पचतीत्यर्थे तण्डुल पचतीतिप्रयोगो न ।
अन्यथा कर्मत्वेन पाकेऽन्वयापत्ते । अस्या अपि व्युत्पत्तेरदेव फलम् । नामार्थप्रका
रकशाब्दबोधं प्रति विभक्तिजन्योपस्थितेः कारणत्वमिति व्युत्पत्तिभङ्गश्च स्या
दित्यर्थ । उदकपद एव लक्षणेति—प्रासोदक इत्यादौ उदकपदे एव रूढत्वेन
लक्षणाया शीघ्रोपस्थितिकत्वरूपादिनिगमनात् उदककर्तृकप्राप्तिकम इत्यर्थे लक्षणा,
प्रासपद तु तात्पर्यग्राहकमिति भाव । उदकपद एव लक्षणेत्यत्र विनिगमकमाह—
पूर्वपदस्येति । ननु व्युत्पत्तिवद्व उदकपदस्याऽपि यौगिकत्व तुल्यमत आह—
प्रत्ययानामिति ।

नचैव घटादिपदेष्वपि चरमवर्ण एव बोधकताकल्पना स्यात्, पूर्वपूर्ववर्णानां
तात्पर्यग्राहकत्वेनोपयोगसम्भवात्, प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्व
व्युत्पत्त्यनुरोधादिति चेत्, मैवम्—घटादिपदे व्यवहारादिना समुदाय एव शक्ति
ग्रहात् प्रत्येकवर्णे पर्याप्त्या बोधकत्व नास्ति, समासे च प्रत्येकपदे पर्याप्त्या बोध

बोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्ति कल्प्यमाना प्रत्येक वर्णेषु बोधकत्वेऽपि विशिष्टे कल्प्यते, विशिष्टस्यैव सङ्केतितत्वात् । प्रकृते चात्यन्तसन्निधानेन प्रत्ययाश्रयसौलभ्यायोत्तरपदे एव लक्षणा कल्प्यत इति विशेष । स्वीकृत च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्व मीमासकमन्यैरित्याहुः । अत्रोच्यते—समासे शक्त्यस्वीकारे विशिष्टस्यार्थवत्त्वाभावेन प्रातिपदिकत्व न स्यात् । अत एवार्थवत्सूत्रे भाष्ये "अथवादिति किम्, अर्थवता समुदायोऽनर्थक दशदाडिमानि षडपूपा कुण्डमजाजिनम्" इति प्रत्युदाहृतम् । एव च राजपुरुषपदयोस्वन्मते प्रत्येकमर्थवत्त्वेऽपि समुदायस्य दशदाडिमादिवदनर्थकत्वात्प्रातिपदि-

---

कत्वमस्तीति विशेषसत्त्वान्न तुल्ययायापत्तिरित्याह—घटादिपदे चेति । अतिरिक्ता शक्तिरिति—व्युत्पत्तिपक्षाश्रितघटपदघटकधातुप्रत्ययनिष्ठशक्त्यतिरिक्तेत्यर्थ । प्रत्येक वर्णेषु बोधकत्वेऽपीति—अनयाप्त्या प्रत्येकवर्णानां बोधकत्वाभ्युपगन्तॄणामपीत्यर्थ । विशिष्ट = विशिष्ट एवेत्यर्थ । विशिष्टस्यैव = समुदायस्यैव, सङ्केतितत्वात् = कोशव्यवहारादिना सङ्केतितत्वेन बोधनात्, कोशव्यवहारादिना विशिष्ट एव शक्तिग्रहादिति यावत् । अत्र भूषणसारे व्यपेक्षावादिनैयायिकमीमांसकमतोद्धरणेऽयं पाठभेद—"घटादिपदे चाऽतिरिक्ता शक्ति कल्प्यमाना विशिष्टे कल्प्यते, विशिष्टस्यैव सङ्केतितत्वात्, बोधकत्वस्याऽपि प्रत्येकवर्णेष्वसत्त्वात्" इति । अत्र पाठे बोधकत्वस्याऽपि बोधकतापर्याप्तेरपीत्यर्थ । ननु प्राप्तादकपदेऽपि विशिष्ट एव शक्ति कल्प्यतामत आह—प्रकृते चात्यन्तेति । कोशादिना विशिष्टप्रासादकपदस्य सङ्केतितत्वेनाऽबोधनान्न प्रासादकपदे विशिष्टे शक्तिकल्पनेति भाव । पूर्वोक्तापत्तिमिष्टापत्त्याऽपि परिहरति—स्वीकृतञ्च त ।

"व्यपेक्षायां सामर्थ्ये समास एकोऽसङ्गृहीतो भवती"ति माष्याशय प्रकाशो कुर्वन्नैयायिकादिमत दूषयति—अत्रोच्यत इति । विशिष्टस्यार्थवत्त्वाऽभावेनेति—विशिष्टस्य अर्थनिरूपितैकवृत्त्याश्रयत्वाभावेनेत्यर्थ । ननु वृत्तिद्वयाश्रयत्वमप्यर्थवत्त्वमस्तु इत्यत आह—अत एवेति । एकवृत्त्याश्रयत्वमर्थवत्त्वमितिस्वीकारादेवेत्यर्थ । दशदाडिमानीति—अत्र समुदाये परस्पराऽऽकाङ्क्षाऽभावेनैकवृत्त्याश्रयत्वरूपाऽर्थवत्त्वाऽभावान्न प्रातिपदिकत्वमितिभाव । अनर्थकत्वात्—एक-

फत्वानापत्ते । न च "कृत्तद्धित" इतिसूत्रे समासग्रहणात् तत्सञ्ज्ञेति वाच्यम् । तस्य नियमार्थतायां भाष्यकृतैव प्रतिपादितत्वात् । अन्यथा सिद्धि विना नियमायोगात् । अत एव राज्ञ पुरुष देयदत्त पचतीत्यादि वाक्यस्य मूलकेनोपदशमित्यादेश्च न प्रातिपदिकत्वम् । किंच समासे शक्त्यस्वीकारे शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थं वत्वस्याप्यसम्भवेन सर्वथाप्रातिपदिकत्वाभाव एव निश्चित स्यादिति स्याद्यनुत्पत्तौ "अपद न प्रयुञ्जीत" इति भाष्यात् समस्तप्रयोगविलयापत्ते ।

अथ तिप्तस्झोत्यत तीत्यारभ्य ङ्यो सुमिति पकारेण तिप्प्रत्याहारो भाष्यसिद्ध । तत्पर्युदासेन "अतिप्प्रातिपदिकम्" इत्येव सूत्र्यताम्,

---

पूत्यानाश्रयत्वात् । तत्सञ्ज्ञा = समासस्य प्रातिपदिकसंज्ञा । अश्रयत्वाऽभावेऽपीति शेषोऽस्य । नियमार्थतया इति—एवञ्च अन्यनिवृत्तिफलकसिद्धविषयकविधित्वरूपनियमत्वाय समासस्याश्रयत्वमावश्यकम् । भाष्यकृतैवेति—अर्थवत्समुदायानां समासग्रहण नियमार्थमिति भाष्योक्तेरितिभाव । ननु नियमस्य किं फलमित्यत आह—अत एवेति । अत एव = समासग्रहणस्य नियमार्थत्वादेव । ननु नैयायिकादिमते वाक्यशक्तेरभावेन राज पुरुष इत्यादेरर्थवत्त्वाऽभावादेव न प्रातिपदिकत्वमित्यत आह—मूलकेनोपदशमिति—नैयायिकादिमते उत्तरसूत्रेऽर्थवत्पदाऽसम्बन्धात्कृद्ग्रहणपरिभाषया विशिष्टस्य कृदन्तत्वदादित्वाद्दोषापत्तिरेवेतिभाव । तद्वारणाय समासग्रहणकृतनियमस्य साफल्यम् । वैयाकरणमते तूत्तरसूत्रेऽप्यर्थवत्पदस्य सम्बन्धेऽपि मूलकेनापदमित्यादौ वाक्यशक्तेः स्वीकारेणाऽप्यवत्त्वेऽपि समासग्रहणीयनियमेन दोषवारण भवतीति । नैयायिकमते राजपुरुषादौ शक्यसम्बन्धाभावेन समासग्रहणस्य सञ्ज्ञाविधेयतया नियमत्वाऽभावे समासादावर्थवत्त्वाऽभावेनोत्तरसूत्रेऽर्थवत्पदस्याऽसम्बन्ध मूलकेनापदमित्यादौ कृद्ग्रहणपरिभाषया दोष स्यादेवेति निष्कर्ष ।

ननु समासे शक्त्यभावेऽपि लक्षणयाऽर्थवत्त्व स्यादत आह—किञ्चेति । समस्तप्रयोगेति—समासस्सञ्ज्ञकशब्दप्रयोगेत्यर्थ, समाससंज्ञाया अन्वर्थत्वात्समस्तेति प्रयोग । ननु अर्थवतरदाऽग्नित्यासेऽर्थवत्त्वाऽभावेऽपि समासे संज्ञाविधित्यायेन शङ्कते—अथेति । भाष्यसिद्ध इति—"अमत्यप इतिचेत् विवेका

वत "समासश्च",इति सूत्र नियमार्थमस्तु किं सूत्रद्वयेनेति। सुप्तिङन्तभिन्न प्रातिपदिकमित्यर्थात् समासस्यापि सा स्यादिति समासश्चेत्यस्य नियमार्थत्व सुलभमिति चेत्सत्यम्। प्रत्येक वर्णेषु सज्ञाधारणायार्थवदित्यस्यावश्यकत्वेन समासेऽव्याप्तिस्तदवस्थैव। तथा च प्रातिपदिकसज्ञारूपकार्यसेवार्थवत्त्वमनुमापयति। समासोऽर्थवान्, प्रातिपदिकत्वात्, यन्नार्थवत् तन्न प्रातिपदिकम्, अभेदविवक्षापक्षे भूसत्तायामित्याद्यनुकरणवदिति।

यत्तु "पदार्थ पदार्थेन" इति "वृत्तस्य विशेषणयोगो न" इति वचनद्वयेन ऋद्धस्येत्यादिविशेषणान्वयो न भवति, तत्तु समासे एकार्थीभावे स्वीकृतेऽवयवाना निरर्थकत्वेन विशेषणान्वयासम्भवात् फलितार्थपरम स्माकम् युष्माक तु अपूववाचनिकमिति गौरवमित्यग्रे वक्ष्यते।

देशे प्रतिषेधोऽन्तवत्त्वात्,' अप्रत्यय इतिचेत् तिबेकादेशे प्रतिषेधो वक्तव्य — काण्डे, कुड्ये" त्यथवत्सूत्रस्थभाष्यसिद्ध इत्यर्थ। सुप्तिङन्तभिन्नमिति— पूर्वोक्तसिप्रत्याहारे सुप्तिङोरन्तर्भूतत्वात् तिबन्तंभिन्नमिति वाच्यार्थं सुप्तिङन्त भिन्नमिति फलितार्थो भवतीति भाव। समासस्याऽपीति—समासस्याऽपि तिबन्ततदादिभिन्नत्वात्। तिप प्रत्ययत्वेन 'प्रत्ययग्रहणे यस्मा'दिति परिभाषाया प्रवृत्तेरितिभावः। अर्थवदित्यस्याऽऽवश्यकत्वेनेति—अर्थवदिति विशेषणस्यावश्यकत्वेनेत्यर्थ। ननु सङ्ख्याकमादेरभावादेकैकस्माद्वर्णात्सुबुत्पत्तिर्न भविष्यति, औत्सर्गिकमेकवचनमपि गमकमत्र एवेति भाष्ये स्पष्टम्, यथाऽन्ययेभ्य सुबुत्पत्तावव्ययादाप्सुप इति गमकम्। एवञ्च फलाऽभावात्प्रतिवर्णं प्रातिपदिकसंज्ञाऽपि न भविष्यतीतिचेत्—तथापि 'दशदाडिमानि, षडपूपा' इत्यादयनन्वितार्थक समुदायस्य वारणाय 'अर्थवदि'ति विशेषणस्यावश्यकत्वम्, तत्र हि प्रातिपदिकत्वे सति "सुपो धातु"रिति लुक् स्यादिति भाष्यादौ स्पष्टम्। समासग्रहणीयनियमेन तु न वारण कर्तुं शक्यम्, नियमस्य सजातीयापेक्षतया परस्परान्वितायकसमुदाय स्यैव तेन वारणादितिशेषरे स्पष्टम्। अनुमानस्वरूपमाह—समासोऽर्थवानिति। "निपातस्याऽनयकस्य प्रातिपदिकसज्ञा वक्तव्या"इतिवार्त्तिकेन अनयकस्याऽपि निपातस्य सज्ञा भवतीति तन्त्रमेतत्।

व्यपेक्षावादे दूषणान्तरमाह—यत्तु पदार्थ इति। अस्माकम् = एकार्थी

यत्तु प्रत्ययाना सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरिति, तन्न उपकुम्भम्, अर्द्धपिप्पलीत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात्। मम तु प्रत्ययाना प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तौ विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् विशिष्टस्यैवार्थवत्त्वाच्च न दोष। किं च राजपुरुषादौ राजपदादेः सम्बन्धिनि सम्बन्धे वा लक्षणा। नाद्य। राज्ञ पुरुष इति विवरणविरोधात्। वृत्तिसमानार्थवाक्यस्यैव विग्रहत्वात्। अन्यथा तस्माच्छक्तिनिर्णया

भाववादिनाम्। युष्माकम्=अपेक्षाबादिनाम्। वक्ष्यते इति—बहूना वृत्तिविग्रहाणामिति कारिकांशविवरणवेलायामित्यादि।

प्राप्तोदक इत्यादौ उदकपद एव लक्षणायां प्रत्ययाना सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोध इति नैयादिकादिमताद्धरण यदुक्त तत्खण्डयति—यत्तु प्रत्ययानामिति। व्यभिचारादिति—अव्यवहितपूर्वत्वेनाऽनुसन्धीयमानत्वरूपसन्निहितत्वस्योपकुम्भादौ पूर्वपदार्थेऽभावेन तादृशव्युत्पत्तेर्भङ्गादिति भावः। प्रकृतित्वादिति—प्रकृतित्वञ्च प्रत्ययविधानुद्देश्यत्वम्। विशिष्टस्यैवाऽर्थवत्त्वाच्चेति—अपेक्षावादिमते तु 'चित्रगुमानये'त्यादौ, 'प्राप्तोदकं ग्रामे' त्यादौ च विशिष्टस्याऽर्थवत्त्वाऽभावेन 'प्रत्ययाना प्रकृत्यर्थान्वितस्वार्थबोधकत्वमि'ति व्युत्पत्तौ प्रकृत्यर्थाऽभावात्प्रत्ययार्थकमन्वयेनाऽयोगाऽऽपत्तिरपि, उदकपदेऽजहत्स्वार्थाया विनिगमकाऽभावरूपो दोषश्च स्यादेवेति भावः।

व्यपेक्षावादिमतमस्वीकृत्य 'राजपदादे सम्बन्धिनि लक्षणयैवेति यदुक्त तत्खण्डयति—किञ्चेति—सम्बन्धिनि लक्षणेत्यनेन सम्बन्धिनि लक्षणेति तात्पर्यम्, सम्बन्धे लक्षणेति वा? तदुभयमपि न युक्तिक्षममित्याह—नाद्य इति। इति विवरणविरोधादिति। राजपुरुषादौ राजपदादे सम्बन्धिनि लक्षणायां तस्याऽभेदसर्गेण पुरुषपदार्थादावन्वयस्य वाच्यतया 'राजपुरुष' इति समासाद्राजसम्बन्धिप्रकारकस्याऽभेदसर्गकस्य, 'राज्ञः पुरुष' इति वाक्याच्च राजसम्बन्धप्रकारकस्याऽऽश्रयत्वसंसर्गकस्य बोधस्योदये समासविग्रहवाक्ययो समानार्थकत्वाऽभावात् समासवाक्यस्य विग्रह्यमाणस्य विग्रहवाक्येन विवरणेन विरोध स्पष्ट एवेति भाव। वृत्तिसमानार्थवाक्यस्यैवेति—वृत्तिविग्रहयोः समानार्थत्वे "काला परिमाणिना'

स्यात्। नान्त्य । राजसम्बन्धरूपपुरुष इत्यनन्वयप्रसङ्गात्।

इत्यादिसूत्रस्थभाष्यमप्यनुकूलम्। तत्र हि—किंप्रधानोऽयं समास इति प्रश्नस्य "उत्तरपदार्थप्रधान" इत्युत्तरे 'राज्ञः पुरुष राजपुरुष इत्यादौ विग्रहे उत्तरपदादुत्तर श्रूयमाणा विभक्तिर्यथा समासादपि श्रूयते तथाऽन्यादपि मासो जातस्येति विग्रहे जातपदादुत्तर श्रूयमाणा पष्ठी विभक्ति 'मासजात' इतिसमासादपि श्रूयेत' इत्याशङ्कितम् आशङ्क्य च "अभिहित सोऽर्थोऽन्तर्भूत प्रातिपदिकार्थं सम्पन्न इति पष्ठी न भवती"तिसमाहितम्। अत्र विग्रहीयपष्ठीविभक्तेः समास आपत्तिशङ्काया तस्यार्थस्य समासेऽन्तर्भावित समाधानेन च वृत्तिविग्रहयो समा नार्थकत्वभावेदितमेव भवति। ननूक्तभाष्यादितो विवरणत्व वृत्तिजन्यप्रतीतिविष यायप्रतीतिजनकत्वमेवास्तु, तच्च प्रकृतेऽस्तुतम्, समास (वृत्ति) जन्यप्रतीति विषयसमासाजन्यप्रतीतिविषयराजसम्बन्धविषयकप्रतीतिजनकत्वात् राज पुरुष इतिवाक्यस्य, समासार्थे सम्बन्धिनि सम्बन्धस्याऽपि प्रविष्टत्वादित्यत आह— अन्यथेति—अन्यथा = वृत्त्यसमानार्थवाक्यस्याऽपि उक्तप्रतीतिजनकत्वावच्छि न्नस्य विवरणत्वे। तस्मात् = विवरणात्। शक्तिनिर्णयो न स्यादिति— विवरणविभिद्यमाणयो समानार्थकत्वनियमे हि विवरणस्य शक्तिग्राहकत्व सम्भवेत्। असमानार्थकस्याऽपि उक्तस्य विवरणत्वाङ्गीकारे तु विवरणविभिद्यमाणयो समा नार्थकत्वनियमभङ्गे विवरणाद्विभिद्यमाणस्य शक्तिग्रहो 'विवृतेर्वदन्ती'त्यनेन वृद्धो क्तेन सूचितो न स्यादिति भाव ।

'राजपदादे सम्बन्धे लक्षणा' इत्यपि न विचारसहमित्याह—नान्त्य इति। इत्यन्वयप्रसङ्गादिति—राजसम्बन्धस्य नामार्थत्वेन अभेदसम्बन्धेनैव पुरुषेणाऽ न्वयाद्य स्यान्नत्वाश्रयसम्बन्धेनेतिभाव । ननु समानविभक्तिकत्व नामार्थयोरभेद- बोधे तन्त्रम्, तच्चाऽत्र नास्तीति, कथ राजसम्बन्धरूप पुरुष इति बोधापत्तिरि तिचेत्—न, नीलोत्पलादिसमासे दधिसुन्दरमित्यादौ वाक्ये च व्यभिचारात् समानविभक्तिकत्वस्योक्तबोधे प्रयोजकत्वाऽसम्भवेन विरुद्धविभक्तिराहित्यस्यैव नामार्थयोरभेदबोधे तन्त्रत्वाङ्गीकारात् इत्यन्यत्र प्रपञ्चितम्।

ननु विवरणविभिद्यमाणयोर्वृत्तिविग्रहयोर्विग्रहविभिद्यमाणयोर्वा समानार्थकत्व नियमे विवरणस्य शक्तिग्राहकत्वानुरोधात्समानार्थकत्व समानविशेष्यप्रकारकबोध

ननु तर्हि वैयाकरण इत्यस्य व्याकरणमधीते इति, पाचक इत्यस्य पचतीति कथ विग्रह, वृत्तिसमानार्थत्वाभावादित्यत आह—

आख्यात तद्धितकृतोर्यत्किञ्चिदुपदर्शकम् ।
गुणप्रधानभावादौ तत्र दृष्टो विपर्य्यय ॥ इति ।

तद्धितकृतोर्यत्किञ्चिदर्थबोधक विवरणमाख्यात तिङन्तमिति यावत्, तत्र विवरणविग्रियमाणयोर्विशेष्यविशेषणभावविपर्ययो दृष्ट इति। कृदन्त तद्धितान्तयोराश्रयप्रधान्यम्, आख्याते व्यापारस्येतिबोध्यम् । नन-

---

जनकत्वरूप समानाकारकबोधजनकत्व वाच्यम्, तथा च पैयाकरणादौ तद्धित व्याकरणमधीते इत्यादे 'पाचक' इत्यादौ कृदन्ते च पचतीत्यादे' कथ विग्रहत्यम्, विशेष्यविशेषणभावव्यत्यासादित्याशयेनाऽऽशङ्कते—ननु तर्हीति । समाधत्ते—आख्यातमिति-आख्यातं=तिङन्तम् तद्धितकृतोस्तद्धितान्तकृदन्तयोर्यत्किञ्चित्=विशेष्यविशेषणभावतदवच्छेदकसंसर्गातिरिक्तत्वेन, उपदर्शक=विवरणं भवति । उपदर्शकमित्यस्य व्याख्यानमाह—अर्थबोधकमिति तस्याऽपि व्याख्यानमाह-विवरणमिति । ननु साकल्येन विवरण कस्मान्न भवतीत्यत आह—गुण प्रधानभावादौ विशेषणविशेष्यभाववदवच्छेदकससर्गेषु तत्र आख्याते तिङन्त विपर्यय तद्धितान्तकृदन्तापेक्षया व्यत्यासे वैपरीत्यमिति यावत् दृष्ट स्थितानु भवसिद्धोऽस्तीत्यर्थ । ननु कोऽसौ विपर्यय इत्यत आह—कृदन्ततद्धितान्तयोराश्रयप्राधान्यम्, आख्याते च व्यापारस्य (प्राधान्यम्) इतिबोध्यमिति ।

एवञ्च तिङन्तं तद्धितान्तकृदन्तयोर्यत्किञ्चिदिवरणमेव, न तु साकल्येन विवरणम् । एवञ्च विवरणतुल्यत्वाद्गौणमिदं विवरणमिति भावः ।

